Analyse क्षतानि च उद्बृंहितानि च क्षतोद्बृंहितानि तादृशानि तामसानि यैस्तानि 'The darkness whereof was dissipated and grown respectively.' Dissipated by रक्ताश्मभिः and grown by नीलोपलैः, and hence the rise of क्रोध and प्रमोद in succession. रक्ताश्मनीलोपलतोरणानि—Analyse रक्ताश्च ते अश्मानश्च रक्ताश्मानः। नीलाश्च ते उपलाश्च नीलोपलाः। रक्ताश्मनीलोपलानां तोरणानि रक्ताश्मनीलोपलतोरणानि, 'Arches or arch-gates built of red and black stones (or marbles).' क्रोधप्रमोदौ—Analyse क्रोधश्च पमोदश्च क्रोधप्रमोदौ 'Anger and delight.' नारीजनस्य—Analyse नार्य एव जनो नारीजनः तस्य, 'To the multitude of women.' विभाभिः 'By means of the bright splendour.' यत्र रक्ताश्मनीलोपलतोरणानि विभाभिर्नारीजनस्य क्रोधप्रमोदौ विदधुः 'Where, by means of their bright splendour, the arch-gates built of red and black marbles, the darkness whereof was dissipated and grown respectively, provoked anger and gave delight to multitudes of women wandering at night.'

St. 12. तत्र Construe प्रभावैर्भानुनिभः क्षत्रान्वयैः अलंघ्यं अन्यक्ष्मानाथमानं [अत एव] जयमानं ओजो बिभ्रत् पंक्तिरथाभिधानो भुवो भर्त्ता तत्र अभवत्. पंक्तिरथाभिधानः Analyse पंक्तिरथो दशरथोऽभिधानं यस्य सः, 'Having the name of दशरथ.' An epithet of दशरथ, *Cf.* R. IX 74. "कृतवान्पंक्तिरथो विलंघ्य यत्". भानुनिभःसूर्यसमः, 'Resembling the sun.' 'Like the sun.' अलंघ्यं Expl:—लंघितुमशक्यं अलंघ्यं, 'Insurmountable', 'impassable,' 'inviolable'. अन्यक्ष्मानाथमानं—Analyse अन्येषां क्ष्मा अन्यक्ष्मा। अथ वा। अन्या चासौ क्ष्मा च अन्य क्ष्मा। तां नाथति तच्छीलं, 'Having a habit or disposition of becoming master of the land under the sway of other kings or habituated to become the master of the land other than his own.' जयमानंजयशीलं, 'Given to conquer'. 'Habituated to conquer.' In the epithets अन्यक्ष्मानाथमानं and जयमानं the termination that is employed is चानश्. "ताच्छील्यवयोवचनशक्तिषु चानश्" Pâṇi. III-2-129. 'The affix चानश् comes after a verb in expressing 'habit,' 'standard of age' and 'ability.' The word ताच्छील्य means 'habit' or 'disposition'; वयः means the condition of body such as infancy, youth &c. शक्ति means 'capacity to do a thing.' As भोगं भुंजानः 'habituated to enjoy;' कवचं बिभ्राणः 'Wearing an armour (of the age at which armour may be worn)'; शत्रुं निघ्नानः 'able to destroy his foe.' क्षत्रान्वयैरलंघ्यं जयमानमोजो बिभ्रत्—'In it was a lord of the earth by name दशरथ, resebling the sun, by reason of his majestic grandeur, and holding an everconquering power inviolable by (other) princes born in the क्षत्रिय race,—the power habituated to rule over the land under the sway of other kings.'

St. 13. अखण्डमानः Construe मनुजेश्वराणां मान्योऽखण्डमानो गुणज्ञो राजा मनोज्ञैर्गुणजैः शरदभ्रशुभ्रैर्यशोभिर्दिशो रजतावदाताश्चकार. अखण्डमानः Analyse न खण्ड; अखण्डः । अखण्डः मानः यस्य स अखण्डमानः, 'Of an unimpeachable honour (character).' मनुजेश्वराणां—Analyse मनुजानां ईश्वरः मनुजेश्वरः तेषां, 'To the lords of men.' मनुजेश्वराणां मान्यः Adorable to the lords of people. *Cf.* R. II. 44. "मान्यः स मे स्थावरजंगमानां.' गुणज्ञः Analyse गुणान् जानानीति गुणज्ञः, 'knowing or judging of merits'. 'Appreciating merits.' गुणजैः Analyse गुणेभ्यः जातानि तैः, 'Born of merits.' 'Sprung from merits.' शरदभ्रशुभ्रैः—Analyse शरदः अभ्राणि शरदभ्राणि तद्वत् शुभ्राणि तैः तादृशैः, 'White like autumnal clouds.' रजतावदाताः—Analyse रजतवत् अवदाताः रजतावदाताः, 'White like silver.' राजा दिशो रजतावदाताश्चकार,—'That king of an unimpeachable honour, adorable to the lords of people, judging of merits, made the quarters white like silver with his fame agreeable to the mind, as sprung from his merits and looking bright like the autumnal clouds.'

St. 14. जिगीषुः—Construe अभ्यस्तसमस्तशास्त्रज्ञानोपरुद्धेन्द्रियवाजिवेगः सः जिगीषुः अजनन्दनः आजौ अजय्यान् अन्तः षड्द्विषः पूर्वं विजिग्ये. अभ्यस्तसमस्त°—Analyse अभ्यस्तानि समस्तानि शास्त्राणि तेषां ज्ञानेन उपरुद्धाः इन्द्रियरूपाः ये वाजिनः तेषां वेगो येन स अभ्यस्तसमस्तशास्त्रज्ञानोपरुद्धेन्द्रियवाजिवेगः, 'By whom the speed of horses in the form of his organs of sense was obstructed by the wisdom accruing from his study of all S'ástras.' अजय्यान्—Analyse जेतुमशक्यान् अजय्यान्, 'Difficult to be overcome.' अजनंदनः—Analyse अजस्य नन्दनः, 'Aja's son.' अन्तः—'Belonging to the inner organs.' *Cf.* Ragh XVII. 45. "अनित्याः शत्रवो बाह्या विप्रकृष्टाश्च ते यतः । अतः सोऽभ्यन्तरान्नित्यान्षट्पूर्वमजयद्रिपून् ॥" षड्द्विषः—Analyse षट् च ते द्विषश्च तान्, 'Six enemies,'=षड्वर्गः viz. काम 'desire,' क्रोध 'wrath, लोभ 'covetousness,' मोह 'bewilderment,' मद 'pride,' and मत्सर envy.' *Cf.* Bhatti. I. 2. "व्यजेष्ट षड्वर्गमरंस्त नीतौ." Kirát. I. 9. "कृतारिषड्वर्गजयेन." Also Kámandaka's Nîtisára I. 55. "कामः क्रोधस्तथा लोभो हर्षो मानो मदस्तथा । षड्वर्गमुत्सृजेदेनमस्मिन् त्यक्ते सुखी नृपः ॥ आजौ अजय्यान् षड्द्विषः असौ पूर्वं विजिग्ये—'That son of Aja, whose speed of horses in the form of organs of sense was obstructed by wisdom accruing from his study of all S'ástras, striving to conquer (the regions) first overthrew the six enemies lying within (his mind) and hard to be put down in an open battle.'

St. 15. बलिं—Construe बलिप्रतापापहविक्रमेण त्रैलोक्यदुर्लंघ्यसुदर्शनेन अनन्तभोगाश्रयिणापि तेन पुरुषोत्तमेनालसत्वं न तेने. बलिप्रतापापहविक्रमेण—Analyse

बलिः करः उपहारश्च तेन प्रकृष्टतापानां प्रजादिकष्टानां अपहन्ता शमकः विक्रमः पराक्रमो यस्य तेन तादृशेन, 'Who had a power to tranquilize (*lit.* to remove) the most painful effects (or hardships) caused by his taxations (or presents given to him)'. As applied to पुरुषोत्तम or विष्णु the compound may be analysed as:–प्रकर्षेण तमः प्रतापः तं अपहन्तीति प्रतापापहः । बलिर्दैत्यस्तस्य प्रतापापहः तापनाशनः विक्रमः पराक्रमः यस्य स तेन तादृशेन, 'Whose striding over was able to destroy the power of Bali'. बलि *m.*—A mighty demon, son of विरोचन and the grandson of प्रल्हाद. He conquered the gods who prayed to Vishṇu for succour. The latter was then born on the earth as Vámana and prayed Bali to give him as much earth as he could step over in three steps. This request being granted Vishṇu assumed a mighty form and covered the earth by the first step and the heaven by the second. No room being left for the third, Vàmana planted his foot on Bali's head and sent him down to Pátàla. त्रैलोक्यदुर्लंघ्यसुदर्शनेन–Analyse त्रैलोक्येऽपि लोकत्रयेऽपि दुर्लंघ्यं लंघितुं दुष्करं सुदर्शनं स्वसाक्षात्कारो यस्य तेन तादृशेन 'Whose presence cannot be avoided or transgressed even in three worlds'. So awe-inspiring was his presence. As applied to पुरुषोत्तम or विष्णु the expression may be analysed as:–त्रलोक्येऽपि लोकत्रयेऽपि लंघितुं धर्षितुं दुष्करं सुदर्शनं नाम विष्णोश्चक्रं यस्य तेन तथोक्तेन, 'He whose Sudars'ana weapon was hard (or difficult) to be braved even in three worlds'. अनंतभोगाश्रयिणा—Analyse अनन्तो निरतिशयो भोगः सुखास्वादनं तदाश्रयते इति अनन्तभोगाश्रयी तेन तथोक्तेन, 'Clung (or given up) to the unsurpassed pleasures.' As applied to विष्णु it may be analysed as, अनन्तः शेषो नाम नागस्तस्य भोगः (आभोगः) देहस्तं आश्रयते इति अनंतभोगाश्रयी तेन शेषशायिना, 'One who lies on the body of a serpent named अनंत'. पुरुषोत्तमेन—Analyse पुरुषेषु उत्तमः पुरुषोत्तमः तेन, 'Best of men'. As applied to विष्णु, पुरुषोत्तम means, 'the Supreme Being.' तेन पुरुषोत्तमेनालसत्वं न तेने—'Though given up to the unsurpassed pleasures (of the world), though with such a presence that it could not be avoided even in three worlds, and though possessed of a power to tranquilize the hardships (of his subjects) caused by his taxations, that best of men did not (at all) give scope to idleness'.

St. 16. दृग्हः Construe ततो भुवं जिगीषोस्तस्य विहितांगमर्दः कम्पं वितन्वन् तापैकहेतुर्दुस्तीव्रो ज्वर इव त्रिदशाधिपस्य दिशमाविवेश. विहितांगमर्दः Analyse विहितः कृतः अंगानां मर्दो येन तादृशः, 'Which has effected the crushing of bodily limbs'. As applied to ज्वर, it means 'producing a peculiar uneasy sensation in bodily limbs.' तापैकहेतुः Analyse तापस्य

एकहेतुः तापैकहेतुः, 'The sole object of torments.' As applied to ज्वर, it means 'the unique source of producing fever.' त्रिदशाधिपस्य— Analyse त्रिदशानां अधिपः त्रिदशाधिपः तस्य, 'Of Indra, the lord of thrice ten gods'. तस्य दण्डः त्रिदशाधिपस्य दिशं तीव्रो ज्वर· इवाविवेश—'The army of him, who was striving for conquest of the world, which was effecting the crushing of bodily limbs (or human frames), producing a tremor and was the sole object of torments, advanced to the eastern quarter like a fever of a violent type.'

St. 17. समुद्रं—Construe नितान्तसंतापितपूर्वकाष्ठः समुद्रमुल्लंघ्य गतः तदीयं तेजोऽभिधानः गुरुः अग्निराशिः कटाहे नृपं प्रोत्स्वेदयामास· अग्निराशिः Analyse अग्नेः राशिः अग्निराशिः, 'A heap of fire.' नितान्तसंतापितपूर्वकाष्ठः —Analyse नितान्ता संतापिता नितान्तसन्तापिता। नितान्तसंतापिता पूर्वकाष्ठा येन स नितान्तसंतापितपूर्वकाष्ठः, 'Which has exceedingly scorched up (or harassed, distressed) the eastern quarter.' कटाह *m.*—Name of an island probably the Katái of the Mahomedans or Chinese, in the Malay Archipelago near यवद्वीप or Java, Bali &c. अग्निराशिः कटाहे नृपं प्रोत्स्वेदयामास—'Under the title of his lustrous valour, a large heap of fire, which had (before) exceedingly scorched (or harassed) the eastern quarter (now) crossed the ocean and made the king to sweat in the continent of Katáha.'

St. 18. भुजंग'—Construe तेन नृवरेण भुजंगसंप्रार्थित सेव्यवेला कांचीगुणाकर्षितसार्थलोका कर्कशयत्नभोग्या दक्षिणा दिक् वेश्या इव भुक्ता· भुजंगसंप्रार्थितसेव्यवेला—Analyse भुजंगैः सर्पैः संप्रार्थिता सेव्यवेला मनोहरं समुद्रकूलं यस्याः सा, 'The beautiful or lovely strand of which was earnestly asked for (or prayed for) by serpents'. As applied to वेश्या the compound may be analysed as, भुजंगैः विटैः संप्रार्थिता सेव्यवेला रतिसमयः यस्याः सा, 'To whom an appointment of time for (Rati) pleasure was asked for by paramours'. कांचीगुणाकर्षितसार्थलोका—Analyse काञ्च्याः दक्षिणदिग्वर्तिन्याः पुर्याः गुणैः धर्मद्रविणसंव्यवहारादिभिः आकर्षिताः सार्थाः संघीभूताः (सप्रयोजनाश्च) लोकाः यस्यां सा, 'To which flocked a concourse of people being attracted by religious or trading purposes at कांची.' As applied to वेश्या the compound may be analysed as, कांचीगुणैर्मेखलादामभिराकर्षिताः सार्थलोका धनवन्तो यया सा, 'By whom rich people have been drawn by the string of her zone'. काञ्ची *f.*—'Name of a celebrated anceient city situated in the south of the Indian peninsula and one of the seven sacred cities of the Hindus; they are "अयोध्या मथुरा माया काशी कांचिरवंतिका। पुरी द्वारवती चैव सप्तैता मोक्षदायिकाः". कर्कशयत्नभोग्या—Analyse कर्कशयत्नैः खड्गादिभिः प्रखरोपायैः भोक्तुं

योग्या । अथ वा । स्वायत्तीकर्तुं योग्या, ' Tributes whereof were to be wrung out by having recourse to swords, ' or ' worthy of being subjugated by having recourse to swords '. As applied to वेश्या the compound may be analysed as, कर्कशयत्नैः निर्दयोपायैः भोक्तुं योग्या, ' To be enjoyed in a brutal manner. ' *Cf.* Vámana's काव्यालंकारसूत्रवृत्तिः, 4-3-7. " आकृष्टामलमण्डलाग्ररुचयः सन्नद्धवक्षःस्थलाः सोमाण्णो व्रणिता विपक्षहृदयप्रोन्माथिनः कर्कशाः । उद्वृत्ता गुरवश्च यस्य शमिनः श्यामायमानाननाः योधा वारवधूस्तनाश्च न दधुः क्षोभं स वोऽव्याज्जिनः ॥ " कर्कश *m.*—'A sword '. भोग *m.*— ' Exacting tributes,' or 'enjoyments'. भोगः करग्रहः । अथ वा । रतिः तेन नृवरेण दक्षिणा दिक् वेश्येव भुक्ता—'Like a courtezan, the Southern Quarter was enjoyed by that lord of men, the tributes whereof were wrung out by having recourse to his sword, to which flocked a concourse of people being attracted by religious or trading purposes at काञ्ची, and the beautiful strand of which was earnestly sought after by serpents '. The poet means to say that the southern people made a strong opposition to his advancing forces, but seeing that they could not withstand the force of the pouring numbers of the enemies and their superior military tactics, they laid down their arms and submitted to the concqueror, king Das'aratha.

St. 19. विनिर्जितः—Construe युधि असुरासुप्रघसायुधस्य अस्य शरेण घातं लब्ध्वा विनिर्जितोऽपि मनस्वी यावनेन्द्रः आत्मानमन्यैरसमानमानं मेने. असुरासु°— Analyse असुराणां रक्षसां असवः प्राणाः तेषां प्रघसं प्रभक्षकं आयुधं यस्य स असुरासुप्रघसायुधः तस्य तादृशस्य, ' Whose weapon was voraciously devouring (or making an indiscriminate slaughter of) the lives of demons.' असमानमानं—Analyse न समानः असमानः । असमानो मानो यस्य स असमानमानः तं तथोक्तं, ' Whose sense of honour was unlike that of others,' ' whose sense of hounr was different from that of others (अन्यैः).' यावनेन्द्रः —Analyse यवनानां इन्द्रः यावनेन्द्रः, 'The leader of the Yavanas.' For Yavanas and Turushkas see our edition of Raghuvans'a, preface on the date of Kálida'sa; pp. 113-121 and further. यावनेन्द्रः आत्मानं अन्यैः असमानमानं मेने—' Having received a wound in a battle by an arrow shot by him, whose weapon voraciously devoured the lives of demons and though thus being completely vanquished, that proud leader of the Yavanas looked upon himself as one whose sense of honour was different from that of others.'

St. 20. तेजश्छलेन—Construe अथ तेजश्छलेन हुताशनेन श्रीवासरम्यं तुरुष्कं प्रदहन् [असौ] धूपैरिव आसक्तगतैर्यशोभिराशीयमन्तं सुरभीचकार. तेजश्छलेन—

Analyse तेजः छलो यस्य स तेजश्छलः तेन, Under the plea or semblance of lustrous or fiery energy.' श्रीवासरम्यं—Analyse श्रियो वासः श्रीवासः तेन रम्यः श्रीवासरम्यः तं, 'Pleasing or agreeable by having an abode of the goddess of wealth.' आसक्तगतैः —Analyse गतानि (गतान् देशान्) आसक्तानि आसक्तगतानि तैः तादृशैः, 'Attached or clung to the places behind (in its onward motion)'. आशीयं = दिक्संबंधि, 'Belonging or pertaining to a quarter.' आसक्तगतैर्यशोभिः धूपैरिव आशीयमन्तं सुरभीचकार— 'Consuming a Turkish king, inviting (or attractive) by his treasury, (*lit.* abode of wealth) by fire under the plea (or semblance) of his lustrous energy, he, like aromatic fumes, made the end of the quarter sweet-smelling by means of his fame, attached to the places already visited in its onward march (or motion).'

St. 21. परेषु°—Construe युधि अस्य [दशरथस्य] परेषुवात्यापरिबृंहितः क्रोधाभिधानश्चित्रभानुः रिपुकामिनीनामाताम्रनेत्रच्युतवारिवर्षैः शान्तिमानायि. परेषु°— Analyse इषूणां बाणानां वात्या इषुवात्या । पराणां शत्रूणां या इषुवात्या परेषुवात्या तया परिबृंहितः परिवर्धितः परेषुवात्यापरिबृंहितः, 'Swollen (*lit.* grown) by the storm (or volleys) of darts discharged by the enemies.' क्रोधाभिधानः—Analyse क्रोधः अभिधानं यस्य, 'Going by the name of wrath.' चित्रभानुः Expl:—चित्राः भानवोऽस्य, 'Possessing rays or sparks of variegated colour i. e. fire.' आताम्र°—Analyse आताम्राणि आरक्तानि नेत्राणि चक्षूंषि तेभ्यः च्युतानि गलितानि वारीणां बाष्पाणां वर्षाणि धाराः तैः तादृशैः, 'By means of showers of tears dropped down from their reddish eyes.' रिपुकामिनीनाम्—Analyse रिपूणां कामिन्यः रिपुकामिन्यः तासां 'Lovely fair ones of enemies.' रिपुकामिनीनामाताम्रनेत्रच्युतवारिवर्षैः शान्तिमानायि— 'In the battle the fire, going by the name of wrath, swollen (or terribly raged) by the storm (or volleys) of arrows discharged by his enemies, was quenched down by the showers of tears poured down from the reddish eyes of the lovely fair ones of the enemies.'

St. 22. तस्य--Construe आलोकभूमौ एकबाणासनभग्नशत्रोः तस्य चरणारविन्दे सर्वनरेन्द्रमौलिरत्नप्रभालक्तकमण्डनान्यासेदतुः. एक°—Analyse बाणाः अस्यन्ते क्षिप्यन्ते अनेनेति बाणासनं धनुः । एकं च तद् बाणासनं च एकबाणासनं तेन भग्नः शत्रुर्येन स एकबाणासनभग्नशत्रुः तस्य तादृशस्य, 'Who has routed or vanquished the foe by a single bow.' आलोकभूमौ = आस्थानमण्डपे 'In the audience hall'. चरणारविन्दे—Analyse चरणौ एव अरविन्दे चरणारविन्दे or चरणौ अरविन्दे इव, 'Lotus-like feet (two)'. सर्व°—Analyse सर्वे च ते नरेन्द्राश्च सर्वनरेन्द्राः समस्तनृपाः तेषां मौलयो मुकुटाः तेषु यानि रत्नानि तेषां

प्रभैव आलक्तकमण्डनानि सर्वनरेन्द्रमौलिरत्नप्रभालक्तकमण्डनानि, 'The decorations of lac made by the brightness of jewels set on the crowns of all kings.' तस्य चरणारविन्दे सर्वनरेन्द्रमौलिरत्नप्रभालक्तकमण्डनान्यासेदुः—' The lotus-like feet of him who had routed (or vanquished) the foe by a single bow received, in the audience hall, the decorations of lac made by the brightness of jewels set on the crowns of all kings '.

St. 23. लोकः Construe हारगौरे तदीये कीर्तिप्रताने [यशोनिचये] भुवि प्रविजृंभमाणे [प्रवर्धमाने सति] लोकः कुमुदमभिन्नकोशं निरीक्ष्य चंद्रोदयशंकितानि मुमोच. हारगौरे—Analyse हारवद् गौरः शुभ्रः हारगौरः तस्मिन्, 'White like a garland '. कीर्तिप्रताने—Analyse कीर्तिरूपः प्रतानः प्रचयः कीर्तिप्रतानः तस्मिन्, 'An unbounding expanse of his fame'. प्रविजृंभमाणे = प्रवर्धमाने, 'Rapidly expanding or spreading'. The epithet should be construed here as a predicate. अभिन्नकोशं—Analyse अभिन्नः कोशः यस्य तत्, ' With its cup (of a bud) not opened'. चंद्रोदयशंकितानि—Analyse चन्द्रस्य उदयः चन्द्रोदयः तस्य शंकितानि चन्द्रोदयशंकितानि, ' Doubt as regards the rise of the moon '. लोकः कुमुदमभिन्नकोशं निरीक्ष्य चन्द्रोदयशंकितानि मुमोच—'After having seen the buds of the moon-lotuses not burst open, the people left (all) doubts as regards the rise of the moon, when the unbounding expanse of his fame, white like a garland, was rapidly spreading over the land '. The bright splendour of his fame exactly looked like the moonlight to the naked eye and the people were led to think that that light was no other than the moonlight and hence they actually went to see whether the moon lotuses were opened.

St. 24. समस्त°—Construe तस्य उन्नतवृत्ति तेजः समस्तसामन्तनृपोत्तमांगान्यध्यास्य चूडागतपद्मरागरागच्छटाविस्फुरणच्छलेन जज्वाल. समस्त°—Analyse समस्ताश्च सामन्तनृपाश्च समस्तसामन्तनृपाः । उत्तमानि च तानि अंगानि च उत्तमांगानि । समस्तसामन्तनृपाणां उत्तमांगानि समस्तसामन्तनृपोत्तमांगानि, 'The highest or the chief part of the body of all vassal kings (i. e. their heads)'. उन्नतवृत्ति—Analyse उन्नता वृत्तिर्यस्य तत्, ' Of an elevated career '. ' Of a sublime or majestic character '. चूडा°—Analyse चूडागताः मौलिलग्नाः ये पद्मरागाः लोहितकाः तेषां रागच्छटानां रश्मिप्रवाहाणां । अथ वा । वर्णप्रसराणां विस्फुरणच्छलेन विस्फूर्तिच्छद्मना, ' under the plea (or semblance) of tremulous flashes proceeding from a stream of rays (or unimpeded course of bright colour) of the rubies set on their crowns.' तस्य तेजः चूडागतपद्मरागरागच्छटाविस्फुरणच्छलेन जज्वाल—' His fiery energy of a sublime character, having settled on the heads of all vassal kings, began to glow forth (or blaze up) under the

plea of tremulous flashes proceeding from a stream of rays of the rubies set on their crowns .'

St. 25. नरेन्द्रचन्द्रस्य—Construse महीमण्डलमण्डनस्य नरेन्द्रचन्द्रस्य तस्य यशोवितानज्योत्स्ना अरिनारीनयनेन्दुकान्तनिष्यन्दहेतुः [सन्] भुवनं ततान. नरेन्द्रचन्द्रस्य —Analyse नरेन्द्राणां चन्द्रः नरेन्द्रचन्द्रः तस्य, 'Of him who was the chief of kings.' यशोवितानज्योत्स्ना—Analyse यशोरूपं वितानं उल्लोचः यशोवितानं तस्य ज्योत्स्ना कौमुदी यशोवितानज्योत्स्ना, 'The moonlight proceeding from the expansive heavenly vault of his fame.' महीमण्डलमण्डनस्य—Analyse महीमण्डलस्य मण्डनं यस्मात् स महीमण्डलमण्डनः तस्य तादृशस्य, 'An ornament or decoration to the circumference of the earth or to the whole earth.' अरिनारीनयनेन्दुकान्तनिष्यन्दहेतुः—Analyse अरीणां वैरिणां नार्यः कामिन्यः तासां नयनान्येव नेत्राण्येव इन्दुकान्ताः चन्द्रकान्तमणयः तेषां निष्यन्दस्य प्रस्रवणस्य हेतुः, 'An object (or cause) of the flowing of the moon-gems consisting of (or made of) the eyes of the young women of his enemies.' तस्य यशोवितानज्योत्स्ना भुवनं ततान,—'The moonlight proceeding from the expansive heavenly vault, made out of fame, of him, who was the chief of kings, and an ornament of the whole earth, spread over the world becoming (at the same time) a cause of the flow of moon-gems made of the eyes of the young women of his enemies.'

St. 26. माता—Construe भवतुल्यधाम्नः इन्द्रद्विषद्भर्तृनिषूदनस्य माता भवित्री विधेया [सा] तेन समयं विदित्वा वह्नेः समक्षं त्रिविधवदुपयेमे. भवतुल्यधाम्नः Analyse भवस्य ईश्वरस्य तुल्यं सदृशं धाम तेजो वपुर्वा यस्य स भवतुल्यधामा तस्य, 'Having a bodily strength or bodily splendour resembling that of the Supreme Being.' 'Having a fiery energy equal to that of the Supreme Being.' इन्द्रद्विषद्भर्तृनिषूदनस्य—Analyse इन्द्रस्य द्विषद् इन्द्रद्विषद् रावणपुत्रो मेघनादः तस्य भर्ता दशकण्ठः तं निषूदयतीति (युधि) हन्तीति इन्द्रद्विषद्भर्तृनिषूदनो रामः तस्य तादृशस्य, 'Of the killer in a battle of the sire of the enemy of इन्द्र (i. e. राम).' इन्द्र *m.*—Was the king of heaven and the lord of gods. It is supposed that any body, a god, a man, a giant, can raise himself to the position of Indra by performing a hundred horse sacrifices. Indra is, therefore, represented as being jealous of one who performs one hundred sacrifices and as trying to dissuade him from his object either personally or by the intervention of the nymphs of his court. He is known as the paramour of Ahalyá, the wife of गौतम, whom he once ravished. Gautama's curse on this account produced hundreds of sores in the body of इन्द्र, but these were afterwards changed into so many eyes (सहस्रनेत्र). He is described to have stolen the horse consecrated

by the king सगर, who was about to perform the horsesacrifice for the hundredth time. He is said to have killed वृत्र and बल. The former of these was a ब्राह्मण and इन्द्र had to sacrifice till he purged away his sin. It was he who cut down the wings of the mountains that once flew about to the great annoyance of the people. He is the god of rain. समयं विदित्वा—'Knowing the proper time. 'Knowing the right moment or proper season'. विधेया=विनयग्राहिणी, Expl:—प्रवृत्तौ निवृत्तौ वा विनयं ग्रहीतुं शीलमस्याः, 'Preserving a refined character (or nature) both in the active or passive life'. 'modest', वह्नेः समक्षं—'In the presence of the sacred fire.' वह्नेः समक्षं तेन विधिवदुपयेमे—'Knowing the proper season he, in presence of the sacred fire, married, agreeably to rules, an obedient princess who was to become the mother of the killer of the sire of the enemy of Indra (i. e. Ràma) and the possessor of bodily strength (or bodily splendour) like that of the Superme Being.'

St. 27. महेन्द्रकल्पस्य—Construe महेंद्रकल्पस्य [महेंद्रतुल्यस्य, महेन्द्रादीषदून-स्येति यावत्] देव्याः कृताभिषेकायाः स्फुरन्मयूखा स्फुरत्किरणा नखानां सरणिः पंक्तिः जितपद्मकोशे प्रच्छादितपद्मकुड्मले पादद्वयान्ते महाय पूजायै मुक्ता प्रक्षिप्ता मुक्तावितितिरिव मौक्तिकपंक्तिरिव विरेजे शुशुभे. महेन्द्रकल्पस्य Expl:—महे-न्द्रादीषदूनस्य, 'Almost like or nearly equal to great Indra'. स्फुरन्मयूखाः —Analyse स्फुरन्तः मयूखाः यस्यां सा, 'Having the rays flashing forth.' पादद्वयान्ते—Analyse पादद्वयस्य अन्तः पादद्वयान्तः तस्मिन्, 'On the extremity of her feet.' जितपद्मकोशे—Analyse जितः पद्मानां कोशो येन स जितपद्मकोशः तस्मिन्, 'Which has eclipsed the cup of the bud of lotuses.' मुक्तावितति: Analyse मुक्तानां विततिर्मुक्तावितातिः, 'A collection of pearls.' 'A quantity of pearls.' जितपद्मकोशे पादद्वयान्ते मुक्ता मुक्तावितितिरिव विरेजे—'With its rays flashing forth, the line of the nails of the queen, the wife of him, who was almost like or nearly eqnal to great Indra, shone forth like a quantity of pearls thrown, for worship, on extremity of the her feet, which had eclipsed the cup of the buds of lotuses'.

St. 28. लीला—Construe अत्र अस्मिन् जंघायुगले गतेर्लीला गतिविलासो निसर्गसिद्धा स्वभावसिद्धा एवास्ति । न तु मत्तो दंती गजो मुषितश्रोरितः । नापि हंसः चक्रांगो मुषितश्रोरितः । इतीव तदेतदेव [जनान् सत्यापयितुमिव] तदीयं तस्याः कौसल्यायाः जंघायुगलं प्रसूतायुग्मं तुलाकोट्यधिरोहणानि चक्रे. निसर्गसिद्धा-Analyse निसर्गात् सिद्धा निसर्गसिद्धा, 'Acquired by nature,' 'born of nature,' 'nature-born'. Appropriate to nature.' *Cf.* Uttar. I. 14. "नैसर्गिकी

सुरभिणः कुसुमस्य सिद्धा." जंघायुगलं—Analyse जंघायाः युगलं जंघायुगलं, 'A pair of legs from ankle to knee.' 'A calf of the leg'. तुलाकोट्यधिरोहणानि —Analyse तुलाकोटेः अधिरोहणानि तुलाकोट्यधिरोहणानि, 'Mounting on a balance scale.' or 'Act of putting himself to the test of an ordeal.' अत्र गतेर्लीला निसर्गसिद्धा एवास्ति न तु मत्तो दंती मुषितो नापि हंसः 'The sportiveness of gait that was manifested there (i. e. in the calves of her legs) was acquired by nature. It was not robbed of a maddened elephant nor of a swan' इतीव तदीयं जंघायुगलम् तुलाकोट्यधिरोहणानि चक्रे,—'And, in this way, in order to declare it to be true, the pair of the calves of her legs ascended the scale of a balance or underwent the test of an ordeal.' The poet means that the जंघायुगलं itself became the standard of comparison.

St. 29. दृष्टौ—Construe तयोः ऊरुद्वयोः दृष्टौ सत्यां दर्शने सति । "दृष्टिर्ज्ञानेऽक्ष्णि दर्शने" इत्यमरः । मन्मथबाणपातैः मारशरावपतनैः [विधातुः] चक्षुः नेत्रद्वयं हतं विद्धं स्यात् । नोचेत् । चक्षुर्निमील्य पिधाय विधातुं निर्मातुं न शक्यं । तर्हि विधात्रा ब्रह्मणा तौ ऊरू कथं कृतौ निर्मितौ नु । इति तस्यां सुमतेर्वितर्कः आस. मन्मथबाणपातैः—Analyse मन्मथस्य बाणाः मन्मथबाणाः तेषां पाताः मन्मथबाणपाताः तैः 'By the descent of Cupid's arrows'. शक्यं—Goes with ऊरू though differing in gender. Such consruction is often seen in Kàlidása's works as well as in the works of classical authors of Sanskrit. *Cf.* S'a. III. 60. "शक्यमरविन्दसुरभिः कणवाही मालिनीतरंगाणाम् । अंगैरनंगतप्तैरविरलमालिंगितुं पवनः." Vámana in his अलंकारसूत्रवृत्ति gives the following remark:—"शकिसहोश्चेति कर्मणि यति कृते शक्यमिति रूपं भवति । विलिंगवचनस्यापि विरुद्धलिंगवचनस्यापि, कर्माभिधाने सामान्योपक्रमाद्विशेषानपेक्षायामिति । यथा, 'शक्यमोषधिपतेर्नवोदयाः कर्णपूररचना कृते तव । अप्रगल्भयवसूचिकोमलाश्छेत्तुमग्रनखसंपुटैः कराः ॥' अत्र भाष्यकृद्वचनं लिङ्गं यथा । शक्यं च श्वमांसादिभिरपि क्षुत्प्रतिहन्तुमिति । न चैकान्तिकः सामान्योपक्रमः । तदाह । 'शक्या भंक्तुं झटिति बिसिनीकन्दवच्चन्द्रपादाः' इत्यपि भवति". No doubt the poet has closely imitated Kálidása and he was tempted to bring the genderless use of शक्यं in one of the stanzas of his Kávya. And on this ground the reading of our Tála-leaf Ms. A. appears to us the genuine reading of the poet. The verse is rather difficult and the interpretations of the stanza in question may also differ in various ways. The difficulty of interpreting the stanza will, in our opinion, be removed if we were to prefer the reading of our Tàla-leaf Ms. B. दृष्टौ सत्यां मन्मथबाणपातैश्चक्षुर्हतं स्यात्—'If the Creator's eyes were to look at them, they would be smitten

with (or hit by) the descent of love's arrows :' चक्षुर्निमील्य विधातुं न शक्यं—' Were he to close his eyes he could not create.' विधात्रा तौ ऊरू कथं नु कृतौ—'How then did the Creator frame her thighs: ' इति तस्यां सुमतेर्वितर्कः आस—' Thus were the wise at fault about her (creation).' There is indeed in fact a poetical syllogism (काव्यप्रतिज्ञा) in due form, and a rendering, in effect the same, as given above. An intelligent man can reasonably doubt how the Creator could have framed her thighs: he could not do it without shutting his eyes, since if he looked he would have been at once hit by the arrows of love and with eyes shut, he could not, of course, proceed with the work. I owe the above rendering of the passage to our distinguished Sanskritist, Pandit Vásudeva S'ástri Abhyankar of the Fergusson College, Poona, with whom I discussed the knotty points of the verse in question.

St. 30. तया—Construe तस्य पृथुत्वं तया तथा हृतं यथा मध्यं अतिक्षयिष्णु अभवत् । इति पुनर्वृद्धिनिषेधहेतोः श्रोणी रशनागुणेन बद्धा इव. अतिक्षयिष्णु *adj.*—Expl, अतिशयितं क्षयशीलं अतिक्षयिष्णु, 'Very thin or slender.' *Cf.* Pâṇi. III—2—136. " अलंकृञ्निराकृञ्प्रजनोत्पचोत्पतोन्मदरुच्यपत्रपवृतुवृधुसहचर इष्णुच्,' The affix इष्णुच् comes after the following verbs in the sense of ' agents having such a habit &c,' as अलंकरिष्णुः 'decorating,' निराकरिष्णुः 'repudiating,' प्रजनिष्णुः 'procreating,' उत्पचिष्णुः 'apt to ripen,' उत्पतिष्णुः 'flying,' उन्मदिष्णुः 'mad,' रोचिष्णुः 'bright,' अपत्रपिष्णुः 'bashful,' वर्तिष्णुः 'revolving,' वर्द्धिष्णुः ' growing,' सहिष्णुः 'patient,' and चरिष्णुः 'moveable.' रशनागुणेन—Analyse रशनायाः गुणः तेन तादृशेन, ' By the band of the girdle.' 'By the string of the zone.' वृद्धिनिषेधहेतोः—Analyse वृद्धेः निषेधः वृद्धिनिषेधः तस्य हेतोः 'With the object of preventing the growth again.' तस्य पृथुत्वं तया तथा हृतं यथा मध्यं अतिक्षयिष्णु अभवत्--'She arrested its growth (*lit.* development) in such a way that her waist became very thin (or slender)'. इति पुनर्वृद्धिनिषेधहेतोः श्रोणी रशनागुणेन बद्धा इव—'With this idea her loins were girdled up, as it were, by a band (or string) of her zone in order to prevent their further growth.' Mark the expressions गुण, वृद्धि and निषेध probably terms from Pâṇini.

St. 31. अस्य—Construe भुवनत्रयेऽपि अस्योदरस्य प्रतितुल्यशोभं किमपि नास्तीति धात्रा संख्यानरेखाः इव संप्रयुक्ताः सुदत्याः तिस्रो वल्यो विरेजुः. प्रतितुल्यशोभं—Analyse प्रतितुल्या शोभा यस्य तत्, ' Having a parallel beauty.' Goes with किमपि suppressed in the verse. भुवनत्रये—Analyse भुवनानां त्रयं भुवनत्रयं तस्मिन्, 'In three worlds.' संख्यानरेखाः—Analyse संख्यानस्य रेखाः संख्यानरेखाः, ' The lines of enumeration,' Enumerating streaks.'

In this compound the expression संख्यान appears to have been used particularly with a significant motive. For, the Creator, it appears, made a search for its parallel beauty in the first world, where he did not find it. He then pushed forth his search in the second, where too he did not see a counterpart of the beauty of that belly. He, at last, continued his search in the third world, but there also he was disappointed. And in this way the propriety of the expression may be accounted for as there are भुवनत्रय and तिस्रो वलयः in the verse. सुदत्याः—Analyse शोभनाः दन्ताः यस्याः सा सुदती तस्याः 'Having a beautiful set of teeth.' वलयः—The natural lines or folds of skin over the navel (especially of beautiful women). विरेजुः—'Beamed wih brightness.' धात्रा संख्यानरेखाः इव संप्रयुक्ताः सुदत्याः तिस्रो वलयो विरेजुः—'With the idea that there exists no second counterpart of a like or equal beaty to that belly even in three worlds, the three natural folds of the lady having a beautiful set of teeth, began to beam with brightness as if they were the lines of enumeration gracefully streaked on it by the Creator.'

St. 32. वयःप्रकर्षात्—Construe वयःप्रकर्षाद् उपचीयमानस्तनद्वयस्य उद्वहनश्रमेण वनजायताक्ष्याः मध्यः अत्यन्तकार्श्यं जगाम इत्येष मम तर्कः. वयःप्रकर्षात्—Analyse वयसः प्रकर्षः वयःप्रकर्षः तस्मात्, 'From a developed condition (or excellence) of age'. 'On account of the advancement of age.' उपचीयमानस्तनद्वयस्य—Analyse स्तनयोः द्वयं स्तनद्वयं। उपचीयमानं यत् स्तनद्वयं उपचीयमानस्तनद्वयं तस्य, 'A developed pair of breasts.' 'Breasts in the process of being developed.' अत्यन्तकार्श्यं—Analyse अन्तं अतिक्रान्तं अत्यन्तं। अत्यन्तं च कार्श्यं च अत्यन्तकार्श्यं, 'Excessive thinness.' 'Past a proper end or limit of emaciation.' वनजायताक्ष्याः—Analyse वने उदके जाते वनजे नीलोत्पले ते इव आयते अक्षिणी यस्याः सा, 'Having long eyes like a pair of blue lotus-flowers.' वनजं—नीलोत्पलं. 'A blue lotus-flower.' मम—Refers to the poet. For वयः प्रकर्षात्, उपचीयमान° and उद्वहनं &c. *Cf.* वपुःप्रकर्षात् R. III-34. "प्रचीयमानावयवा" R. III-7. and "आपीनभारोद्वहनप्रयत्नात्" R. II-18. उद्वहनश्रमेण—Analyse उद्वहनस्य श्रमः उद्वहनश्रमः तेन उद्वहनश्रमेण, 'Labour of carrying or lifting up.' वनजायताक्ष्याः मध्यः अत्यन्तकार्श्यं जगाम इत्येष मम तर्कः—'It is our idea that the waist of the lily-eyed lady became excessively thin (or emaciated) on account of the labour of carrying up her breasts developed along with the advancement (or excellence) of her age.'

St. 33. अरालकेश्याः—Construe अरालकेश्याः विधात्रा विधीयमाने अलके चलत्तूलिकाग्रात् च्युतस्य आसितस्य बिन्दोः मार्गरेखा इव नवरोमराजी रेजे. अरालकेश्याः—

Analyse अराला कुटिला अत एव सुन्दराः केशा यस्यास्तस्यास्तथोक्तायाः, 'Of a curled-haired damsel.' *Cf.* R. VI. 81. "भित्त्वा निराकामदरालकेश्याः." चलत्तूलिकाग्रात्—Analyse चलं तरलं तूलिकायाः आलेख्यकूर्चिकायाः अग्रं तस्मात्, 'From the foremost point of the painter's brush that was shaking (or unsteady).' मार्गरेखा—Analyse मार्गस्य रेखा मार्गरेखा, 'A line or streak of the path'. नवरोमराजी—Analyse नवानि च तानि रोमाणि च नवरोमाणि तेषां राजी पंक्तिः 'A line or row of fresh hair,' 'a streak of fresh hair (on the abdomen of beautiful women just above the navel, said to be a sign of puberty).' चलत्तूलिकाग्रात् च्युतस्य असितस्य बिन्दोः मार्गरेखेव नवरोमराजी रेजे—'When the hair of that curled-haired damsel were in the process of being framed by the Creator, the row of fresh hair looked splendid, as if, it were a line (or streak) of the path of a drop of the black-fluid which had fallen down from the extremity of the painter's brush that was shaking'.

St. 34. नायं—Construe अयं शशी न [किन्तु] तत्प्रतितुल्यं अन्यत् किमपि यस्मात् नौ द्वयं न विश्लेषयति । इति तर्कादिव तौ कुचचक्रवाकौ तस्याः मुखेन्दुं पश्यतः स्म । मुखेन्दुं–Analyse मुखमेव इन्दुः मुखेन्दुः तं. 'The moon-face,' 'the moon in the form of the face.' कुचचक्रवाकौ—Analyse कुचौ एव चक्रवाकौ कुच-चक्रवाकौ 'Breasts in the form of Chakraváka birds.' इति तर्कादिव तौ कुचचक्रवाकौ तस्याः मुखेन्दुं पश्यतः स्म—'This is not the moon but some other object equal in merits to him; for it does not cause us both to be ever disunited : with this idea, as it were, those Chakraváka birds in the form of her breasts used to look at the moon in the form of her face.'

St. 35. निर्जिग्यतुः—Construe सुश्लिष्टसंधी शुभविग्रहौ तन्व्याः तौ भुजौ यदि सच्छिद्रवृत्तं दीर्घसूत्रं बालमृणालनालं निर्जिग्यतुः तत्र किं किल चित्रं. बालमृणाल-नालं—Analyse मृणालस्य नालं मृणालनालं । बालं च मृणालनालं च बालमृणालनालं, 'A stalk of a fresh lotus.' Mark the wellknown plays upon the following words. सच्छिद्रवृत्तं—Analyse छिद्रैः सहितं सच्छिद्रं । सच्छिद्रं च तद् वृत्तं च सच्छिद्रवृत्तं, 'Having a porous and round form.' It also means 'of a blemished character,' of a bad conduct,' (सदोषचारित्रं). दीर्घसूत्रं—Analyse दीर्घाणि सूत्राणि यस्य तत्, 'Having long fibers in the interior of a lotus cup.' It also means 'dilatory,' 'slow,' 'tedious,' (चिरक्रियं)। सुश्लिष्टसंधी—Analyse सुश्लिष्टाः संसक्ताः संधयः जत्रुकफोणिमणिबंधादयः ययोः तौ, 'Having well-built joints.' 'Having joints gracefully framed in a symmetrical proportion.' The compound may also mean, 'Having a treaty of peace minutely embracing all political expedients.' शुभविग्रहौ—Analyse शुभौ विग्रहौ ययोस्तौ, 'Having beauti-

ful fingers (organs);' or 'having a graceful expanse.' It also means, 'with an extraordinary quality, or energy of military tact.' तन्व्यास्तौ भुजौ यदि बालमृणालनालं निर्जिग्यतुस्तत्र किं किल चित्रं,—'What wonder is there if indeed those arms of that delicate lady having joints gracefully framed, with beautiful palms and fingers, excelled the stalk of a fresh lotus having a porous and round form, with long fibers in the interior of the lotus cup.'

St. 36. कान्तिप्रकर्ष—Construe संध्याघने बद्धपदं कान्तिप्रकर्षं दशनच्छदेन हरन्त्याः तस्याः गृहोद्यानसरोगतस्य अंबुरुहस्य रागो हस्तस्थः एव. कान्तिप्रकर्ष—Analyse कान्तेः प्रकर्षः कान्तिप्रकर्षः तं, 'Excellence of beauty.' 'Eminence or superioricy in loveliness.' दशनच्छदेन—Analyse दशनानां छदः दशनच्छदः तेन, 'By means of the covering of the teeth i. e by means of the lips.' संध्याघने—Analyse संध्यायाः घनः संध्याघनः तस्मिन्, 'On a cloud making its apperence at twilight.' बद्धपदं Analyse बद्धं पदं येन स बद्धपदः तं, 'Which has set its foot on,' or 'having its foot fixed on.' गृहोद्यानसरोगतस्य—Analyse गृहस्य उद्यानं गृहोद्यानं तस्मिन् सरः गृहोद्यानसरः तत्र गतः तस्य, 'Belonging to the lake situated in the garden of her palace.' गत 'gone', when used at the end of compounds, does not necessarily imply motion; it not unfrequently expresses 'relationship,' 'connection,' 'position' &c. *Cf.* S'á. I. वयमपि तावद्भवत्यौ सखीगतं किमपि पृच्छामः "We too, ask you, maidens, a few particulars respecting (about) your friend." S'a. IV. भर्तृगतया चिन्तयात्मानमपि नैषा विभावयति, "She does not pay any attention even to herself, owing to her (being deeply absorbed in) thinking about her husband." Mál. I. आं स जनो देव्याः पार्श्वगतश्चित्रे दृष्टः "Oh, she was seen by the side of the queen, in a picture. &c." हस्तस्थः—Analyse हस्ते तिष्ठतीति हस्तस्थः, 'Staying in the hand,' 'being in hand,' 'held,' 'grasped,' i. e. 'in one's own power or subjection,' 'self-dependent.' By this epithet the redness of the palm of her hands as well as her lips is indicated. अंबुरुहस्य—Analyse अंबुनि रोहतीति अंबुरुहः तस्य. 'Growing in water.' 'A waterlily.' 'A lotus.' कान्तिप्रकर्षं हरन्त्यास्तस्याः अंबुरुहस्य रागः हस्तस्थः एव,—'She who stole away (i. e. inherited) the excellence of beautiful splendour that had set its foot (or settled) on an evening (dry) cloud, by her red lips, had already in her hand the red hue of the water-lily belonging to (i. e. which had grown in) the garden lake of her palace.'

St. 37. आसीत्—Construe भासुरस्य तद्वक्त्रचंद्रस्य चन्द्रमसश्चायं विशेषः आसीत्। [यत्] पूर्वः सकलं कुरंगं बिभर्ति द्वितीयस्तु तस्यैव [कुरंगस्य] नेत्रद्वितयं बिभर्ति. तद्वक्त्रचन्द्रस्य-Analyse तस्याः वक्त्रं तद्वक्त्रं तदेव चन्द्रः तस्य, 'Her moon-

face.' 'The moon of her face.' सकलं—Analyse कलाभिः सहवर्तमानः सकलः तं तथोक्तं 'With all his digits'; 'having his entire form.' Goes with कुरंगं. कुरंगः 'A deer." The moon is supposed to bear the mark of a black deer on her surface. नेत्रद्वितयं—Analyse नेत्रयोः द्वितयं नेत्रद्वितयं तद् तादृशं, 'A pair of eyes.' पूर्वः सकलं कुरंगं बिभर्ति द्वितीयस्तु तस्यैव नेत्रद्वितयं—'This was the only difference (विशेषः) between the moon and the bright face moon of hers that the former (पूर्वः) bore a mark of the entire form of a black deer while the latter (द्वितीयः) simply a pair of eyes of that deer (of the moon).'

St. 38. कांतिश्रिया—Construe कांतिश्रिया निर्जितपद्मरागं मनोज्ञगंधं द्वयमेव [लोके] शस्तं। जलेषु नवप्रबुद्धं जलजं स्थलेषु [च] तस्याः वदनारविन्दं. कान्तिश्रिया—Analyse कान्तेः श्रीः कान्तिश्रीः तया कान्तिश्रिया शोभासंपत्त्या, 'By reason of the excellence of beauty.' निर्जितपद्मरागं—Analyse निर्जितः पद्मरागो मणिविशेषो येन तत्, 'Which has eclipsed a gem called ruby,' मनोज्ञगन्धं—Analyse मनोज्ञो मनोहरो गन्धो यस्य तत्, 'Having an agreeable smell.' 'Of a sweet smell.' नवप्रबुद्धं Analyse नवं च तद् प्रबुद्धं च नवप्रबुद्धं, 'Newly opened.' 'Lately opened.' जलजं—Analyse जले जातं जलजं, 'A lotus.' वदनारविन्दं—Analyse वदनमेव अरविन्दं वदनारविन्दं, 'Lily like face.' जलेषु नवप्रबुद्धं जलजं स्थलेषु तस्याः वदनारविन्दं द्वयमेव शस्तं—'Two things only excelling the gem called ruby by the excellence of beauty and possessing a sweet smell were said to be most praiseworthy (in the world); the newly opened lotus in waters and her lotus-like face on land.'

St. 39. इन्दीवरस्य—Construe इन्दीवरस्य अस्याः नेत्रोत्पलस्यापि एतदन्तरं। यतः एकं हिमांशोः त्विषोऽपि न सहते। अपरं मुखाख्यं शशांकं आक्रम्य तस्थौ. नेत्रोत्पलस्य—Analyse नेत्रे एव उत्पलं नेत्रोत्पलं तस्य. 'Eyes in the form of a lotus.' इन्दीवर and उत्पल belong to one and the same class of blue lotuses known as कुवलय. But here the poet refers to them as the sun lotuses. कुवलयं चंद्रविकासि, पद्मं तु सूर्यविकासि, इत्यनयोर्भेदः। इन्दीवर is derived from the root इन्द् I. P. सेट्. *Cf.* इन्दी लक्ष्मीः। तस्या वरमिष्टम्॥ Pandit Bandhyopádhyáya has the following remark on the word आक्रम्य, "इहाक्रम्यपदेन नेत्रयोर्विशालता व्यज्यते। इन्दीवरपदं प्रकृते कमलाभिप्रायेण कुमुदजातेश्चन्द्रबन्धुत्वात्." हिमांशोः—Analyse हिमाः अंशवः यस्य स हिमांशुः तस्य, 'Of the moon.' मुखाख्यं—Analyse मुखं आख्या यस्य स मुखाख्यः तं, 'Going by the name of face.' शशांकं—Analyse शशः अंके यस्य शशांकः तं तादृशं, 'Bearing the mark of a hare, i. e. the moon.' यतः एकं हिमांशोः त्विषोऽपि न सहते। अपरं मुखाख्यं शशांकमाक्रम्य तस्थौ—'This is the difference between the lotus flower and also

the lotus in the form of her eye that the former (एकं) does not bear even the splendonr of the moon, while the latter (अपरं) remains pervading the moon, known by the name of face.'

St. 40. युग्मं—Construe असितलोचनायाः भ्रुवोर्युग्मं चञ्चलजिह्मपक्ष्मसंपर्कभीत्या प्रोन्नम्य दूरोत्सरणं विधित्सु मध्येन तस्थौ इति मे वितर्कः. चञ्चल°—Analyse चञ्चलानि च जिह्मानि च चञ्चलजिह्मानि तानि पक्ष्माणि चञ्चलजिह्मपक्ष्माणि तेषां संपर्काद् भीतिः चञ्चलजिह्मपक्ष्मसंपर्कभीतिः तया, 'From fear of receiving the contact (or association) of unsteady and squinting (or crooked) eyelashes.' The implied sense of the expression चञ्चल is, 'fickle,' 'libertive'; that of जिह्म is 'false,' 'dishonest,' 'deceitful,' 'morally crooked' &c.; and that of पक्ष्मन् is, 'hair,' these have generally a croocked form, hence it may mean, crooked by nature. असितलोचनायाः—Analyse असिते कृष्णे लोचने नयने यस्याः सा तस्यास्तथोक्तायाः, 'Of the dark-eyed lady.' प्रोन्नम्य *ger.*—उत्थाय, 'Having got up,' 'having risen up,' 'raising itself up.' दूरोत्सरणं—Analyse दूरं उत्सरणं दूरोत्सरणं, 'Keeping itself at a long (or respectable) distance.' भ्रुवोर्युग्मं—'A pair of eyebrows.' इति मे वितर्कः—'This is what I think of it.' 'This is my idea of it.' मध्येन तस्थौ Expl:—मध्येन मध्यभागेन तस्थौ उत्थितं बभूव, 'Stood up by the middle part.' 'Raised itself up by the middle curve.' It means that both the extremities of the eyebrows remained fixed or firm in their usual position, while the middle line of the eyebrow curve stood higher, i. e. had prominently risen up (making of course a graceful digit of the crescent moon or the beautiful curve of a rainbow; thus carefully avoiding the contact or association of the squinting eyelashes). The Sanskrit poets generally describe the beauty of eyebrows as having a graceful form or shape similar to that of a rain-bow or the digit of the crescent moon. भ्रुवोर्युग्मं चञ्चलजिह्मपक्ष्मसंपर्कभीत्या प्रोन्नम्य दूरोत्सरणं विधित्सु मध्येन तस्थौ.—'From fear of coming into contact with the unsteady and squinting eyelashes, the pair of the eyebrows of that dark-eyed queen rose up and with a desire of keeping itself at a long distance did stand up by the middle line (or curve); this is my idea of it.' This is also one of the difficult or knotty verses of the poem. And the above explanation may serve for the gist of the verse.

St. 41. तत्केश°—Construe तत्केशपाशावजितात्मबर्हभारस्य शिखिनो वनेषु वासः " तिरश्चामपि चेतो जातु लज्जां स्पृशति " इति जनस्य शंकां चक्रे. तत्केश°—Analyse तस्याः कोसलराजपुत्र्याः केशानामलकानां पाशैरवजितः अधरीकृतः आत्मनो बर्हाणां पक्षाणां भारो यस्य तस्य तादृशस्य, 'Whose cluster (*lit.* burden)

of feathers was eclipsed (or surpassed) in beauty by her ornamental braid of hair.' शिखिनो वनेषु वासः—'The abode of peacocks in forests.' तिरश्चामपि चेतो जातु लज्जां स्पृशति—'The mind even of lower animals may perhaps entertain (*lit.* touch) the feeling of shame.' *Cf.* Ku. I. 48. "लज्जा तिरश्चां यदि चेतसि स्यादसंशयं पर्वतराजपुत्र्याः । तं केशपाशं प्रसमीक्ष्य कुर्युर्वालप्रियत्वं शिथिलं चमर्यः ॥" इति जनस्य शंकां चक्रे—'Such was the doubt that crossed the mind of the people.' तिरश्चामपि चेतो जातु लज्यां स्पृशति इति जनस्य शंकां चक्रे,—"The mind even of the lower animals may, perhaps, brood on the feeling of shame;" 'such, in fact, was the doubt that was passing in the minds of the people on seeing the forest abode of peacocks whose cluster of feathers was eclipsed in beauty by her ornamental braid of hair.'

St. 42. अन्या—Construe जितसिद्धकन्या तादृग्गुणा अन्यापि कन्या तस्य देवी बभूव । यस्याः दोषोऽपि भुवनत्रयस्य रक्षोभयनाशहेतुर्बभूव. जितसिद्धकन्या—Analyse जिताः सिद्धानां कन्याः यया सा जितसिद्धकन्या, 'One who has surpassed the daughters of the Siddhas in beauty (or loveliness).' The Siddhas are a class of semi-devine beings supposed to be of great purity and holiness, and said to be especially characterized by the eight supernatural faculties; viz:—"अणिमा महिमा चैव गरिमा लघिमा तथा । प्राप्तिः प्राकाम्यमीशित्वं वशित्वं चाष्ट सिद्धयः" &c., to which is sometimes added कामावसायित्वं and many others; even twenty six others are sometimes added, i. e. दूरश्रवणं, सर्वज्ञत्वं, मनोयायित्वं, वह्निस्तंभः, जलस्तंभः, वायुस्तंभः, क्षुत्स्तंभः, पिपासास्तंभः, निद्रास्तंभः &c.; according to some authority the Siddhas inhabit, togetherwith the Munis &c., the भुवर्लोक or middle region between the earth and the sun; according to Vishṇupuráṇa 88 thousand of them occupy the regions of the sky north of the sun and south of the seven *R*ishis, they are regarded as immortal, but only in the sense of living to the end of a Kalpa; in the latter mythology they appear to be sometimes confused with the साध्याः, whose place they seem occasionally to take. तादृग्गुणा—Analyse तादृशो गुणाः यस्याः सा, 'Possessing merits or qualities similar to those of the princess of the Kosala king.' According to the poet the daughter of the Kekaya king is said to have possessed qualities or merits similar to those possessed by the princess of the king of the Kosalas. भुवनत्रयस्य—Analyse भुवनानां त्रयं भुवनत्रयं तस्य भुवनत्रयस्य, 'To the three worlds.' रक्षोभयनाशहेतुः—Analyse रक्षोभ्यः दानवेभ्यः भयस्य नाशः तस्य हेतुर्निदानं,

'The source of the removal of the terror arising from demons.' जितसिद्धकन्या तादृग्गुणा अन्यापि कन्या तस्य देवी बभूव,—'Another daughter, who on her part, had surpassed the daughters of the Siddhas in beauty and had, qualities similar to those of the Kosala princess, became also his queen.' यस्याः दोषोऽपि भुवनत्रयस्य रक्षोभयनाशहेतुर्बभूव, —'Even her fault (or wicked disposition) became the source of the removal of the terror arising from demons to the three worlds'.

St. 43. सुमंत्रसूतस्य—Construe द्विजेन ब्राह्मणेन अग्नौ हुतभुजि संनिहिते सति सुमंत्रसूतस्य सुमंत्रनामा सूतः सारथिर्यस्य तथोक्तस्य राज्ञो दशरथस्य पाणिग्रहं विवाहे करग्रणहं लंभितया संप्रापितया सुमित्रया भवहस्तसक्तहस्तांबुजायाः। भवस्य शूलपाणेः हस्तः करः तत्र सक्तं लग्नं हस्तांबुजं करकमलं यस्याः तस्याः तथोक्तायाः भवान्याः मृडान्याः पुण्यं पावनं वपुः शरीरं आललंबे आश्रितं. सुमंत्रसूतस्य—Analyse सुमंत्रनामा सूतः सारथिर्यस्य तथोक्तस्य, 'Having for his charioteer Sumantra.' पाणिग्रहं—Analyse पाणेः ग्रहः पाणिग्रहः तं, 'Taking hand in a marriage.' भवहस्तसक्तहस्ताम्बुजायाः—Analyse भवस्य शूलपाणेः हस्तः करः तत्र सक्तं लग्नं हस्ताम्बुजं करकमलं यस्याः तस्याः तथोक्तायाः, 'Whose lotus like hand was attached to the hand of the god S'iva.' Pandit Bandhyopádhyàya has the following remark in defence of the epithet सुमंत्रसूतस्य,—'अत्र दशरथतात्पर्येण सुमंत्रः सूतो यस्येति वक्रगत्याश्रयणं चिरार्थकत्वात्प्रकृतानुपयोगाच्च दोषापादकमिति तु न शक्यं, स, म, त, रेत्यक्षरश्लेषगुणानुगुण्येन वैशेषिकगुणत्वसंभवात्। तद्विवाहयात्रायां सुमंत्रस्यैव सारथित्वसूचनार्थत्वाच्च'। But the defence, in our opinion, is not so very convincing. सुमित्रया भवहस्तसक्तहस्ताम्बुजाया भवान्या पुण्यं वपुरालम्बे—'After having been made to accept in marriage the hand of the king (Das'aratha) whose charioteer was Sumantra, in presence of the sacred fire by the Brahmaṇa priest, Sumitrà assumed the auspicious body of Bhavánî whose lotus like hand was joined to that of S'iva.'

St. 44. तासु—Construe प्रजार्थी प्रजानामधिपः चारित्रकुलोन्नतासु तासु देवीषु अदृष्टपुत्राननवन्ध्यदृष्टिः [अत एव] चिन्ताहतात्मा [सन्] कालं निनाय प्रजानामधिपः—'The lord of the people., *Cf.* R. II. 1. "अथ प्रजानामधिपः प्रभाते." प्रजार्थी–Analyse प्रजाः एव अर्थो अस्य स प्रजेप्सुः 'Whose object was to get progeny.' 'Wishing to have progeny.' 'Longing for issue.' चारित्रकुलोन्नतासु—Analyse चारित्रेण उन्नतं कुलं यासां ताः तासु तथोक्तासु, 'Whose high family was renowned for good name, (or reputation, chastity).' अदृष्टपुत्राननवन्ध्यदृष्टिः —Analyse अदृष्टं अनवलोकितं पुत्रस्य आत्मजस्य आननं मुखारविन्दं तस्माद् वन्ध्या मोघा निष्फला वा दृष्टिर्यस्य स तादृशः, 'Whose eye-sight had become useless (*lit.* barren) on account of his not

having seen the face of a son.' चिन्ताहृतात्मा—Analyse चिन्तया आहृतः आत्मा यस्य सः, 'Whose heart was taken up by anxiety.' प्रजार्थी प्रजानामधिपः अदृष्टपुत्राननवन्ध्यदृष्टिः सन् कालं निनाय—'That lord of the people, ardently longing for progeny, whose eye sight had become useless by reason of his not having seen the face of a son (born) to those queens of his, whose high family was renowned for good name, passed his time with his heart wholly taken up by anxiety on that account.'

St. 45. स्वरक्षितव्यं—Construe [अथ] कदाचित् गोप्ता श्वगणिप्रचारैः विशोधितं कुञ्जभुवो हिमस्य नगस्य स्वरक्षितव्यं गहनं जगत्याः प्रभवे तस्मै जगाद. Paraphrase, शुनां विश्वकद्रूणां गणः स एषामस्तीति श्वगणिनः श्वग्राहिणः। तेषां प्रचारः संचरणादिव्यापारैः विशोधितं दस्युतस्करदावाग्न्यादीनां दूरापसारणेन परिमृष्टं कृतं। कुंजभुवो लतादिपिहितोदरस्य। हिमस्य नगस्य हिमाद्रेः। स्वरक्षितव्यं स्वरक्षणयोग्यं। गहनं वनं। गोप्ता तद्वनरक्षकः। कदाचित् तस्मै जगत्याः प्रभवे भुवो भर्त्रे राज्ञे दशरथाय। जगाद प्रणामपुरःसरं निवेदयामास। व्यपगतानलदस्युतया मृगयायोग्यं वनमस्तीति सूचितवानित्यर्थः। स्वरक्षितव्यं—Analyse स्वस्य रक्षितव्यं स्वरक्षितव्यं, 'Ought to be preserved by himself.' श्वगणिप्रचारैः—Analyse श्वगणिनः श्वग्राहिणः तेषां प्रचाराः तैः तादृशैः, 'By wanderings of persons who allowed packs of dogs to pass through (or to go about) it.' *Cf.* R. IX. 53. "श्वगणिवागुरिकैः प्रथमास्थितं व्यपगतानलदस्यु विवेश सः." कुञ्जभुवः—Analyse कुञ्जानां भूः यस्य तस्य तादृशस्य, 'Having sites of bowers.' गोप्ता कदाचित् तस्मै जगत्याः प्रभवे जगाद—'Once on a time a forest guard of the snowy mountain, reported to the lord of the earth that the forest of the Himálaya mountain, having sites of bowers, which was under his care, had been cleared by the roamings of persons having packs of hounds.' The poet means to say that a forest guard informed the king that the forest on the slopes of the Himálaya was cleared of the bands of robbers &c., and that the king might hold his hunting excursions at any time he pleased.

St. 46. विधेयचित्तः—Construe अनेधुः चलितव्यधेषु विधेयचित्तः हलायुधाभः अन्यायानिवृत्तवृत्तिः स मृगेन्द्रगामी कुतूहलेन मृगयां जगाम. विधेयचित्तः—Analyse विधेयं स्वाधीनं। दृढसंलग्नमिति यावत्। चित्तं मनोवृत्तिर्यस्य सः, 'Having his mind under his own control.' 'Having his mind subject to his will power,' i. e. firmly fiixed on, firmly joined together. चलितव्यधेषु—Analyse चलिताः व्यधाः वेधनव्यापाराः वेधनलक्ष्या वा चलितव्यधाः तेषु तादृशेषु, 'On objects aimed at for wounding or striking in motion.' 'To hunt animals in motion.' चलितव्यधेषु विधेयचित्तः—

by Telugu codices, written on Tàla-leaves. But we have accepted the reading of our Mss. C. D. Fr. supported by the Calcutta edition as well as the Sinhalese edition of Prin. Dharmáráma. Some scholars accept भोजी in the sense of " earth मृद् or मृत्तिका " and construe भोज्याः with घटं गृहीत्वा ' having taken the jar made of earth.' But in such a constructin सुतः cannot independently stand in the verse. भोजी or भोज्या otherwise called इन्दुमती was the wife of Aja. After giving birth to her distinguished son दशरथ (the father of Ráma), she, while in a summer grove with her husband, dropped down dead by the touch of a garland of celestial flowers. चारुभुजद्वयेन—Analyse भुजयोः द्वयं भुजद्वयम् । चारु च तद् भुजद्वयं च चारुभुजद्वयं तेन तादृशेन, ' With his elegant pair of hands.' घटितारिनाशः—Analyse घटितः अरेर्नाशो येन स तादृशः, ' One who has brought aboat the destruction of his enemies.' बाष्पायमाणः— ' Shedding tears.' Denominative present participle derived from बाष्पायते. बहुमानपात्रं—Analyse बहुश्चासौ मानश्च बहुमानः । बहुमानस्य पात्रं बहुमानपात्रं, ' A receptacle of the highest honour or respect.' यमप्रभावः—Analyse यमस्येव प्रभावो यस्य सः, ' One having a power like that of Yama, the god of death.' यमिनं—' A sage who has subdued his senses.' यमप्रभावः घटितारिनाशः भोज्याः सुतः चारुभुजद्वयेन घटं गृहीत्वा— 'With his power equal to that of the god of death, the son of the princess of the Bhojas, who had brought about the destruction of his enemies, took up the jar with his elegant pair of hands.' बाष्पायमाणः [सन्] बहुमानपात्रं यमिनं ददर्श—' And saw with streaming eyes the sage who had subdued his senses and who had been a receptacle of the highest honour.'

St. 86. पापं—Construe विधातृतुल्येऽपि पापं विधाय सतां पुरोगः [स राजा] सत्यापयामास । ततो यतिं घातयतोऽस्य देहं क्रोधानलेन सद्यो न ददाह. विधातृतुल्ये—Analyse विधात्रा तुल्यः विधातृतुल्यः तस्मिन् , ' With regard to him equal in power with Creator.' सत्यापयामास—'Declared the truth.' ' Declared as true.' Denominative Perfect 3rd per. sing. from सत्यापयति, (सत्यमाचष्टे करोति वा). *Cf.* Pàṇi. III. 1. 25. क्रोधानलेन— Analyse क्रोधः एव अनलः क्रोधानलः तेन क्रोधानलेन, ' By the fire of anger.' ' By the fire (fury) of wrath.' सतां पुरोगः—' A leader of the virtuous.' पापं विधाय—' Having committed (or perpatrated) a heinous crime (or offence).' विधातृतुल्येऽपि पापं विधाय सतां पुरोगः सत्यापयामास—' Even offending him, whose power was equal to that of the Creator, the leader of the virtuous declared the truth.' ततो यतिं घातयतोऽस्य देहं क्रोधानलेन सद्यो न ददाह—' For this reason, the sage did

not, at the moment (or instantly), burn his body who caused the death of the ascetic, by the fire of his wrath.'

St. 87. दयानुयातः-Construe तनयस्य नाशं श्रुत्वा दयानुयातः स वशी महर्षिः मुहुः आत्तशोकः [सन्] देशस्तुतसद्गुणाय [तस्मै राज्ञे] विश्वभुजं विशं शापं दिदेश. दयानुयातः—Analyse दयया अनुयातः दयानुयातः, 'Led by mercy.' 'Moved by the feeling of pity.' आत्तशोकः—Analyse आत्तो गृहीतः शोको येन स आत्तशोकः, 'Stopping his grief.' देशस्तुत°—Analyse देशेषु स्तुताः सद्गुणाः यस्य तस्मै यथोक्ताय, 'Whose meritoriuos actions (or merits) have been sung in all countries.' विशं, Expl:—विशतीति विशः तं तादृशं, 'Entering in.' 'Piercing.' 'Penetrating in.' 'Pervading in.' 'To sit or settle down on.' 'Cf. Pāṇi. III. 1. 135. "इगुपधज्ञाप्रीकिरः कः" 'After a verb ending in a consonant but preceded by इ, उ, ऋ (short or long), and after the verbs ज्ञा 'to know,' प्री 'to please,' and कॄ 'to scatter,' comes the affix क (अ).' विश्वभुजं—Analyse विश्वं भुनक्तीति विश्वभुक् तं विश्वभुजं, 'Eating all things.' 'Consuming everything.' तनयस्य नाशं श्रुत्वा स वशी महर्षिः देशस्तुतसद्गुणाय विशं विश्वभुजं शापं दिदेश— 'Hearing the death of his son that self-controlled great sage though merciful often arresting his grief, pronounced an all-pervading curse, consuming everything, on him whose merits have been sung in every country.'

St. 88. वनज°—Construe नृपतिः वनजकुसुमधारिणीं हरिनखभग्नविपाटितोरुगण्डां [अत एव] अलंघ्यां मृगव्यभूमिं श्रियमिव चिरमनुभूय गृहोन्मुखो बभूव. वनज°—Analyse वने जातानि वनजानि । वनजानि च तानि कुसुमानि च वनजकुसुमानि आरण्यपुष्पाणि । धारयतीति धारिणी । वनजकुसुमानां धारिणी वनजकुसुमधारिणी तां तादृशीं, 'Bearing wild flowers on its surface.' When applied to a hunting forest or मृगव्यभूमि. But when applied to the goddess of Royal Fortune or श्री, the compound may be analysed as, वने जले जातानि वनजानि । वनजानि च तानि कुसुमानि च वनजकुसुमानि अम्भोजपुष्पाणि । कमलानीति यावत् । तानि धारयतीति तां तथोक्तां श्रियं, 'Holding (in her hand) lotus flowers.' अलंघ्यां, Expl—लंघितुमशक्यां अलंघ्यां 'Difficult to be crossed.' 'Impassable.' हरिनख°—Analyse हरेः केसरिणः नखानां पातैः विपाटिताः उरुगण्डाः यस्यां सा तां तादृशीं, 'In which the spacious temples of wild elephants were torn by the strokes of the nails of lions.' As applied to श्री, Hari means, 'Vishṇu,' and गण्ड means, 'broad forehead.' मृगव्यभूमिं—Analyse मृगव्यस्य भूमिः मृगव्यभूमिः तां मृगव्यभूमिं, 'A hunting forest.' गृहोन्मुखः—Analyse गृहे उन्मुखः गृहोन्मुखः, 'Wishing to go to his palace.' The metre of this and the next two verses is पुष्पिताग्रा, which is thus defined:—

" अयुजि नयुगरेफतो यकारो युजि तु नजौ जरगाश्च पुष्पिताग्रा." The gaṇas in the odd lines are न न र य and in the even न ज ज र and a long syllable. नृपतिः वनजकुसुमधारिणीं मृगव्यभूमिं श्रियमिव चिरमनुभूय गृहोन्मुखो बभूव—' The king set out for his palace after having long enjoyed, like the goddess of Royal Fortune, the impassable hunting forest, abounding in wild flowers, the spacious temples of elephants in which have been torn by the nail strokes of lions. '

St. 89. अथ—Construe अथ स [दशरथः] विषमपादगोपितार्थं जगदुपयोगवियुक्तभूरिधातुं बहुतुहिननिपातदोषदुष्टं कुकवेः प्रबन्धमिव गिरिमरहत्. विषमपादगोपितार्थं—Analyse विषमाः दुर्गमाः पादाः प्रत्यन्तपर्वतास्तैर्गोपिता रक्षिताः सर्वसाधारणैरप्राप्याः कृताः अर्था वज्रादयो येन स तं तादृशं, ' The treasures of precious stones &c, in which have been made inaccessible (to people in general) on account of its adjacent rugged hills. ' As applied to poetic composition or प्रबन्ध, the compound may be analysed thus:—विषमः न्यूनाधिकाक्षरकृतः पादः श्लोकचतुर्थांशः तत्र गोपितः स्वसंकेतसमासाधिक्याप्रतीतादिपदप्रयोगवशादस्फुटोऽर्थः श्लोकतात्पर्यार्थो यस्मिन् तं तादृशं, ' The gist of the verse in which has been intentionally concealed and often rendered obscure by employing one's own convention and also a string of unintelligible compound words and other obscure words in a foot made of more or less syllables. ' जगदुपयोगवियुक्तभूरिधातुं—Analyse जगतः उपयोगः तस्मात् वियुक्ताः भूरिधातवः गैरिकमनःशिलादयो यस्य तं तादृशं, ' The metallic substances in which are hidden away from the utility of the world (in general)'. As applied to प्रबन्ध, the compound may be analysed in the following way:—जगदुपयोगवियुक्ताः महाकविभिः काव्यान्तरेऽप्रयुक्ताः धातवो भूवादयः शब्दशास्त्रप्रसिद्धा यस्मिन् तं तथोक्तं, ' The various roots in which differ from those in general use in the works of well known writers. ' बहुतुहिननिपातदोषदुष्टं—Analyse बहु च तत् तुहिनं च बहुतुहिनं तस्य निपाताः तेषां दोषेण दुष्टः तं तादृशं, 'Worth avoiding on account of the natural defect or noxious quality of a constant snow fall in large quantities. ' As applied to प्रबन्ध, it may be analysed thus:—तु, हि, न, इत्यादयो ये बहवो निपातशब्दास्तेषां दोषेण च दुष्टं, 'Vitiated by the fault of constantly employing particles or indeclinables such as तु, हि, न &c, in a Kàvya. ' Mark the well known plays upon words in the stanza. अथ स विषमपादगोपितार्थं गिरिं कुकवेः प्रबन्धमिव अरहत्—' Like the composition of a bad poet, the king then left the mountain, the treasures of precious stones &c. in which have been made inaccessible (to people in general) on account cf its adjacent rugged hills. the metallic substances in which have been hidden away from the general

utility of the world and which had become worth avoiding on account of the natural defect (or noxious quality) of a constant snow fall in large quantities. '

St. 90. सपदि—Construe नृपो दिशि सपदि निबद्धभूरिघोषं परमविनीतमनोज्ञनागवृन्दं मणिगणमण्डितकान्तं स्वकीयं पुरं जलधिमिव आससाद. निबद्धभूरिघोषं—Analyse भूरिश्चासौ घोषश्च भूरिघोषः । निबद्धो भूरिघोषो यस्मिन् तत्तादृशं, ' Enveloped in loud roars or thundering noise. ' परमविनीतमनोज्ञनागवृन्दं—Analyse परमाः श्रेष्ठाः विनीताः सुशिक्षिताः । अथ वा । परमधिकं विनीताः सुशिक्षिताः मनोज्ञाः मनोरमाश्च ये नागाः हस्तिनः तेषां वृन्दानि कुलानि यस्मिन् तत् तादृशं, 'In which there were herds of highly trained and beautiful elephants. ' When applied to the ocean or जलधि, the compound may be analysed as:—परमविभिः दिव्यपक्षिभिः नीतं मनोज्ञं मनोहरं नागवृन्दं सर्पसमूहो यस्मिन् यस्माद्वा तत्तादृशं, ' A collection of beautiful serpents from which has been taken away by celestial birds. ' (or) ' A collection of beautiful serpents to which has been brought by celestial birds. ' मणिगणमण्डितकान्तं—Analyse मणीनां गणाः तैः मण्डितं अत एव कान्तं सुन्दरं, ' Decorated by collections of jewels arranged in an ornamental fashion. ' When applied to जलधि, it may be analysed as:—मणिगणमण्डितेन मौक्तिकसमूहविभूषणेन कान्तः जलप्रान्तप्रदेशः यस्मिन् तत्तादृशं, ' The watery regions in which are illuminated by ornaments of multitudes of pearls.' नृपः दिशि निबद्धभूरिघोषं जलधिमिव स्वकीयं पुरं सपदि आससाद—' The king instantly came down to his capital, which was like the acean enveloped in loud roars reaching as far as quarters, in which there were herds of highly trained and beautiful elephants and which was decorated by collections of jewels arranged in an ornamental fashion (in the shops). '

CANTO II.



St. 1. रावणेन—Construe दावाग्नितेजसा रावणेन रणे भग्नाः देवाः पुरस्कृतपुरन्दराः [सन्तः] जगत्पतिं द्रष्टुं जग्मुः. *Cf.* Ku. II. "तस्मिन्विप्रकृताः काले तारकेण दिवौकसः। तुरासाहं पुरोधाय धाम स्वायंभुवं ययुः॥" रावण—The demon king of Lanká or Ceylon, from which he expelled his half brother Kubera. He was the son of विश्रवस्, by his wife निकषा, daughter of the Ra'kshasa सुमालिन्. He was half brother of Kubera and grandson of the *R*ishi पुलस्त्य; and as Kubera is the king of Yakshas, Rávaṇa is a king of demons called Ra'kshasas. Pulastya is said to be the progenitor, not only of Ra'vaṇa, but of the whole race of Rákshasas. He had ten heads and twenty arms and also four legs in infancy, and had the power of assuming any form at will. In his attempt to propitiate ब्रह्मन् he is said to have cut off all his heads but one, when the deity was pleased. He was the most powerful king of his day. Even the gods yielded to his power and were almost enslaved by him. He once attempted to uproot the Kaila'sa mountain but S'iva pressed it down and crushed the demon's hand under it; from this calamity he was relieved only by propitiating that deity. His character is described as libidinous and cruel. In consequenee of his having abducted S'itá, Ra'ma invaded Lanka' and killed him in fight. दावाग्नितेजसा—Analyse दावस्य अग्निः दावाग्निः। दावाग्नेरिव तेजो यस्य स दावाग्नितेजाः तेन, 'Possessing the lustrous power like that of the forest fire.' जगत्पतिं—Analyse जगतां पतिः जगत्पतिः तं तादृशं, 'To the lord of (three) worlds.' पुरस्कृतपुरन्दराः—Analyse पुरस्कृतः पुरन्दरो यैस्ते, 'Having their front led by the town-splitting god,' (i. e. Indra). पुरन्दरः—Analyse पुरं दारयतीति, 'Town-splitter.' 'Fortress destroyer.' An epithet of Indra as breaking cities into fragments with his thunderbolt. The metre of this canto is अनुष्टुभ् (also called श्लोक). Definition:—"श्लोके षष्ठं गुरु ज्ञेयं सर्वत्र लघु पञ्चमम्। द्विचतुःपादयोर्ह्रस्वं सप्तमं दीर्घमन्ययोः". In this metre each verse must consist of eight syllables with the following restrictions:–That the fifth syllable of each verse be short; that the sixth syllable of each verse be long; and that the seventh be alternately long and short. रावणेन रणे भग्नाः देवाः जगत्पतिं द्रष्टुं जग्मुः—'Overthrown in the battle by Ra'vaṇa, who

had a lustrous power like that of the forest-fire, the gods set out to see the Lord of the worlds, requesting Indra to take their lead' (*lit.* placing Indra in front of them).

St. 2. निजदेह°—Construe निजदेहभराक्रान्तनागनिश्वासरंहसा गतागतपयोराशिपातालतलमास्थितं [जगत्पतिं द्रष्टुं जग्मुरिति पूर्वेणान्वयः]. गतागत°—Analyse पयसां राशिः पयोराशिः । गतागतश्चासौ पयोराशिश्च गतागतपयोराशिः तस्य पातालतलं गतागतपयोराशिपातालतलं, 'To him who has made his abode in the lower region (*lit.* surface) of the nether world situated below the ocean, the waters whereof were made to ebb and flow.' निजदेह°—Analyse निजश्चासौ देहश्च निजदेहः विष्णोः शरीरं तस्य भरेण आक्रान्तो यो नागः तस्य निश्वासस्य रंहः जवस्तेन, 'By the impetuous force of the hard breathings of the great serpent labouring under the weight of his (Vishṇu's) own body.' This and the following seven verses form a कुलक which is thus defined:—"द्वाभ्यां युग्ममिति प्रोक्तं त्रिभिः श्लोकैर्विशेषकम् । कलापकं चतुर्भिः स्यात् तदूर्ध्वं कुलकं स्मृतम्."

St. 3. आसीनं—Construe तत्क्षणत्यक्तनिद्रार्तिबद्धरागायतेक्षणं [अत एव] स्रस्तमौलिमाल्यविभूषणं भोगिनि आसीनं [जगत्पतिं द्रष्टुं जग्मुरिति पूर्वेण सम्बन्धः]. स्रस्तमौलि°—Analyse स्रस्तानि च तानि मौलेर्माल्यानि च स्रस्तमौलिमाल्यानि तान्येव विभूषणं यस्य स तं तादृशं, 'Whose ornaments of garlands were slipped off from the crown of his head.' तत्क्षण°—Analyse तत्क्षणमेव त्यक्ता निद्रायाः आर्तिरापद् तया बद्धरागं आयतेक्षणं यस्य स तं तादृशं, 'Who, at that moment, had shaken off the dullness of sleep and so had his long eyes red.' भोगिनि आसीनं तं द्रष्टुं जग्मुः—'Him who was lying on the serpent, whose ornament of garlands had slipped off from the crown of his head and who at that moment had shaken off the dullness of sleep and so had his long eyes red,—'

St. 4. भुजङ्ग°—Construe अम्भोनिधिच्छेदे भुजङ्गपृथुकारूढमातङ्गमकराश्रयं युद्धं नृपलीलया पश्यन्तं [जगत्पतिं द्रष्टुं जग्मुरिति पूर्वेणान्वयः]. भुजङ्ग°—Analyse भुजङ्गानां पृथुकास्तैरारूढो मातङ्गमकराणां आश्रयो यस्मिन् तत् तादृशं युद्धं, 'A conflict in which the asylum of marine monsters was marched on with overpowering energy by young ones of large serpents.' These young ones and the large serpents were the followers of S'esha, and they had driven out from the conflict these marine monsters. मातङ्गमकर *m.*—'A kind of marine monster; probably a monstrous crocodile.' अम्भोनिधिच्छेदे—Analyse अम्भसां निधिः अम्भोनिधिः तस्य छेदः तस्मिन्, 'In a portion of the ocean.' 'In a certain part of the ocean.' नृपलीलया—Analyse नृपाणां लीला नृपलीला तया नृपलीलया, 'Out of a kingly sport.' अम्भोनिधिच्छेदे नृपलीलया युद्धं पश्यन्तं—'In one part of the ocean, beholding in a kingly amusive spirit, a conflict, in

which the asylum of marine monsters was marched on with overpowering (martial) energy by young ones of large serpents,'—

St. 5. भोगि°—Construe भोगिभोगासनक्षोभो माभूदिति भक्त्या आनतशरीरेण गरुत्मता सुदूरतः सेव्यमानं [जगत्पतिं द्रष्टुं जग्मुरिति पूर्वेण सम्बन्धः]. भोगि°—Analyse भोगिनः शेषस्य भोगः आभोगः । शरीरमिति यावत् । स एव आसनं सिंहासनं तस्य क्षोभः, 'An agitation of the seat (or throne) made up of the body of the serpent शेष.' *Cf.* R. X. 7. "भोगिभोगासनासीनं ददृशुस्तं दिवौकसः." सुदूरतः *ind*—'At a long distance.' 'From a respectable distance.' आनतशरीरेण—Analyse आनतं शरीरं यस्य स तेन तादृशेन, 'By him who has bent down his body' (i. e. head). भक्त्या—'Through ardent devotion.' गरुत्मान् *m.*—'Garu*d*a.' *Cf.* R. X. 13. "उपस्थितं प्राञ्जलिना विनीतेन गरुत्मता." A mythical bird or vulture, half-man, half-bird on which Vishṇu rides. He is the king of birds and descended from Kas'yapa and Vinatà, one of the daughters of Daksha. He is the great enemy of serpents, having inherited his hatred from his mother, who had quarrelled with her co-wife and superior, Kadru, the mother of serpents. His lustre was so brilliant that soon after his birth the gods mistook him for Agni and worshipped him. He is represented as having the head, wings, talons, and beak of an eagle, and the body and limbs of a man. His face is white, his wings red, and his body golden. He had a son named Sanpa'ti, and his wife was Unnati or Vina'yaka'. According to the Maha'bha'rata, his parents gave him liberty to devour bad men, but he was not to touch Bràhmaṇas. Once, however, he swallowed a Bràhamaṇa and his wife, but the Bràhmaṇa so burnt his throat that he was glad to disgorge them both. Garu*d*a is said to have stolen the Am*ri*ta from the gods in order to purchase with it the freedom of his mother from Kadru. Indra discovered the theft and fought a fierce battle with Garu*d*a. The Am*ri*ta was recovered, but Indra was worsted in the fight, and his thunderbolt was smashed. भक्त्यानतशरीरेण गरुत्मता सुदूरतः सेव्यमानं—'Him who was attended on by Garu*d*a who had bent down his head through ardent devotion and was standing at a respectable distance, thinking that there should arise no disturbance to the throne made up of the bcdy of the serpent S'esha,'—

St. 6. अर्करश्मि°—Construe अर्करश्मिभयेन पातालतल्पमास्थितं प्रीत्या लक्ष्मीमुखतुषारांशौ व्यापारितेक्षणं [जगत्पतिं द्रष्टुं जग्मुरिति पूर्वेणान्वयः]. अर्क-

रश्मिभयेन—Analyse अर्कस्य रश्मयः अर्करश्मयः तेभ्यो भयं तेन, 'As if through fear of the solar rays.' पातालतलं—Analyse पातालस्य तलं पातालतलं तत्र आस्थितः तं तादृशं, 'Living in the lower part of the nether world.' लक्ष्मीमुखतुषारांशौ—Analyse लक्ष्म्याः मुखं लक्ष्मीमुखं तदेव तुषारांशुः शीतांशुः चन्द्रः तस्मिन्, 'On the moon-like face of Lakshmî.' व्यापारितेक्षणं—Analyse व्यापारितं ईक्षणं येन स व्यापारितेक्षणः तं तादृशं, 'Who had directed his eyes towards.' प्रीत्या लक्ष्मीमुखतुषारांशौ व्यापारितेक्षणं—'Him who had taken his abode in the lower part of the nether world as if through fear of being scorched by the sun's rays and who had directed his eyes, through affection towards the moon-like face of Lakshmî,'—

St. 7. स्वमुखे—Construe स्वमुखे सञ्चरदृष्टेः पद्मायाः अङ्कविन्यस्तपार्ष्णिना पादपद्मेन नाभिमण्डलं स्पृशन्तं [जगत्पतिं द्रष्टुं जग्मुरिति पूर्वेण सम्बन्धः]. स्वमुखे—Analyse स्वस्य मुखं स्वमुखं तस्मिन्, 'Towards his own face.' सञ्चरदृष्टेः—Analyse सञ्चरन्ती दृष्टिर्यस्याः सा तस्याः 'Of her whose sight is directed towards (or moving about).' अङ्कविन्यस्तपार्ष्णिना—Analyse अङ्के विन्यस्तः पार्ष्णिर्यस्य तेन, 'The heels whereof were laid on her lap.' *Cf.* R. X. 8. "अङ्के निक्षिप्तचरणमास्तीर्णकरपल्लवे." पादपद्मेन—Analyse पादः पद्ममिव पादपद्मं तेन पादपद्मेन, 'By his lotus-like foot.' नाभिमण्डलं—Analyse नाभेर्मण्डलं नाभिमण्डलं, 'The circle of her navel.' स्वमुखे सञ्चरदृष्टेः पद्मायाः नाभिमण्डलं पादपद्मेन स्पृशन्तं—'Him who was touching the circle of the navel of Lakshmî whose eyes were directed to his face with his lotus-like feet, the heels whereof were laid on her lap,'—

St. 8. सव्यापसव्य°—Construe तटद्वयस्थचन्द्रार्कविन्ध्यशैलमिव उच्छ्रितं सव्यापसव्यभागस्थपाञ्चजन्यसुदर्शनं [जगत्पतिं द्रष्टुं जग्मुरिति पूर्वेणान्वयः]. सव्यापसव्यभागस्थपांचजन्यसुदर्शनम्—Analyse सव्यश्च अपसव्यश्च सव्यापसव्यौ तौ च भागौ च सव्यापसव्यभागौ तयोः स्थितौ पांचजन्यसुदर्शनौ यस्य स तं तादृशं, 'On the right and left sides of him were laid the Pánchajanya (conch) and the Sudars'ana weapon.' तटद्वयस्थचंद्रार्कविन्ध्यशैलं—Analyse तटद्वये स्थितौ चन्द्रार्कौ यस्य स तादृशः विन्ध्यशैलः तमिव, 'Like the Vindhya mountain on both the sides of which were the sun and the moon.' विन्ध्य *m.*—The mountains which stretch across India, and divide what Manu calls the Madhyades'a or middle-land, the land of the Hindus, from the south, that is, they divide Hindusthána from Deccan. For further particulars see our note on Agastya canto IV. 59. Translate :—'Him who had the Pánchajanya and Sudars'ana on the right and left sides of him and so appeared raised up like the Vindhya mountaion on both the sides of which are the sun and the moon,'—

St. 9. पुरुषं—Construe पुरुषं नत्वा पुरुहूताद्या स्कन्नशक्तिः गीर्वाणसंहतिः सनातनं नुतियुतां गिरं ऊचे. पुरुहूताद्या—Analyse पुरुहूतः आद्यो यस्याः सा, 'Beginning with Indra.' गीर्वाणसंहतिः—Analyse गीर्वाणानां अमराणां संहतिः समूहः, 'The multitude of the gods.' सनातनं पुरुषं-'To the Eternal Being.' स्कन्नशक्तिः—Analyse स्कन्ना शक्तिर्यस्याः, 'With power paralyzed.' नुतियुतां—Analyse नुतिभिर्युता नुतियुता तां तादृशीं, 'Full of praise.' स्कन्नशक्तिः गीर्वाणसंहतिः नुतियुतां गिरं ऊचे—'The multitude of gods headed by Indra with paralyzed power, bowed down to the Eternal Being and addressed a speech (to him) full of praise.'

St. 10. समुद्रमथने—Construe समुद्रमथने यस्य भ्रमन्मन्दरखण्डिताः प्रदीप्तांगदकोटयः ताराः इव दिशो वव्रुः. समुद्रमथने—Analyse समुद्रस्य मथनं समुद्रमथनं तस्मिन्, 'At the time of the churning of the ocean.' 'In the process of the ocean being churned.' भ्रमन्मन्दरखण्डिताः—Analyse भ्रमन् चासौ मन्दरश्च भ्रमन्मन्दरः तेन खण्डिताः भ्रमन्मन्दरखण्डिताः, 'Broken into pieces by the Mandara mountain in motion.' Mandara is the name of a sacred mountain, the residence of various deities; it served the gods and Asuras (demons) for a churning stick at the churning of the ocean for the recovery of the Am*ri*ta and thirteen other precious things, lost during the deluge; Vishṇu is fabled to have become incarnate in the form of a Kûrma or tortoise for the purpose of sustaining this mountain on his back, the serpent Vàsuki serving as a rope with which to whirl it round. *Cf.* महाभारत, आदिपर्व. 1112 &c. प्रदीप्तांगदकोटयः—Analyse अङ्गदानां कोटयः अंगदकोटयः। प्रदीप्ताश्च ताः अंगदकोटयश्च प्रदीप्तांगदकोटयः, 'The points of अङ्गद (arm-let) were blazing with light or the points of blazing arm-lets.' समुद्रमथने यस्य प्रदीप्तांगदकोटयः ताराः इव दिशो वव्रुः—'At the time of churning the ocean, the points of his blazing arm-lets being broken into pieces by the Mandara in motion scattered over the quarters like stars.'

St. 11. येन—Construe दुर्वारवीर्येण येन सागराम्बरचन्द्रमाः पातालपालानां यशःपिण्डमिव शंखं च उद्धृतम्. दुर्वारवीर्येण—Analyse वारयितुं दुष्करं दुर्वारं। दुर्वारं वीर्यं यस्य स तेन तथोक्तेन, 'By him whose valour cannot be repressed,' 'of an irresistible valour (or power).' सागराम्बरचन्द्रमाः—Analyse सागरः एव अम्बरं तस्मिन् चन्द्रमाः, 'The moon in the sky in the form of the ocean.' The conch is one of the fourteen jewels that came out in the process of the churning of the ocean. They are:-
लक्ष्मीः कौस्तुभपारिजातकसुरा धन्वन्तरिश्चन्द्रमा गावः कामदुघाः सुरेश्वरगजो रंभादिदेवांगनाः। अश्वः सप्तमुखो विषं हरिधनुः शंखोऽमृतं चांबुधेरत्नानीह चतुर्दश प्रतिदिनं

कुर्युः सदा मङ्गलम् " ॥ पातालपालानां—Analyse पातालानां पालाः तेषां तथोक्तानां, 'Of the guardians of the Pàtálas.' पाताल *n.*—One of the seven regions under the earth and the abode of the Nàgas or serpents and demons. The seven regions are enumerated as follows:—अतल, वितल, सुतल, रसातल, तलातल, महातल, and पाताल; but पाताल is sometimes used as a general name for all : according to महाभारत, पाताल is also a town in the world of the serpent-race. शंख *m. n*—'The conch.' यशःपिण्ड *m. n.*—Analyse यशसः पिण्डं यशःपिण्डं, 'Like a round ball of fame.' दुर्वारवीर्येण येन पातालपालानां यशःपिण्डमिव शंखं उद्धृतम्—'By him of an irresistible valour was brought out the conch which served as the moon in the sky in the form of the ocean, as if it were a round ball of the fame of the guardians of the nether regions.'

St. 12. यं—Construe अंसद्वयसंसक्तचन्द्रादित्यांगदश्रियं ताराहारांकवक्षसं यं देवाः त्रिविक्रमे नेमुः. अंसद्वय°—Analyse अंसद्वये संसक्तौ यौ चन्द्रादित्यौ ताभ्यां अंगदयोः श्रीर्यस्य स अंसद्वयसंसक्तचन्द्रादित्यांगदश्रीः तं तादृशं, 'Having a splendour of arm-lets made of the sun and the moon stuck close to his pair of shoulders.' त्रिविक्रम *n.*—'The three steps or strides (of Vishṇu).' त्रिविक्रमः—A name of Vishṇu used in the *Ṛig*-veda, and referring to three steps or paces which he is represented as taking. These steps, according to the opinion of a commentator, are "the three periods of the sun's course,—his rising, culminating and setting." An old commentator says, "Vishṇu stepped by separate strides over the whole universe. In three places he planted his step, one step on the earth, a second in the atmosphere, and a third in the sky, in the successive forms of Agni, Vàyu, and Sûrya." The great commentator Sáyaṇa, a comparatively modern writer, understands these steps as being the three steps of Vishṇu in the Vàmana or dwarf incarnation, and no doubt they were the origin of this fiction. "In the Treatà-yuga, or second age, the Daitya king Bali had, by his devotions and austerities, acquired the dominion of the three worlds, and the gods were shorn of their power and dignity. To remedy this, Vishṇu was born as a diminutive son of Kas'yapa and Aditi. The dwarf appeared before Bali, and begged of him as much land as he could step over in three paces. The generous monarch complied with the request. Vishṇu took two strides over heaven and earth; but respecting the virtues of Bali, he then stopped leaving the dominion of Pàtála, or the infernal regions, to Bali."

ताराहारांकवक्षसं—Analyse ताराणां ये हाराः तेषां अंको वक्षसि यस्य स ताराहारांकवक्षाः तं तादृशं, 'Having on his breast a mark of the starry garlands.' देवाः ताराहारांकवक्षसं तं त्रिविक्रमे नेमुः—'The gods bowed down to him who had a mark of the starry garlands on his breast and had (also) the splendour of arm-lets made of the sun and the moon stuck close to his pair of shoulders, for his three strides.'

St. 13. मन्थवात°—Construe मन्थवातभ्रमन्मेघनक्षत्रादित्यमण्डलं व्योमापि येन पुरा सह सिन्धुना निर्मथितम्. मन्थवातभ्रमन्मेघनक्षत्रादित्यमण्डलं—Analyse मेघाश्च नक्षत्राणि च आदित्यमण्डलं च एतेषां समाहारः मेघनक्षत्रादित्यमण्डलम्। मन्थवातवत् भ्रमत् मेघनक्षत्रादित्यमण्डलं यस्मिंस्तद् मन्थवातभ्रमन्मेघनक्षत्रादित्यमण्डलम्, 'Having the orb of the sun, constellations and clouds whirling round like the whirl-wind.' पुरा सह सिन्धुना येन व्योम निर्मथितम्—'In times of yore, even the heavenly vault, with its orb of the sun, constellations and clouds whirling round like the whirl-wind, was stirred about by him.'

St. 14. नाभि°—Construe मायाशयालुना येन भीमौ नाभिपद्मस्पृशौ मधुकैटभौ कीटवत् पाणिभिः पाटितौ कामं. मायाशयालुना—Analyse मायया शयालुः मायाशयालुः तेन, 'By the Being dozing in an imaginary slothfulness.' नाभिपद्मस्पृशौ—Analyse नाभिः पद्ममिव नाभिपद्मं तत् स्पृशतः इति नाभिपद्मस्पृशौ, 'Trying to seize the navel-lotus (i. e. the lotus-like navel).' मधुकैटभौ—Analyse मधुश्च कैटभश्च मधुकैटभौ, 'The names of Asuras slain by Vishṇu.' मधु-कैटभ *m.* Were two horrible demons, who, according to the महाभारत and the Puràṇas, sprang from the ear of Vishṇu while he was asleep at the end of a Kalpa, and were about to kill Bramhá, who was lying on the lotus springing from Vishṇu's navel. Vishṇu killed them, and hence he obtained the names of कैटभजित् and मधुसूदन. The Màrkan*d*eya Pura'ṇa attributes the death of Kai*t*abha to उमा, and she bears the title of Kai*t*abhà. The Harivans'a states that the earth received its name of Mediní from the marrow (*medas*) of these demons. In one passage it says that their bodies, being thrown into the sea, produced an immense quantily of marrow or fat, which Náráyaṇa used in forming the earth. In another place it says that the Medas quite covered the earth, and so gave it the name of Medinì. This is another of the many etymological inventions. येन भीमौ मधुकैटभौ कीटवत् पाणिभिः पाटितौ कामं—'The formidable demons Madhu and Kai*t*abha trying to seize his navel-lotus were torn to pieces with his hands agreeably to his desire (कामं),

like insects, by that Supreme Being, dozing in an imaginary slothfulness.'

St. 15. सर्वं—Construe सर्वं लोकत्रयं संहृत्य शयनं गतो यश्च उदधौ सान्द्रीभूतः सलिलस्कन्धः इव दृश्यते. *Cf.* R. XIII. 6. "संहृत्य लोकान्पुरुषोऽधिशेते". लोकत्रयं—Analyse लोकांना त्रयं लोकत्रयं, 'World-triad.' 'The three worlds' (viz. heaven, earth and the lower regions). सलिलस्कन्धः—Analyse सलिलानां स्कन्धः सलिलस्कन्धः, 'A large body or mass of water, (*lit.* a trunk or avalanche). सर्वं लोकत्रयं संहृत्य शयनं गतो यः उदधौ सलिलस्कन्धः इव दृश्यते—'After having annihilated (all) the three worlds he took repose and looked like a large body of solidified water in the ocean.'

St. 16. तस्मै—Construe स्मरणमात्रेण सद्यः तमोनुदे सत्त्वमधिश्रित्य त्रैलोक्यं परिरक्षते तस्मै तुभ्यं नमः. स्मरणमात्रेण Expl:—स्मरणमेव स्मरणमात्रं तेन, 'By mere remembering you,' or 'by mere thinking of you.' तमोनुदे—Analyse तमः नुदतीति तमोनुद् तस्मै, 'Dispersing darkness.' 'Dispelling darkness.' तमस् *n.*—'Quality of darkness or ignorance.' 'Mental darkness.' सत्त्व *n.*—The quality of purity or goodness regarded in philosophy as the highest of the three Guṇas which are supposed to constitute the external world, the other two being रजस् and तमस्. The quality of सत्त्व renders a person in whom it predominates chaste, true, honest, wise &c., and a thing pure, clean &c. According to the सांख्य philosophy, nature consists in the equipoise of three Guṇas called सत्त्व, रजस् and तमस्, i. e. goodness, passion and darkness or virtue, foulness and ignorance. सत्त्वमधिश्रित्य त्रैलोक्यं परिरक्षते तस्मै तुभ्यं नमः—'A bow to such a one as you are, who instantly remove the quality of darkness by mere remembering you and preserve the three worlds, having recourse to the quality of सत्त्व.'

St. 17. स्थिति°—Construe स्थितिनिर्माणसंहारभेदयोगेन भेदितः स्पृष्टसत्त्वरजस्तमाः ते योगः त्रिधा समभूत्. स्थिति°—Analyse स्थितिश्च निर्माणं च संहारश्च स्थितिनिर्माणसंहाराः तेषां भेदयोगेन, 'In accordance with the divisions known as or conformably to the divisions known as स्थिति, 'continuance in life,' निर्माण, 'creating or creation' and संहार 'the periodical destruction of the universe at the end of a कल्प.' स्थिति *f.*—In philosophy one of the three states through which the system of created things and every individual being passes, these three states are, उत्पत्तिः, 'arising into being,' स्थितिः, 'continuance in life,' and लयः, 'dissolution.' योग *m.*—Accor-

ding to the Buddhist philosophy 'the union of the individual soul with the universal soul.' *Cf.* R. X. 16. "नमो विश्वसृजे पूर्वं विश्वं तदनु बिभ्रते । अथ विश्वस्य संहर्त्रे तुभ्यं त्रेधास्थितात्मने ॥ स्पृष्टसत्त्वरजस्तमाः— Analyse सत्त्वं च रजश्च तमश्च सत्त्वरजतमांसि । स्पृष्टानि सत्त्वरजतमांसि यस्मिन् स स्पृष्टसत्त्वरजस्तमाः, 'To which are concurrent the qualities of सत्त्व, रजस्, and तमस्.' स्पृष्टसत्त्वरजस्तमाः ते योगः त्रिधा समभूत् 'Made to be divided in accordance with the divisions known as Sthiti, Nirma'ṇa and Sanhàra, thy Yoga, O god, has become (divided) into three parts (or has become threefold) to which are concurrent the qualities of Sattva, Rajas and Tamas .'

St. 18. कुक्षौ—Construe तव कुक्षौ परिश्रम्य विश्वं पश्यन् विदामग्र्यः विशाम्पतिः त्वां त्रैलोक्यभरसासहिं विवेद. विदामग्र्यः—'The best of the wise.' 'The foremost of the wise.' त्रैलोक्यभरसासहिं—Analyse त्रयाणां लोकानां समाहारः त्रैलोक्यं तस्य भरः त्रैलोक्यभरः तस्य सासहिः तं तादृशं, 'Able to bear the whole burden of the three worlds.' सासहि *adj.*—'Able to bear much.' तव कुक्षौ परिश्रम्य—'Having laboured much in thy womb and looking (from there) at this universe, the lord of the people the best of the wise, knew thee to be able to bear the whole burden of the three worlds.'

St. 19. एवं—Construe नाकस्य भोक्तृभिः भक्त्या एवं नुतः गदनाशनः जगन्नेता हरिः हारि हितं वाक्यं जगाद. जगन्नेता—Analyse जगतो नेता जगन्नेता 'The conductor or the master of the world.' "कर्तरि च" Pa'ṇini. II. 2. 16. 'A word ending with a sixth case-affix is not compounded with a word ending with तृच् or अक when the force of these latter affixes is that of an agent.' (*obs.*) This rule is not very strictly observed in classical literature. *Cf.* "घटानां निर्मातुस्त्रिभुवनविधातुश्च कलहः." गदनाशनः—Analyse गदस्य नाशनः गदनाशनः, 'Destroying diseases.' 'Destroying sickness or calamities.' हरिर्हारि हितं वाक्यं जगाद—'Praised in this way through ardent devotion by the Svarga-enjoyers, Hari, the master of the world and the destroyer of calamities, delivered a pleasing and sweet address to them.'

St. 20. प्रबलारिबल°—Construe प्रबलारिबलप्राणविक्रियाहेतुहेतयो देवाः दैवक्षता इव किं तु स्रस्तौजसो जाताः. प्रबलारि° Analyse प्रबलानि अरीणां बलानि तेषां प्राणानां विक्रिया एव हेतुस्तादृशा हेतयो येषां ते, 'Having weapons the unique object of which was to destroy or annihilate the lives of the powerful armies of enemies.' For हेतयः *Cf.* R. X. 12. "हेतिभिश्चेतनावद्भिः," किं तु—'Whether indeed.' स्रस्तौजसः—Analyse स्रस्तानि ओजांसि येषां ते, 'whose bodily strength was gone forever.' 'With their power paralyzed.' दैवक्षताः--Analyse दैवेन क्षताः दैवक्षताः, 'Des-

troyed by fate or destiny.' 'Stricken by destiny.' 'Fate-stricken.' देवाः किं नु स्कन्नौजसो जाताः—'Why have the gods, who had weapons, the sole object of which was to destroy the lives of powerful armies of enemies, indeed become deprived of their personal strength, as if, fate-stricken ?'

St. 21. हरेः—Construe शोकक्षामा ध्यानारुणा हरेर्नेत्रपरम्परा परिम्लानरक्तोत्पलवनश्रियं किं बिभर्ति. *Cf.* Ku. II. 2. "तेषामाविरभूद्ब्रह्मा परिम्लानमुखश्रियाम्। सरसां सुप्तपद्मानां प्रातर्दीधितिमानिव ॥" शोकक्षामा-Analyse शोकेन क्षामा शोकक्षामा, 'Dried up from grief.' ध्यानारुणा—Analyse ध्यानेन अरुणा ध्यानारुणा, 'Red by meditation or reflection.' नेत्रपरम्परा—Analyse नेत्राणां परम्परा नेत्रपरम्परा, 'The row of his eyes.' Because Indra is called सहस्राक्ष or सहस्रनेत्र. परिम्लानरक्तोत्पलवनश्रियं—Analyse रक्तानि च तानि उत्पलानि च रक्तोत्पलानि। वनस्य श्रीः वनश्रीः। परिम्लानानि रक्तोत्पलानि यस्याः सा परिम्लानरक्तोत्पला। परिम्लानरक्तोत्पला चासौ वनश्रीश्च परिम्लानरक्तोत्पलवनश्रीः तां तादृशीं, 'The beauty of a forest having its red-lotuses withered.' हरेर्नेत्रपरम्परा परिम्लानरक्तोत्पलवनश्रियं किं बिभर्ति—'Why does the row of Indra's eyes, dried up from grief, and red by serious reflection, bear the beauty of a forest the red-lotuses in which have been withered away.'

St. 22. पाशपाणिः—Construe इष्टविग्रहो वनगोचरः पाशपाणिः असौ वरुणो वीरोऽपि क्षुद्रः पाशीव केन पीडितः. *Cf.* Ku. II. 21. "किं चायमरिदुर्वारः पाणौ पाशः प्रचेतसः। मंत्रेण हतवीर्यस्य फणिनो दैन्यमाश्रितः ॥" पाशपाणिः—Analyse पाशः पाणौ यस्य सः, 'One in whose hand there is a noose.' 'Armed with a noose.' When applied to a wretched fowler, पाशपाणि means, 'one armed with a net of strings or cords'. 'One in whose hand there is a net of strings.' इष्टविग्रहः—Analyse इष्टो विग्रहो यस्य सः। अभिमतदेहभृदिति यावत्। 'One who assumes a form at will.' When applied to a wretched fowler इष्टविग्रहः means, 'catching a bird.' (वि *m.f.* a bird) which he thinks acceptable, or which is dear to him (अभीष्टपक्षिग्राही). वनगोचरः—Analyse गावः चरन्त्यस्मिन्निति गोचरः। वनं जलं गोचरः प्रदेशो यस्य सः। जलप्रदेशवर्ती, 'One who has water for his abode.' 'Living in a watery abode.' When applied to a wretched fowler, वनगोचरः means, 'wandering in a forest,' 'a forest roamer' (अरण्यचारी). वरुण *m.*—The universal encompasser, the all-embracer. One of the oldest of the Vedic deities, a personification of the all-investing sky, the maker and up-holder of heaven and earth. As such he is king of the universe, king of gods and men, possessor of illimitable knowledge, the supreme deity to whom especial honour is due. He is often associated with Mitra, he being the ruler

of the night and Mitra of the day; but his name frequently occurs alone, that of Mitra only seldom. In later times he was chief among the lower celestial deities called A'dityas, and later still he became a sort of Neptune, a god of the seas and rivers, who rides upon the Makara. This character he still retains. His sign is a fish. He is regent of the west quarter and one of the Nakshatras or lunar mansions. According to the Mahábhàrata he was son of Kardama and father of पुष्कर. The Mahàbhàrata relates that he carried off भद्रा, the wife of उतथ्य, a Bràhmaṇa, but उतथ्य obliged him to submit and restore her. He was in a way the father of the sage वसिष्ठ. In the Vedas, Varuṇa is not specially connected with water, but there are passages in which he is associated with the element of water both in the atmosphere and on the earth, in such a way as may account for the character and functions ascribed to him in the later mythology. In the Puràṇas, Varuṇa is sovereign of the waters, and one of his accompaniments is a noose, which the Vedic deity also carried for binding offenders: this is called नागपाश, पुलकांग or विश्वजित्. His favourite resort is पुष्पगिरि, 'flower mountain', and his city वसुधानगर or सुखा. He also possesses an umbrella impermeable to water, formed of the hood of a cobra, and called आभोग. वीरोऽपि वरुण: क्षुद्र: पाशीव केन पीडित:—'By whom is this god वरुण, though a warrior, holding a noose weapon in his hand, assuming forms at will, and having watery-abode, oppressed like a wretched fowler?'

St. 23. किमयं—Construe किमयं मातरिश्वा कृशोऽपि सन् भूरिभि: शोकसंतापै: निजनि:श्वासै: पुनरेव उपचीयते. शोकसंतापै:—Analyse शोकात् संतापा: शोकसंतापा: तै:, 'Inflaming by sorrow.' 'Consuming by sorrow or grief.' मातरिश्वन् *m.* [श्वा] Expl:—मातरि अन्तरिक्षे श्वसिति चेष्टते or मातरि अन्तरिक्षे श्वयति संचरति । यद्वा । मातरि जनन्यां श्वयति वर्धते सप्तसप्तकरूपत्वात् । "श्वुक्षन्-" (उ. १।१५९) इति निपातनात्सप्तम्या अलुक्. 'Breathes or moves in the atmosphere.' This divine being is identified with वायु: the wind. मातरिश्वन् is also the name of Agni himself, so called as, 'सर्वस्य जगतो निर्मातर्यन्तरिक्षे श्वसन् वर्तमान:'. निजनि:श्वासै:—Analyse निजाश्च ते नि:श्वासाश्च निजनि:श्वासा: तै:, 'By reason of his hard breathings.' उपचीयते—'To become strong.' कृशोऽपि सन् अयं मातरिश्वा किं पुनरेवोपचीयते—'How is it that this god Màtaris'van (wind) though spare (or lean), appears to have again gathered his strength (or increased in bulk) by his frequent hard breathings consequent on inflaming sorrow (or consuming grief).'

St. 24. संपत्—Construe ध्रुवपरावृत्तिः संपत् । एवं विधिनिबंधना । सोऽयं दहनोऽपि सन् शोकविश्वभुजा दह्यते. ध्रुवपरावृत्तिः—Analyse ध्रुवा परावृत्तिर्यस्याः सा, 'Having a nature of turning back.' 'Possessing a sure nature of retreating.' विधिनिबंधना—Analyse विधेर्निबंधना विधिनिबंधना, 'Decree of the fate (or destiny).' शोकविश्वभुजा—Analyse विश्वं भुनक्तीति विश्वभुक् । शोकः एव विश्वभुक् शोकविश्वभुक् तेन तादृशेन, 'By fire in the form of sorrow consuming (or eating) all things.' 'By all consuming sorrow.' ध्रुवपरावृत्तिः संपत् । एवं विधिनिबंधना—'Wealth has a nature sure to turn back (from the possessor); such in fact is the decree of Fate.' सोऽयं दहनोऽपि सन् शोकविश्वभुजा दह्यते—'Though himself *Dahana* (the Burner) this god is burnt by the fire in the form of sorrow, devouring all (or eating everything)'.

St. 25. संप्राप्तजडिमा—Construe भानुः संप्राप्तजडिमा चंद्रमाश्च तीव्रतापः दैवौ एतौ धामव्यत्ययविप्लवं किं वहतः. संप्राप्तजडिमा—Analyse संप्राप्तो जडिमा यस्य सः, 'Inherited frigidity by nature.' Of a frigid nature.' तीव्रतापः—Analyse तीव्रस्तापो यस्य, 'Having (by nature) intense heat.' 'Of an intense heat.' 'Possessing intense heat.' धामव्यत्ययविप्लवं—Analyse धाम्नः व्यत्ययः तस्य विप्लवः तं तादृशं, 'Labouring under a misfortune of the reverse order of power' i. e. showing an opposite nature of power. धामन् *n.*—'Power,' 'strength,' 'natural vigour.' व्यत्यय *m.*—'Opposition to the usual rule,' 'inverted or reverse order,' 'transmutation,' 'interchange &c.' विप्लव *m.*—'Misfortune.' 'Evil.' 'Calamity.' 'Disaster.' दैवौ एतौ धामव्यत्ययविप्लवं किं वहतः 'The sun has got frigidity and the moon sheds intense heat: how is it that these gods (thus) display a reverse order of their power?'

St. 26. शुचैव—Construe सोऽहं शुचैव सगदः । भूयः अनया धृतया किं । इति गिरिधन्वनो मित्रेण नूनं गदा त्यक्ता. सगदः—Analyse गदया सह सगदः, 'Bearing a mace.' 'Armed with a mace.' A सहबहुव्रीहि compound. गिरिधन्वनः—Analyse गिरिरेव धनुर्यस्य स गिरिधन्वा तस्य तादृशस्य, 'Of one who is armed with a bow of clouds (or of mountains).' 'Of Indra.' गिरि in the sense of 'a cloud' is often sanctioned by the commentators on Vedic works. इति गिरिधन्वनो मित्रेण नूनं गदा त्यक्ता—'I am Sagada (with pain) by grief.' 'Why need I hold this Gadà (mace) in my hand?' 'With these words, that friend of Giridhanvan, (viz. Kubera) seems to have thrown down his mace.'

St. 27. लाघवं—Construe दण्डहस्ते महिषस्य रक्षके सायुधवाहने कीनाशे शिशाविव एवं लाघवं केन कृतं. लाघव *n.*—'Insignificance,' 'unimportance.'

'slight,' 'disrespect.' कीनाशः or यमः—'The god of death. In the Vedas यम is god of the dead, with whom the spirits of the departed dwell. He was the son of विवस्वत् (the sun), and had a twin-sister named यमी or यमुना. These are by some looked upon as the first human pair, the originators of the race; and there is a remarkable hymn, in the form of a dialogue, in which the female urges their cohabitation for the purpose of perpetuating the species. Another hymn says that यम "was the first of men that died, and the first that departed to the (celestial) world." He it was who found out the way to the home which cannot be taken away: "Those who are now born (follow) by their own paths to the place whither our ancient fathers have departed." In the epic poems यम is the son of the sun by संज्ञा (conscience), and brother of विवस्वत् (Manu). Mythologically he was the father of युधिष्ठिर. He is the god of departed spirits and judge of the dead. A soul when it quits its mortal form repairs to his abode in the lower regions; there the recorder, चित्रगुप्त, reads out his account from the great register called अग्रसंधानी, and a just sentence follows, when the soul either ascends to the abodes of the Pit*ri*s (Manes), or is sent to one of the twenty-one hells according to its guilt, or it is born again on earth in another form. यम is regent of the south quarter, and as such is called दक्षिणाशापति. He is represented as of a green colour and clothed with red. He rides upon a buffalo, and is armed with a ponderous mace and a noose to secure his victims. सायुधवाहने—Analyse आयुधं च वाहनं च आयुधवाहने ताभ्यां सहितः सायुधवाहनः तस्मिन् तादृशे, 'To him who has a weapon and a vehicle.' दण्डहस्ते—Analyse दण्डः हस्ते यस्य स तस्मिन् तादृशे, 'Holding a rod in hand.' 'Having a hand armed with a rod.' सायुधवाहने कीनाशे एवं लाघवं केन कृतं—'Who (ever) has thus given a slight to Yama (the god of death); who has a weapon and conveyance, who has a rod in hand and is the protector of the buffalo (on which he rides),—as to a child.' Mark that all the atttributes are common to Yama as well as शिशु.

St. 28. कल्पानिल—Construe शिलिनः प्रेरकः शक्त्या पातिततारकः कल्पानिलः इव भीमः अवार्यः स्कन्दः दैन्यं किमास्थितः. कल्पानिलः—Analyse कल्पस्य अनिलः कल्पानिलः, 'A terrible wind (or storm) at the time of the destruction of the world'. अवार्यः Expl:—वारयितुमशक्यः, 'Difficult to be prevented.' 'Difficult to be checked or impeded.' 'Difficult to be stopped or obstrneted.' 'Irresistible.' शिलिनः—'Of the

peacock of Kártikeya.' When applied to कल्पानिल, शिखिन: means 'of the fire.' पातिततारकः—Analyse पातितः तारकः तारकासुरो येन सः, 'Who had struck down the demon Tàraka.' When applied to कल्पानिल the compound may be analysed as, पातिताः तारकाः येन, 'Which had thrown down (or cast down) the heavenly bodies such as, planets, stars &c.' तारक *m.*—A powerful demon, son of वज्रांग and वरांगी. He propitiated Brahman and asked as a boon that he should not meet with death from any one but a child seven days old. When he became intolerable by his mischievous pranks, Kàrtikeya was born and slew the demon on the seventh day of his birth. दैन्यमास्था—'To be reduced to a pitiable or miserable condition or state.' 'To bring down to low-spiritedness.' कल्पानिल इवावार्यः स्कन्दः किं दैन्यमास्थितः—'Why is Skanda, who propels his peacock, who had struck down the demon Táraka by his (personal) strength, and who is terrible and irresistible like the wind at the time of the universal destruction, reduced to such a miserable plight.'

St. 29. आहत्य—Construe आहत्य हतसर्वास्त्रा इयं चण्डी रणे भ्रूधनुर्मात्रधारिणी कटाक्षशरशेषा केन कृता. भ्रूधनुर्मात्रधारिणी—Analyse भ्रूरेव धनुः भ्रूधनुः। भ्रूधनुरेव भ्रूधनुर्मात्रं तस्य धारिणी भ्रूधनुर्मात्रधारिणी, 'Holding a bow exclusively made of her eye-brows.' हतसर्वास्त्रा—Analyse हतानि सर्वाणि अस्त्राणि यस्याः सा हतसर्वास्त्रा, 'Who is deprived of all her missiles'. कटाक्षशरशेषा—Analyse कटाक्षाः एव शराः कटाक्षशराः ते शेषं यस्याः सा, 'With a residue (or remainder) of arrows of her side glances.' चण्डी [चण्डा]—The goddess Durgà, especially in the form she assumed for the destruction of the Asura called Mahisha. केन इयं चण्डी कटाक्षशरशेषा कृता—'Having been injured (or beaten) and deprived of all her missiles in a battle, by whom is this goddess Chandî made to hold a bow exclusively consisting of her eyebrows and with a residue of arrows of her side glances?'

St. 30. प्रमथानां—Construe असुरद्विषां नायकस्य प्रमथानामधीशस्य महः कूटस्थोऽपि शोषवैकृतं किं नु सेवते. प्रमथानामधीशस्य—'Lord of Prmathas i. e. गणेश.' प्रमथ is the class of fiends attending on S'iva, and गणेश is their lord. There are troops or classes of inferior deities especially certain troops of demigods considered as S'iva's attendants and under the special superintendence of god Gaṇapati. *Cf.* Kálikápurâṇa. "नाना रूपधरा ये वै जटाचन्द्रार्धमण्डिताः । ते सर्वे सकलैश्वर्ययुक्ता ध्यानपरायणाः । संसारविमुखाः सर्वे यतयो योगतत्पराः । सिंहव्याघ्रादिसारूप्या अणिमादिसमावृताः । अपरे प्रमथाः शंभोः प्रमथास्तथा स्मृताः । विचित्ररूपाभरणा जटाचन्द्रार्ध-

माण्डिताः । आकाशमार्गे गच्छन्तमनुगच्छन्ति नित्यशः । ध्यानस्थं परिचर्यन्ति सलिलादिभिरीश्वरम् । नानाशस्त्रधराः शंभोर्गणास्तु प्रमथाः स्मृताः । अपरे गायनास्तालमृदङ्गपणवादिभिः । नृत्यन्ति वाद्यं कुर्वन्तो गायन्ति मधुरस्वरम् । षट्त्रिंशत्कोटयश्चैते हरस्य सकला गणाः. " माथकः [माठकः] or माथः [माठः]—' A guide who leads another in his way or course. ' ' One who conducts another safely in a road. ' असुरद्विषां—Analyse असुरान् द्विषन्तीति असुरद्विषः तेषां तादृशानां, ' Of the haters of demons i. e. of the gods. ' कूटस्थः—Analyse कूटे तिष्ठतीति कूटस्थः, ' Standing at the top.' ' Keeping the highest position. ' ' Immovable, ' ' uniform, ' ' unchangeable. ' शोषवैकृतं—Analyse शोषस्य वैकृतं शोषवैकृतं, ' Undergoing a chage of dryness. ' ' A change into dryness. ' मद *m.*—' The juice or ichor that exudes from an elephant's temples when in rut. ' प्रमथानामधीशस्य मदः कूटस्थोऽपि शोषवैकृतं किं नु सेवते—'Though lying on (or flowing from) the top of the temples (or occupying the highest position) why does the rutting-juice of the lord of the Pramathas who is a guide to (or the leader of) the haters of the demons, undergo a change of dryuess ? '

St. 31. वक्त्रश्वासाग्नि°—Construe वक्त्रश्वासाग्निपिंगांगकर्कोटाबद्धकन्धरः नागशोणितदिग्धास्यः तार्क्ष्यः किं नु राजशुकायते. वक्त्र°—Analyse वक्त्रस्य श्वासः स एव अग्निः तेन पिंगानि अंगानि यस्य स वक्त्रश्वासाग्निपिंगांगः स चासौ कर्कोटश्च वक्त्रश्वासाग्निपिंगांगकर्कोटः तेन आबद्धा कन्धरा यस्य स वक्त्रश्वासाग्निपिंगांगकर्कोटाबद्धकन्धरः, ' Having his neck bound up by the serpent Karko*t*aka whose body has become reddish-brown by flames of fire of the exhalations from his mouth. ' नागशोणितदिग्धास्यः—Analyse नागानां शोणितं तेन दिग्धं आस्यं यस्य स तादृशः, ' Having his mouth smeared with the blood of snakes. ' राजशुकायते—*Denomi. 3rd. per. sing.* ' Acts the part of a Royal parrot. ' ' Resembles a Royal parrot. ' (राजशुक इव आचरति or राजशुको भवति). तार्क्ष्यो किं नु राजशुकायते —' How is it that Garu*d*a acts the part of a Royal parrot, who has his mouth smeared with the blood of snakes, and who has his neck bound up by the serpent Karko*t*aka whose body has become reddish-brown by flames of fire of the exhalations from his mouth ?'

St. 32. सा—Construe अस्य च वासुकेः सा अग्निजिह्वातडिज्जालनद्धा फणावली वर्षान्ते घनश्रेणीव किं नु ध्मायति. अग्निजिह्वा°—Analyse अग्नियुक्ताः जिह्वाः अग्निजिह्वाः ता एव तडिज्जालं तेन नद्धा अग्निजिह्वातडिज्जालनद्धा, ' Girded round by a net of lightnings in the form of the fiery tongues. ' फणावली—Analyse फणानां आवली फणावली, ' A row of snake-hoods. ' घनश्रेणीव—Analyse घनानां श्रेणी घनश्रेणी, ' Like a line of clouds. '

वासुकिः—King of the Nágas or serpents who live in Pátála. He was used by the gods and Asuras for a coil round the mountain Mandara at the churning of the ocean. वर्षान्ते घनश्रेणिव वासुकेरस्य फणावली किं नु म्लायति—'And why does the row of hoods, of this Vásuki, girded round by a net of lightnings in the form of the fiery tongues, fade away like a line of clouds at the close of the rainy season ?'

St. 33. पृष्टवन्तं—Construe इति पृष्टवन्तं धिषणागम्यं अव्ययं जगदीश्वरं प्रभुः प्राज्ञः प्रांजलिर्धिषणो जगाद. प्रांजलिः—Analyse प्रबद्धो अंजलिर्येन सः, 'Who has formed a cavity of his hands,' i. e. with folded hands. धिषण *m.*—One of the names of B*ri*haspati, preceptor of the gods and regent of the planet Jupiter. Any Guru or spiritual preceptor. The intelligent one. धिषणागम्यं—Analyse धिषणया गम्यः धिषणागम्यः तं तादृशं, 'Accessible by knowledge or praise (hymns).' धिषणा *f.*–'Speech,' 'praise,' 'hymn,' 'intlligence,' 'intelleet,' 'understanding,' 'knowledge.' जगदीश्वरं—Analyse जगतां ईश्वरः जगदीश्वरः तं तादृशं, 'The lord of the worlds. इति पृष्टवन्तं जगदीश्वरं प्राञ्जलिर्धिषणो जगाद—'With folded hands, B*ri*haspati, the wise leader (of the gods), addressed the Eternal Lord of the universe, accessible only by knowledge (or praise) and who was thus inquiring after every god.'

St. 34. त्वया—Construe हे सर्वज्ञ त्वयेदं विज्ञातमेव [तथापि] पुनरुच्यते स्वामिनि [स्वामिने] स्वार्तिजल्पने भृत्यानां असौहित्यं हि. *Cf.* Ku. II. 31. "एवं यदात्थ भगवन्नामृष्टं नः परैः पदं। प्रत्येकं विनियुक्तात्मा कथं न ज्ञास्यसि प्रभो ॥." सर्वज्ञ—Analyse सर्वं जानातीति सर्वज्ञः तत्संबुद्धिः सर्वज्ञ, 'All-knowing,' 'all-wise,' 'omniscient.' असौहित्यं—Analyse न सौहित्यं असौहित्यं, 'Insatiableness,' सौहित्य *n.*—'Satiety.' 'Satisfaction.' स्वार्तिजल्पने—Analyse स्वार्तीनां जल्पनं स्वार्तिजल्पनं तस्मिन् तादृशे, 'Giving vent to one's own pain or evil.' 'Misfortune.' Maráthi students will recognize in this, their usual expression 'रडगाणे गाणे.' स्वार्ति *f.*—'Ones own pain or misfortune or evil.' हे सर्वज्ञ त्वयेदं विज्ञातमेव [तथापि] पुनरुच्यते—'Thou hast, O ominiscient Lord, already read our thoughts (or known what passes in our minds), however I will again give vent to them.' स्वामिनि [स्वामिने] स्वार्तिजल्पने भृत्यानां असौहित्यं हि—'For there is an insatiableness in the servants in the matter of giving vent to their misfortunes in the presence of their lord.'

St. 35. मानिनां—Construe पुलस्त्यसुतसंभवो दर्पीकृतजगद्रक्षो रक्षोनाथो दशाननो मानिनामग्रणीरस्ति. पुलस्त्यसुतसंभवः—Analyse पुलस्त्यस्य ब्रह्मणो मानसपुत्रस्य सुतो यो विश्रवाः तस्मात् संभवो यस्य स तादृशः, 'Sprung from the son of Pulastya' i. e. born of Vis'ravas, the son of Pulastya.

दर्पोद्धृतजगद्रक्षः—Analyse दर्पेण उद्धृता जगतां रक्षा येन स तादृशः, 'One who has eradicated the preservation of the world through haughtiness.' रक्षोनाथः—Analyse रक्षसां नाथो रक्षोनाथः, 'The lord of demons.' दशाननः—Analyse दश आननानि यस्य सः, 'Having ten faces.' 'An epithet of Rávaṇa.' रक्षोनाथो दशाननो मानिनामग्रणीरस्ति—'There rules a lord of the demons, Das'ánana by name born of the son of पुलस्त्य the foremost of the haughty, who from his innate haughtiness, has, O Lord, uprooted the preservation (of the world or the peace of the world).'

St. 36. स—Construe जगन्नाशफलाय फलसाधनः महौजाः स च चीरी निर्विकारः सन् महत्तपः चिरं चचार. महौजाः—Analyse महदोजो यस्य स महौजाः, 'Of great prowess or might.' 'Of great power.' जगन्नाशफलाय—Analyse जगतां नाशो जगन्नाशः स एव फलं तस्मै, 'In order to secure the fruit or end, consisting of the destruction of the world.' फलसाधनः—Analyse फलमेव साधनं यस्य सः, 'Wanting to effect an end (*lit.* fruit).' 'Wanting to attain an end or object.' निर्विकारः—Analyse निर्गतो विकारो यस्मात् सः, 'Possessing an unchangeable nature.' 'Having a nature showing no change.' 'unchangeable.' चीरिन् *m.*—'Wearing a red garment suitable to an ascetic.' 'Clothed in bark.' स महौजाः निर्विकारः सन् महत्तपः चिरं चचार—'That demon of great power clothed in bark wanting to attain an end, with his mind unchanged, practised rigorous asceticism for a long time for securing the fruit consisting of the destruction of the world.'

St. 37. मातङ्ग°—Construe मातङ्गमकरक्रूरदन्तोल्लिखितवक्षसा तेन उदन्वति व्रतयताहारं तपस्तप्तं. मातङ्गमकर°—Analyse क्रूराश्च ते दन्ताश्च क्रूरदन्ताः । मातङ्गमकराणां क्रूरदन्ताः तैः उल्लिखितं वक्षो यस्य स तेन तादृशेन, 'Having the breast torn asunder by sharp tusks of marine animals (known as मातङ्गमकराः)'. 'With his breast scratched by the sharp tusks of marine animals.' व्रतयताहारं—Analyse व्रताय यतो नियतः आहारो यस्मिन् तत् तादृशं 'Taking food in which had been checked (or controlled) from a vow.' तेन उदन्वति व्रतयताहारं तपस्तप्तं—'With his breast (severely) wounded by the sharp tusks of marine animals, he practised in the ocean, religious austerities, taking food in which had been checked from his pious vow.'

St. 38. तत्तपस्तोषितः—Construe तत्तपस्तोषितः चतुर्मुखो विश्वेशः चतुराय वीराय तस्मै जगद्द्रव्यं जेतुं वरं प्रादात्. तत्तपस्तोषितः—Analyse तस्य तपः तत्तपः तेन तोषितः तत्तपस्तोषितः, 'Having been gratified by his religious austerities.' चतुर्मुखः—Analyse चत्वारि मुखानि यस्य सः, 'Having four faces.' 'An epithet of Brahmá.' The first member of the

Hindu triad; the supreme spirit manifested as the active creator of the universe. He sprang from the mundane egg deposited by the supreme first cause, and is the Prajápati, or lord and father of all creatures, and in the first place of the *R*ishis or Prajápatis. Brahmà is said to be of a red colour. He has four heads, originally he had five, but one was burnt off by the fire of S'iva's central eye because he had spoken disrespectfully. His vehicle is a swan or goose, from which he is called हंसवाहन. His residence is called ब्रह्मवृन्दा. The name ब्रह्मा is not found in the Vedas and Bráhmaṇas, in which the active creator is known as हिरण्यगर्भ, Prajàpati, &c.; but there is a curious passage in the S'atapatha Bráhmaṇa which says : "He (Brahman, neuter) created the gods. Having created the gods, he placed them in these worlds: in this world Agni, Váyu in the atmosphere, and सूर्य in the sky." Two points connected with Brahmà are remarkable. As the father of men he performs the work of procreation by incestuous intercourse with his own daughter, variously named वाच् or सरस्वती (speech) सन्ध्या (twilight), Satarúpà (the hundred-formed), &c. विश्वेश:—Analyse विश्वस्य ईश: विश्वेश:, 'The lord of the universe.' जगद्द्वयं—Analyse जगतां द्वयं जगद्द्वयं 'Two worlds.' The Ràmàyaṇa cites the following legend of Ràvaṇa's rigorous asceticism and his propitiation of the god Brahmà. 'And as in the tenth year he intended to strike off his tenth head, the Great-father presented himself at that place. And well-pleased, the Great-father came there along with the celestials. 'O Ten-necked one,' said (the Great-father). 'I am well-pleased with thee. Do thou, O thou cognizant of righteousness, at once ask for the boon that thou wishest to have. What wish of thine shall I realize? Thy toil must not go for nothing.' Thereat, the ten-necked one, bowing down his head unto the deity, said with a delighted heart,—his words faltering with ecstacy,—'O Revered one, creatures have no other fear than (that of) death; and enemy there is none that is like unto death. Therefore immortality is even what I crave for.' Thus accosted ब्रह्मा spoke unto the ten-necked one,—'Thou canst not be immortal. Do thou therefore ask of me some other boon.' Thus addressed by the Creator, ब्रह्मा, the Ten-necked one, O Ràma, standing before him with joined hands, said,—'O Lord of creatures, I would, O eternal one, be incapable of being slain by birds and serpents, Yakshas, Daityas, Dánavas and Ràkshasas and the deities; for,

O thou that art worshipped by the immortals, anxiety I have none from any other beings. Indeed, I deem as straw creatures such as men &c. ' Thus accosted by the Rakshas—the Ten-necked one—that rightious-souled one, the Great-father, along with the celestials, said,—' O formost of Ràkshasas, what thou sayest shall come to pass. ' Having, O Ráma, said this unto the Ten-necked one, the Great-father (again spoke),—' Here ! I, having been gratified, will confer on thee a fresh boon. O Rákshasa, O sinless one, those heads of thine which have been offered as sacrifices and which have sunk into the fire, shall again be thine. And, O placid one, I shall also confer on thee another boon difficult of being obtained,—The form that thou shalt wish to wear, shall instantly be thine.' As soon as the Great-father had spoken thus, the heads that had been offered as sacrifices into the fire, rose up again.' See Rámáyana, Uttarkán*d*a, canto X. चतुर्मुखो वीराय तस्मै जगद्द्वयं जेतुं वरं प्रादात्—' Having been (extremely) gratified by asceticism, the god Brahmá, the lord of the universe, conferred a boon of conquering two worlds on that skillful warrior.'

St. 39. स—Construe कदाचित् स नाकौकसामरिः हारगौरं हरस्थानं रटन्नागं नगं पटुनादं [यथा तथा] व्यपाटयत्. रटन्नागं—Analyse रटन्तो नागा यत्र स रटन्नागः तं तादृशं, ' Having (a herd of) roaring elephants'. नाकौकसां—Analyse नाकः ओको येषां ते नाकौकसः तेषां, 'Making Svarga their abode.' हारगौरं—Analyse हारवद् गौरो हारगौरः तं तादृशं, ' White like garlands of flowers.' हरस्थानं-Analyse हरस्य स्थानं हरस्थानं, 'The residence of Hara' (i. e. S'iva). पटुनादं *adv*—Analyse पटुर्नादो यस्मिन् तत् यथा स्यात् तथा, 'Terribly roaring.' A Bahuvrîhi compound used as an adverb. *Cf.* बहुविधं, सकम्पं &c. कदाचित् स रटन्नागं नगं पटुनादं [यथा तथा] व्यपाटयत्— ' Once upon a time, that enemy of the gods (*lit* heaven-dwellers) tore up, with a terrible noise, the mountain, (which was) the abode of Hara, white like garlands of flowers and having roaring elephants.'

St. 40. स्फुरत्—Construe स्फुरन्नगशिरस्त्यक्तैः उन्नदन्नदनिर्झरैः पूषणि स्पृष्टे क्षणाद् घोरं झङ्कारं आतन्वति सति. स्फुरन्नगशिरस्त्यक्तैः—Analyse स्फुरन् यो नगः हिमाद्रिः तस्य शिरोभिः शिखरैः त्यक्तास्तैः तादृशैः, ' Let down by the summits of the mountain that was being shaken or moved. ' उन्नदन्नदनिर्झरैः—Analyse उन्नदन्तो ये नदाः तेषां निर्झराः तैः तादृशैः, ' By the torrents of the roaring rivers. ' नद *m*—' A river. ' ' A great river. ' Mallinàtha commenting on S'is'upálavadha, IV. 66. thus distinguishes between नद and नदी, " प्राक्स्रोतसो नद्यः प्रत्यक्स्रोतसो नदाः । नर्मदां विनेत्याहुः."

Mark the use of the absolute construction commencing from this up to 48th stanza. झङ्कार *m.*—'A low murmuring sound.' पूषणि स्पृष्टे क्षणाद् घोरं झङ्कारं आतन्वति सति—'While the sun, being touched by the torrents of great roaring rivers, come down from the head of the mountain that was shaking, was making a low murmuring sound',–

St. 41. वाजिनः—Construe अद्रिपातभीत्या अर्कसारथौ प्रग्रहाकृष्टखलीनावक्रकन्धरान् वाजिनः एकतो जवयति [सति]. प्रग्रहाकृष्टखलीनावक्रकन्धरान्—Analyse प्रग्रहैः आकृष्टानि खलीनानि तैरावक्राः ईषद्वक्राः कन्धरा येषां ते तान् तथोक्तान्, 'Having a curving bent of their necks on account of the bits of the bridles being forcibly drawn in by the reins'. जवयति—'Speeding.' 'Hastening.' Denomi. *pre. parti. loc. sing.* from जवः [जवं करोति]. अद्रिपातभीत्या—Analyse अद्रेः पातः अद्रिपातः तस्माद् या भीतिः तया, 'From fear of the fall of the mountain,' i. e. fearing lest the mountain would fall down. अर्कसारथौ—Analyse अर्कस्य सारथिः अर्कसारथिः तस्मिन् तादृशे, 'The charioteer of the sun.' i. e. Aruṇa. अद्रिपातभीत्या अर्कसारथौ वाजिनः एकतो जवयति [सति]—'When the charioteer of the sun was speeding to one side, the horses whose necks were slightly bent consequent on the bits of the bridles, being forcibly drawn in by the reins,–'

St. 42. घूर्णमान°—Construe घूर्णमानमहाशैलतटभ्रष्टे निर्झरे मत्तस्य उत्तरीये इव स्वस्थानं त्यजति [सति]. घूर्णमानमहाशैलतटभ्रष्टे—Analyse घूर्णमानो यो महाशैलः तस्य तटाद् भ्रष्टः तस्मिन्, 'Fallen down from the acclivity of the great mountain which was being agitated or turned round.' स्वस्थानं—Analyse स्वस्य स्थानं स्वस्थानं, 'Its own site.' मत्तस्य उत्तरीये इव निर्झरे स्वस्थानं त्यजति सति—'When the mountain-spring like a drunkard's upper garment was leaving its site, having fallen down from the acclivity of the great mountain, which was, often and often, in the process of being turned round,–'

St. 43. गौरी°—Construe गौरीभयपरिष्वंगस्पर्शलब्धमहोत्सवे संक्रुद्धधूर्जटिक्रोधप्रतिलोमप्रवर्तिनि [सति]. गौरी°—Construe गौर्याः भयं गौरीभयं तस्मात् यः परिष्वंगः तस्य स्पर्शेन लब्धो महोत्सवो येन तस्मिन् तादृशे, 'When there arose the great joy (accidentally) won (or attained) by the contact of an embrace from Gaurî overcome by fear.' गौरि—प्राक् कृष्णवर्णत्वेन जातत्वेऽपि पश्चात् पीतांगत्वात् तथात्वं—"योगाग्निदग्धदेहा सा पुनर्जाता हिमालये। शंखेन्दुकुंदधवला ततो गौरीति सा स्मृता." संक्रुद्धधूर्जटिक्रोधप्रतिलोमप्रवर्तिनि--Analyse संक्रुद्धश्चासौ धूर्जटिश्च संक्रुद्धधूर्जटिः तस्य क्रोधः तस्मात् प्रतिलोमेन प्रवर्तितुं शीलं यस्य तस्मिन्, 'Which had a nature to proceed contrary

to the wrath of Dhûrja*ti*, greatly enraged (or incensed),–' प्रतिलाम *adj.* Contrary to the natural course or order,' 'reverse' &c. opposed to अनुलोम *adj.* which means, 'in a natural direction,' 'in a regular order.'

St. 44. कपालनयनच्छिद्रं—Construe उत्त्रासविह्वले जटाबद्धफणावति संकोचितफणाचक्रं कपालनयनच्छिद्रं विशति [सति]. कपालनयनच्छिद्रं—Analyse कपाले यन्नयनं कपालनयनं तस्य छिद्रं कपालनयनच्छिद्रं, 'The socket of the eye on the forehead.' जटाबद्धफणावति—Analyse जटासु आबद्धः फणावान् जटाबद्धफणावान् तस्मिन् जटाबद्धफणावति, 'A hooded snake tied round the matted-hair (of S'iva).' सङ्कोचितफणाचक्रं—Analyse सङ्कोचितानि फणानां चक्राणि यस्य तत्, 'Having a contracted circle of hoods.' उत्त्रासविह्वले—Analyse उत्त्रासेन विह्वलः उत्त्रासविह्वलः तस्मिन्, 'Alarmed by terror or danger.' जटाबद्धफणावति कपालनयनच्छिद्रं विशति [सति], 'When the hooded snake, tied up round the matted-hair, being alarmed by terror, was about to rush into the socket of the eye on the forehead with having contracted the circle of its hoods,–'

St. 45. परित्रस्ते—Construe मातुरुत्सङ्गसङ्गिनि परित्रस्ते कुक्वाकुध्वजे कार्तस्वरमयं मेषं गोपयति [सति]. कुक्वाकुध्वजे—Analyse कुक्वाकुर्मयूरो ध्वजे यस्य स तस्मिन् तादृशे, 'Having the banner bearing on its cloth a picture of a peacock.' 'An epithet of Kártikeya, Pàrvatî's son.' कार्तस्वरमयं Expl:—कार्तस्वररूपं कार्तस्वरमयं, 'Made of burnished gold.' उत्सङ्गसङ्गिनि—Analyse उत्सङ्गं सजतीति उत्सङ्गसङ्गी तस्मिन्, 'Fond of lying on a lap.' 'Fully attached to a lap.' परित्रस्ते कुक्वाकुध्वजे कार्तस्वरमयं मेषं गोपयति [सति]—'When the frightened peacock-bannered god, fond of lying on his mother's lap, was trying to guard or protect his ram, made of burnished gold,–'

St. 46. उत्पश्यति—Construe क्रोधरोधार्तचेतसि ककुद्मनि भर्तुर्भ्रूभागभङ्गस्य प्रादुर्भावं चिरं धीरं उत्पश्यति [सति] क्रोधरोधार्तचेतसि—Analyse क्रोधस्य रोधः क्रोधरोधः तेन आर्तं चेतो यस्य स तस्मिन् तादृशे, 'With a mind disturbed by the arresting of his anger (or controlling wrath).' भ्रूभागभङ्गस्य—Analyse भ्रुवोर्भागौ भ्रूभागौ तयोर्भंगः भ्रूभागभङ्गः तस्य तादृशस्य, 'The contraction or knitting of the curves of the eyebrows.' ककुद्मिन् *m.*—'A bull with a hump on his shoulders.' An allusion to नान्दिन् the doorkeeper of S'iva. ककुद्मनि भर्तुभ्रूभागभङ्गस्य प्रादुर्भावं चिरं धीरं उत्पश्यति [सति]—'When the great bull, with mind disturbed by the arresting of his wrath, was steadily, for a long time, looking at the forth-coming result of his lord's knitting his eyebrows,–'

Sts. 47-48. रूढमूलमिव—Construe गौरीपतिः अधोलग्नैः श्वेतैः भुजङ्गमैः रूढमूलमिव [तथा] अग्रस्थस्फुरन्नक्षत्रमण्डलैः प्रौढपुष्पमिव रणत्सिंहकुलाकुलगुहामुखं कुञ्जगुञ्जत्सिंधुं गिरिं चरणेन न्यपीडयत्. रूढमूलं–Analyse रूढानि मूलानि यस्य स तं तादृशम्, 'Having its roots fully developed.' 'Having its roots stuck deep down.' प्रौढपुष्पं—Analyse प्रौढानि पुष्पाणि यस्य स तं तादृशं, 'Displaying a full growth of flowers.' 'Possessing a complete growth of flowers.' अग्रस्थस्फुरन्नक्षत्रमण्डलैः—Analyse अग्रे तिष्ठन्तीति अग्रस्थानि। नक्षत्राणां मण्डलानि नक्षत्रमण्डलानि। स्फुरन्ति च नक्षत्रमण्डलानि च स्फुरन्नक्षत्रमण्डलानि। अग्रस्थानि च स्फुरन्नक्षत्रमण्डलानि च अग्रस्थस्फुरन्नक्षत्रमण्डलानि तैः तादृशैः, 'With flashing planetary circles resting on the top.' रणत्सिंहकुलाकुलगुहामुखं—Analyse सिंहानां कुलं सिंहकुलम्। रणच्च तत् सिंहकुलं च रणत्सिंहकुलं तेन आकुलानि गुहानां मुखानि यस्य स तं तादृशं, 'With the mouths of caves filled with multitudes of roaring lions.' गौरीपतिः—Analyse गौर्याः पतिः गौरीपतिः, 'The lord of Gaurí' i. e. S'iva. कुञ्जगुञ्जत्सिन्धुं—Analyse कुञ्जेभ्यः गुञ्जन्तः सिन्धवः यस्मिन् स तं तादृशं, 'With thundering streams running from the arbours.' गौरीपतिः कुञ्जगुञ्जत्सिन्धुं गिरिं चरणेन न्यपीडयत्—'With his foot, the lord of Gaurí pressed down the mountain, with its thundering streams running forth from arbours, with ths openings of caves filled with multitudes of roaring lions and displaying, as it were, a full growth of flowers by means of flashing planetary circles resting on its top and having, as it were, its roots stuck deep down by means of white serpents dangling down.'

St. 49. धराधरभराक्रान्ते—Construe धराधरभराक्रांते बाहौ रावणेन बहुभिराननैः दिक्षु दीर्घप्रतिक्रोशो रवः कृतः. धराधरभराक्रान्ते—Analyse धरायाः धरः धराधरः तस्य भरेण आक्रान्तः तस्मिन् धराधरभराक्रान्ते, 'Pained by an overloading burden of the mountain.' दीर्घप्रतिक्रोशः—Analyse दीर्घश्चासौ प्रतिक्रोशश्च दीर्घप्रतिक्रोशः, 'A far-reaching reverberation of sound in echoes.' रावणेन बहुभिराननैः दिक्षु दीर्घप्रतिक्रोशो रवः कृतः—'With his arms severely pained by an overloading burden of the mountain, Rávaṇa with many months made a terrible roar in the quarters, the far reaching sound of which resounded with echoes.'

St. 50. तं—Construe स नीलकुट्टिमविन्यस्तैः कौंकुमैः मण्डलैरिव शिरश्छेदव्रणचक्रैः तं देवं अपूजयत्. शिरश्छेदव्रणचक्रैः—Analyse शिरसां छेदानां व्रणान्येव चक्राणि तैः शिरश्छेदव्रणचक्रैः, 'With circles of wounds due to severing of his heads.' नीलकुट्टिमविन्यस्तैः—Analyse नीलश्चासौ कुट्टिमश्च नीलकुट्टिमः तत्र विन्यस्ताः तैः तादृशैः, 'Laid on a blue paved floor.' कौंकुमैः Expl:—कुंकुमस्य विकाराः कौंकुमाः तैः, 'Made of the saffron powder.' स शिरश्छेद-

व्रणचक्रैः तं देवं अपूजयत्—'He worshipped that god with circles of wounds due to the severing of his heads, as if with circles of of saffron powder laid on a blue paved floor.'

St. 51. आज्ञापयितुं—Construe दश दिशो आज्ञापयितुं शूलिना एतस्य राक्षसस्य पंक्तिसंख्यानि वक्त्राणि पुनः सृष्टानि. पंक्तिसंख्यानि—Analyse पंक्तिर्दश संख्या येषु तानि तादृशानि, 'Possessing the number or ten.' *Cf.* पंक्तिरथः' दिशः आज्ञापयितुं शूलिना एतस्य राक्षसस्य वक्त्राणि पुनः सृष्टानि—'In order to carry out the command of this demon in the regions of ten quarters, the S'ûla-bearing god (or trident-bearing god) again created his faces, bearing the number of ten.'

St. 52. तमःस्थानं—Construe हे अज रणे तमःस्थानं बालिशं तं रावणं आसाद्य विकुण्ठितं सत् वैकुण्ठस्य शक्रस्य कुलिशं वज्रं स्वं धाम तेजः अजहात्. तमःस्थानं —Analyse तमः एव स्थानं यस्य स तमःस्थानस्तं तादृशं, 'An abode of the quality of darkness.' वैकुण्ठ *m.*—'An epithet of Indra as well as of Krishna.' *Cf.* विश्व and मेदिनी, "वैकुण्ठः कृष्णशक्रयोः". Hemachandra has:- "वैकुण्ठो वासवे विष्णौ." रणे तमासाद्य वैकुण्ठस्य कुलिशं स्वं धाम अजहात्— 'Having come in collision with (or having encountered) that foolish demon, the abode of the quality of darkness, in a battle, the thunderbolt of Indra instantly losing its power gave up, O Unborn Being, its native fiery energy.'

St. 53. तं—Construe वासवः स्वयं अजय्यं एकवीरं तं वैरस्य शान्तये अनवद्येन वसुना अद्यापि पूजयति. अनवद्येन—Analyse न अवद्यं अनवद्यं तेन अनवद्येन, 'Faultless,' 'shining,' 'brilliant,' 'pure,' 'clean.' अजय्यं—Expl. जेतुमशक्यं अजय्यं, 'Invincible.' एकवीरं—Analyse विशेषेण शत्रूनीरयतीति वीरः। एकश्चासौ वीरश्च एकवीरः तं तादृशं, 'A sole warrior (on earth).' वसु *n.*—'Water.' 'Gold.' 'Gem.' वासवः स्वयं तमेकवीरं अनवद्येन वसुना अद्यापि पूजयति—'Him ever victorious and the sole warrior on (earth) adores even now Indra in person by giving him clear water (or shining gems or burnished gold) in order to calm down (the fire of) his animosity.'

St. 54. बलिं—Construe विगतादरा सस्मितं वज्राय बलिं कुर्वती पौलोमी व्रीडासन्नमिताननं शक्रं कुरुते. विगतादरा—Analyse विगतः आदरो यस्याः सा तादृशी, 'She from whom respect is departed,' i. e. having no sense of respect or honour.' व्रीडासन्नमिताननं—Analyse व्रीडया सन्नमितं आननं येन स व्रीडासन्नमिताननः तं तादृशं, 'Who has hung down his face with the feeling of shame.' पौलोमी व्रीडासन्नमितानं शक्रं कुरुते—'Paulomi, wanting in the sense of respect and making an offering to वज्र

with smiles, makes Indra hang down his face with the feeling of shame.'

St. 55. यक्षनाथः—Construe यक्षनाथः तस्मै धनं दिशन् केवलं धनदः [आस्ते] सर्वस्वहरणप्रीतः रावणस्तु धनेश्वरो [बभूव]. यक्षनाथः—Analyse यक्षाणां नाथः यक्षनाथः, 'The lord of the demi-gods.' He was the son of Vis'ravas by इडाविडा, but he is sometimes called son of पुलस्त्य, who was father of विश्रवस्. This is explained by the Mahábhàrata, according to which Kubera was son of पुलस्त्य, but that sage being offended with Kubera for his adulation of Brahmà, "reproduced the half of himself in the form of विश्रवस्," and had Rávana and other children. Kubera's city is Alaká (also called प्रभा, वसुधरा, and वसुस्थली) in the Himálayas, and his garden चैत्ररथ on मन्दर, one of the spurs of mount Meru, where he is waited upon by the Kinnaras. Some authorities place his abode on mount Kailàsa in a palace built by विश्वकर्मन्. He was half-brother of Rávaṇa, and, according to the Ràmàyaṇa and Mahàbhárata, he once had possession of the city of Lanká in Ceylon, which was also built by विश्वकर्मन्, and from which he was expelled by Rávaṇa. The same authority states that he performed austerities for thousands of years, and obtained the boon from Brahmá that he should be immortal, one of the guardian deities of the world, and the god of wealth. So he is regent of the north, and the keeper of gold and silver, jewels and pearls, and all the treasures of the earth, besides nine particular Nidhis, or treasures, the nature of which is not well understood. Brahmà also gave him the great self-moving aerial car, पुष्पक. धनदः—Analyse धनं ददातीति धनदः, 'Bestower of wealth.' An epithet of Kubera. सर्वस्वहरणप्रीतः—Analyse सर्वस्वस्य हरणं सर्वस्वहरणं तस्मात् प्रीतः सर्वस्वहरणप्रीतः, 'Gratified by the seizure or confiscation of the whole of his property.' धनेश्वरः—Analyse धनानां ईश्वरः धनेश्वरः, 'The lord of riches.' यक्षनाथः धनदः तस्मै केवलं धनं दिशन् [आस्ते]—'Kubera, the lord of the demi-gods, giving him his wealth is only (in name) Dhanada.' सर्वस्वहरणप्रीतः रावणस्तु धनेश्वरो [बभूव]—'But Rávaṇa, gratified by the seizure of the whole of his property, has, in truth, become the lord of riches.'

St. 56. धर्म्यं—Construe प्रेतराजोऽपि धर्म्यं कर्म परित्यज्य पिशितप्रियं दानवं अभिप्रेतभक्ष्यदानेन प्रीणाति. धर्म्यं, Expl:—धर्मादनपेतं, 'Consistent with duty.' 'Not deviating from merit.' 'Just.' "धर्मपथ्यर्थ-

न्यायादनपेते " Páṇini IV-4-92. 'The affix यत् comes in the sense of 'not deviating therefrom,' after the words 'धर्म,' 'पथिन्,' 'अर्थ,' and 'न्याय' being in the ablative case in construction.' As पथ्यम् । शास्त्रीयात् पथो यदनपेतं तत्पथ्यम् । न तु तस्मादनपेतश्चोरः । 'Wholesome diet.' अर्थ्यं, 'fit,' न्याय्यं, 'Just,' 'suitable.' प्रेतराजः — Analyse प्रेतानां राजा प्रेतराजः, 'A king of the dead.' An epithet of Yama. "राजाहःसखिभ्यष्टच्" Páṇini. V-4-91. 'The affix टच् [अ] is added to the words राजन्, अहन्, and सखि, when standing at the end of a तत्पुरुष compound'. As परमाहः, कृष्णसखः &c. अभिप्रेतभक्ष्यदानेन—Analyse अभिप्रेतं यद्भक्ष्यं तस्य दानं तेन अभिप्रेतभक्ष्यदानेन, 'By making an offer of an approved diet (or edibles).' प्रेतराजो दानवं अभिप्रेतभक्ष्यदानेन प्रीणाति—'Even the king of the dead (i. e. Yama) keeping aside the work, consistent with duty, gratifies the demon fond of flesh (or meat), by offering him an approved diet (or edibles).'

St. 57. दूरतः—Construe च्युते हुताशने तन्मन्दिरद्वारदाहभीतो भानुः आदित्यमणितोरणाद् दूरतः [एव] सेवते. तन्मन्दिरद्वारदाहभीतः—Analyse तस्य मन्दिराणि तन्मन्दिराणि तेषां द्वाराणां दाहः तस्माद् भीतः तन्मन्दिरद्वारदाहभीतः, 'Afraid of the burning of the doors of his palaces.' आदित्यमणितोरणात्—Analyse आदित्यमणयः सूर्यकान्तमणयः तैः घटितात्तोरणात् आदित्यमणितोरणात्,—'From arches made of the sun-gems.' तन्मन्दिरद्वारदाहभीतो भानुः दूरतः सेवते—'Being afraid of the burning down of his palace doors from emitted fire, the sun-god waits on (or serves) him from a long distance from the arches made of the sun-gems.'

St. 58. निवृत्त°—Construe निवृत्ततत्सरःपद्मस्वापकारणतेजसा इन्दुना अशेषं कौमुदं वनं बोधनीयं किल. निवृत्त°—Analyse तस्य सरांसि तत्सरांसि तेषां पद्मानि तत्सरःपद्मानि तेषां स्वापः तस्य कारणं तेजः तत्सरःपद्मस्वापकारणतेजः । निवृत्तं तत्सरःपद्मस्वापकारणतेजो यस्य स निवृत्ततत्सरःपद्मस्वापकारणतेजाः तेन तादृशेन, 'Whose light, (which was) the cause of closing (*lit.* lulling to sleep) the full blown lotuses of his lakes, has now turned back from (or given up) its usual duty'. अशेषं कौमुदं वनं इन्दुना बोधनीयं किल—'Now probably the moon ought to rouse (or must cause to expand) the whole of the forest of moon-lotuses'. According to the poets, two duties are generally assigned to the moon namely one is to close the sun-lotuses and another to open the moon-lotuses. But the moon is represented as being afraid of incurring the displeasure of Rávaṇa by closing the sun-lotuses and so allowed them to remain in their full-blown state, as if, they were smiling under the sunshine. Being thus

deprived of one of his functions, he will naturally devote his sole attention to the other duty namely opening the night-lotuses.

St. 59. यथा—Construe कज्जलस्पर्शचित्रवैवर्ण्यसम्भवो यथा न [भविष्यति] तथा दीपकृत्यो वृषाकपिः ज्वलितुमादिष्टः. कज्जलस्पर्शचित्रवैवर्ण्यसम्भवः—Analyse कज्जलस्य स्पर्शः कज्जलस्पर्शः तेन चित्राणां वैवर्ण्यस्य संभवः कज्जलस्पर्शचित्रवैवर्ण्यसम्भवः, 'The possibility of discolouring the pictures from touch of collyrium (*lit.* soot).' दीपकृत्यः—Analyse दीपानां कृत्यं यस्य स दीपकृत्यः, ' Doing the business of lamps. ' ' Filling the office of lamps. ' वृषाकपि *m.* ' The fire-god. ' दीपकृत्यो वृषाकपिः तथा ज्वलितुमादिष्टः—' The fire-god, who filled the office of lamps, was ordered to burn in such a way as to leave no possibility of discolouring the pictures from touch of his soot.'

St. 60. लब्धसेवावकाशः—Construe लब्धसेवावकाशः समीरणः रतिक्लमथुमद्देहं तं तरङ्गान्तरगोचरः सन् सेवते. लब्धसेवावकाशः—Analyse लब्धः सेवायाः अवकाशो येन स लब्धसेवावकाशः, 'Having seized an opportunity of serving. ' ' Having got the opportunity of serving. ' रतिक्लमथुमद्देहं—Analyse रत्या क्लमथुमान् देहो यस्य स रतिक्लमथुमद्देहः तं तादृशं, ' Having his body exhausted (or fatigued) by (Rati) enjoyment. ' तरङ्गान्तरगोचरः—Analyse तरङ्गाणां अन्तरं तस्मिन् गोचरः, ' Visible in the midst of waves. ' समीरणः तरङ्गान्तरगोचरः सन् तं सेवते—' Having seized an opportunity of serving (him) the wind-god, visibly present in the midst of waves, waits on him, whose body was wearied by (Rati) enjoyment. '

St. 61. पातालहृदयान्तःस्थं—Construe पयोनिधिः पातालहृदयान्तःस्थं अग्रमांसमिव पद्मरागमुद्धृत्य पिशिताशिने ददाति. *Cf.* Ku. II, 37. " तस्योपायनयोग्यानि रत्नानि सरितां पतिः । कथमप्यम्भसामन्तरा निष्पत्तेः प्रतीक्षते ॥ " पातालहृदयान्तःस्थं Analyse हृदयस्य अन्तस्तिष्ठतीति हृदयान्तस्थं । पातालस्य हृदयान्तःस्थं पातालहृदयान्तःस्थं तत् तादृशं ' Lying in the interior bed of the nether world.' पद्मरागं—Analyse पद्मस्येव रागो यस्य सः ' Having the colour like that of a lotus,' i. e. a ruby. पयोनिधिः—Analyse पयसां निधिः पयोनिधिः 'A store of waters,' i. e. the ocean. अग्रमांसं—Analyse अग्रं च तन्मांसं च अग्रमांसं, 'The best part of the flesh,' i. e. the heart. पिशिताशिने—Analyse पिशितं मांसं अश्नातीति पिशिताशी तस्मै पिशिताशिने, ' To a flesh-eater'. 'To a flesh-devourer.' पयोनिधिः अग्रमांसमिव पद्मरागमुद्धृत्य पिशिताशिने ददाति—'Taking out the rubies hidden (or kept) in the interior bed of the nether world, the ocean makes them over to the flesh-eater (Rávaṇa), as if, its own heart.'

St. 62. काले—Construe कालाभ्रगर्भे कालेऽपि नर्मदादयो निर्मदा नद्यो वज्रायुधद्विषं [तं] सदा वज्रैर्नन्दयन्ति. कालाभ्रगर्भे—Analyse कालानि च तानि अभ्राणि च कालाभ्राणि तेषां गर्भो यस्मिन् सः, 'Filled with black clouds.' 'Crowded with dark clouds.' निर्मदाः—Analyse निर्गतो मदो यासां ताः तादृश्यः, 'Free from arrogance,' i. e. sober. 'Quiet.' 'Not proud.' 'Humble.' नर्मदादयः—Analyse नर्मदा आदिर्यासां ताः तादृश्यः, 'Beginning with the Narmadà' (i. e. Narmadá and other rivers). वज्रायुधद्विषं-Analyse वज्रमेव आयुधं यस्य स वज्रायुधः तं द्वेष्टीति वज्रायुधद्विट् तं तादृशं, 'To the enemy of the god who has the thunderbolt for his weapon.' i. e. to the enemy of Indra. नर्मदादयः वज्रायुधद्विषं सदा वज्रैः नन्दयन्ति—' Even in the rainy season, filled with dark clouds, the humble rivers such as Narmadá and others always gratify the hater of the god, who fights with his weapon of thunderbolt, by offering him the present of diamonds.'

St. 63. प्रियाजन°—Construe प्रियाजनपरिष्वंगप्रीतिं निरन्तरां कर्तुं ज्ञातमनोवृत्तिर्हिमागमः निशि तमुपैति. प्रियाजन°—Analyse प्रिया चासौ जनश्च प्रियाजनः तस्य परिष्वङ्गः तस्मात् प्रीतिः तां तादृशीं, 'Love sprung from an embrace of the beloveds,' i. e. lovely ladies in the inner apartment of his palaces. निरन्तरां—Analyse निर्गतं अन्तरं यस्याः सा तां तादृशीं, 'Without any intermediate space.' 'Having no intervening space.' 'Closely connected.' 'Constant.' ज्ञातमनोवृत्तिः—Analyse ज्ञाता मनसो वृत्तिर्येन सः, 'One who has read the frame of his mind.' 'One who has known his temper or disposition.' हिमागमः—Analyse हिमस्य आगमः हिमागमः, 'The setting in of winter or cold season.' 'Approach of cold.' 'Appearance of cold season.' प्रियाजनपरिष्वंगप्रीतिं निरन्तरां कर्तुं हिमागमः उपैति—'In order to make his love, consequent on the embraces of his ladies, constant the cold season waits on (*lit.* goes near) him at night, as if, it has read his mind.'

St. 64. तस्य—Construe दिवः प्रवसता सता मधुना सर्वर्तुषु तस्य विश्वमुद्यानवनं निजैः पुष्पैरधुना भूष्यते. सर्वर्तुषु—Analyse सर्वे च ते ऋतवश्च सर्वर्तवः तेषु, 'In all seasons.' 'In every season alike.' दिवः *f. accu. plu.*—'Over heavenly regions.' 'In sky.' 'In air.' दिवः प्रवसता सता मधुना निजैः पुष्पैः तस्योद्यानवनं भूष्यते—'Living afar off in the heavenly regions, the vernal season now-a-days decorates all his forest gardens with its own flowers in every season (alike).'

St. 65. दुराराध्य°—Construe ग्रीष्मो दुराराध्यस्वभावस्य तस्य सिषेविषां समालम्ब्य जलक्रीडादिनं चिरमुदीक्षते. दुराराध्यस्वभावस्य—Analyse आराद्धुं दुष्करो दुराराध्यः। दुराराध्यः स्वभावो यस्य स तस्य 'With an innate or peculiar dis-

position difficult to be made favourable.' सिषेविषां, Expl:—सेवितुमिच्छा सिषेविषा तां तादृशीं, 'Desire to serve.' जलक्रीडादिनं—Analyse जलेषु क्रीडा जलक्रीडा तस्याः दिनं जलक्रीडादिनं, 'A day appointed for sporting in water.' उदीक्ष् *vt.* 1. A. 'To wait,' 'to expect,' 'to look up for.' ग्रीष्मो जलक्रीडादिनं चिरमुदीक्षते—'Holding (or entertaining) a desire to serve him who has a disposition difficult to be made favourable, Grishma (the summer personified) long looks up for the day appointed for his sporting in water.'

St. 66. त्रास°—Construe त्रासकण्ठग्रहव्यग्रान् मानिनः तस्मिन्निच्छति [सति] अकालेऽपि लङ्कायां वारिदा धीरं गर्जन्ति. त्रास°—Analyse कण्ठानां ग्रहः कण्ठग्रहः । कण्ठग्रह एव त्रासः त्रासकण्ठग्रहः [or कण्ठग्रहत्रासः] तेन व्यग्राः तान् तादृशान्, 'Distracted by the terror of being seized by their necks.' अकाले—Analyse न कालः अकालः तस्मिन् अकाले, 'Unseasonable time.' 'Unseasonably.' 'Untimely.' 'In an improper time.' वारिदाः—Analyse वारीणि ददतीति वारिदाः, 'Clouds.' त्रासकण्ठग्रहव्यग्रान् मानिनः तस्मिन्निच्छति [सति]—'When he wishes the haughty to be distracted by the terror of being seized by their necks, the clouds are steadily thundering at Lanká even at an improper time,' (i. e. unseasonably). The poet means that clouds thunder untimely in Lanká, being afraid of seizure by the neck.

St. 67. अश्रान्ता—Construe अष्टहस्तपर्यायसंपदा अश्रान्ता वीजयति । इति [हेतोः] चामरधारिणीं कर्तुं चण्डीं अभिप्रेप्सुः. अश्रान्ता *f.*—Analyse न श्रान्ता अश्रान्ता, 'Untired.' 'Unwearied.' 'Without intermission.' अष्टहस्तपर्यायसंपदा—Analyse अष्टौ हस्ताः अष्टहस्ताः तेषां पर्यायः तत्र संपद् तया, 'By reason of an excellence in turning round her eight hands.' 'On account of an excellence in whirling round her eight hands.' अभिप्रेप्सुः—'Desirous of gaining, or obtaining.' चामरधारिणीं—Analyse चामराणि धारयतीति चामरधारिणी तां तादृशीं, 'Holding Chowries.' 'A Chowrie-holder.' अष्टहस्तपर्यायसंपदा अश्रान्ता वीजयति—'The goddess Chan*d*i with her eight hands showing an excellence (or displaying a perfect skill) of turning round, will fan without intermission.' इति [हेतोः] चामरधारिणीं कर्तुं चण्डी अभिप्रेप्सुः 'With this object in view he wishes to secure Chan*d*i inorder to make her his Chowrie-holder,' (i. e. for a Chowrie-holder).

St. 68. स्तब्धकर्णः—Construe श्रवणाक्षोभमारुतैः भूभक्तिकुसुमक्षेपदोषभीतः [अत एव] स्तब्धकर्णः गणाधिपः एनं नमति. स्तब्धकर्णः—Analyse स्तब्धौ कर्णौ यस्य स तादृशः, 'Stiff-eared.' 'Having the ears fixed.' श्रवणाक्षोभमारुतैः—Analyse श्रवणयोः आक्षोभः श्रवणाक्षोभः तस्माद् ये मारुताः तैः, 'The

currents of wind produced from the flappings of his ears.' भभक्ति-कुसुमक्षेपदोषभीतः—Analyse भुवि भूमौ भक्त्यर्थं मण्डनार्थं यानि कुसुमानि पुष्पाणि तेषां क्षेपः प्रचलनं स एव दोषोऽपराधः तस्माद् भीतो भूभक्तिकुसुमक्षेपदोषभीतः, 'Afraid of the fault of deranging or scattering flowers strewed on the ground for ornamental purpose.' भक्ति *f.* 'Decoration.' 'Ornament.' 'Embellishment.' क्षेप *m.*—'Throwing.' 'Casting.' 'Tossing.' 'Deranging.' 'Scattering.' गणाधिपः or गणेशः—Son of S'iva and Párvatî, said to have been sprung from the scurf of Pa'rvatî's body. He is the god of wisdom and good luck and the remover of obstacles. He is generally represented in a sitting posture, half man and half elephant, with a large belly and riding a mouse. He is addressed at the commencement of all undertakings and religious ceremonies. In a combat between Gaṇes'a and परशुराम the latter cut off one of Gaṇes'a's tusks, in consequence of which he is called एकदंत or एकदंष्ट्र. There are various stories as to how he got an elephant's head. He is said to have written the महाभारत at the dictation of व्यास. गणाः—Troops or classes of inferior deities especially certain troops of demi-gods considered as S'iva's attendants and under the special superintendence of the god Gaṇes'a. They are sixteen in all, beginning with Pramatha. See Kálika-Pura'ṇa chapter 29. स्तब्धकर्णो गणाधिपः एनं नमति—'Being afraid of committing the offence of deranging flowers strewed on the ground for ornamental purpose by the currents of wind produced from the flapping of his ears, the lord of Gaṇas, stopping the motion of his ears bows down to him.'

St 69. स्मरः—Construe प्रतीहार्यां स्मिताकूतविभ्रमैः कथितागमः स्मरश्च तस्य संसदं स्रस्तवाससा विशति. स्रस्तवाससा—Analyse स्रस्तं च तद्वासश्च स्रस्तवासः तेन तादृशेन, 'With a loose-garment.' स्मिताकूतविभ्रमैः—Analyse स्मितेन यद् आकूतं तस्माद् ये विभ्रमास्तैः तादृशैः, 'With amorous gestures betraying intention or purpose by smiles'. (or under the garb of smiling). कथितागमः—Analyse कथितः आगमः यस्य सः, 'Whose approach or coming near was announced.' प्रतीहार्यां स्मिताकूतविभ्रमैः कथितागमः स्मरः तस्य संसदं विशति—'And the god of love enters his audience hall with a loose-garment, his approach being announced by a female porter, with amorous gestures betraying her intention (or purpose) by smiles.'

St. 70. शुद्धान्तं—Construe तदाज्ञया स्त्रीजनस्य लीलोपदेशदानैकव्यग्रो मन्मथः अन्ततः शुद्धः शुद्धान्तं विशति. स्त्रीजनस्य—Analyse स्त्रियः एव जनः स्त्रीजनः तस्य स्त्रीजनस्य, 'To women.' 'To ladies.' लीलोपदेशदानैकव्यग्रः—Analyse

लीलानां उपदेशः तस्य दानं तस्मिन् व्यग्रः, 'Eagerly engaged in imparting instructions in amorous pastime,' (or erotical scicuce). मन्मथः तदाज्ञया स्त्रीजनस्य शुद्धान्तं विशति—'Being pure in mind, the god of love enters, by his order, the inner-apartments of his palace, eagerly intent on imparting instructions to the ladies in amorous pastime.'

St. 71. त्वयि—Construe स्वर्गसद्मनां रक्षाकृति दैवते त्वयि सत्यपि नक्तंचरेण एवं दिवत्रासः कथं वितन्यते. रक्षाकृति—Analyse रक्षां करोतीति रक्ष कृत् तस्मिन्, 'Lending protetion.' स्वर्गसद्मनां—Analyse स्वर्गः एव सद्म येषां ते स्वर्गसद्मानः तेषां स्वर्गसद्मनां 'Of those that have Svarga for their home.' 'Of those having Svarga for their abode.' रक्षाकृति त्वयि सत्यपि नक्तंचरेण एवं दिवत्रासः कथं वितन्यते—'When thou, O lord, art lending thy protection to the heaven-dwellers, how is it that the night-roaming fiend gives such trouble even to the heaven ?'

St. 72. भ्रातरि—Construe द्विषतो बाहुभग्नौजसि बिडौजसि भ्रातरि [सति] भोगिभोगे देवस्य तावत् केयं चिरं शायिका. बाहुभग्नौजसि—Analyse बाहुभ्यां भग्नं ओजो येन स बाहुभग्नौजाः तस्मिन्, 'Who has destroyed the bodily strength (of his enemy) by the power of his arms.' बिडौजस्—Derived from बिड् [or विड्] *vt.* 6. P. सेट् 'To break.' बिडं भेदकमोजोऽस्य or विदसु प्रजासु मनुष्येषु वा ओजोऽस्येति बिडौजाः इति केचित्. According to Vedic mythology the god Vishṇu is described as the younger brother to Indra. In the Vedic period Vishṇu is not placed in the foremost rank, and though frequently invoked with Indra, Varuṇa, the Maruts, Rudra, Va'yu and the Âdityas his superority to those is never stated, and he is described in one place as celebrating the praises of Indra and deriving his power from that god. Mark his later name इन्द्रानुज. भोगिभोगे-Analyse भोगिनः भोगः भोगिभोगः तस्मिन्, 'On the body of the great snake.' शायिका *f.*—'Sloth.' 'Repose.' 'To lie down.' Compare the Va'rtika on Pàṇi. III. 3. 108. "धात्वर्थनिर्देशे ण्वुल्वक्तव्यः" 'The affix ण्वुल् is employed also in simply pointing out the meaning of the roots; thus, आशिका 'to enjoy,' शायिका 'to lie down.' Also compare Pa'ṇi. II. 2. 15. "तृजकाभ्यां कर्तरि." 'A word ending with a sixth case-affix is not compounded with a word ending with 'तृच्' or 'अक' when the force of the genitive case is that of an agent.' The word कर्तरि qualifies the genitive. The affix तृच् is taught in Sûtra III. 1. 133, and the affix अक is not a single affix; all affixes that have

an element वु are अक; such as ण्वुल् or वुञ् or वुन् (Sûtra VII. 1. 1). Thus भवतः शायिका 'your honour's repose,' भवत आशिका 'your eating,' भवतोऽग्रगामिका 'your going in front.' भोगिभोगे देवस्य तावत् केयं चिरं शायिका—'When Indra, who had paralyzed (or destroyed) the (bodily) strength of his enemy by the power of his arms, is thy brother, how then under such circumstances (तावत्), the god indulges in sloth, for a long time, on the body of the great serpent.'

St. 73. आत्मस्वनुगुणं—Construe तव दृष्ट्या दैवं आत्मस्वनुगुणं मन्यामहे दैवहीनस्य जनस्य तु त्वं सुदर्शनो न हि. अनुगुणं *adj.*—Analyse अनुरूपाः गुणाः यस्मिन् तत् 'Having similar qualities.' 'Congenial with.' दृष्टि *f.*—'View.' 'Notion.' आत्मन् *m.*—'The natural temperament or disposition.' 'Nature.' 'Character.' दैवहीनस्य—Analyse दैवेन हीनः दैवहीनः तस्य, 'Unfortunate.' 'Unlucky.' 'Abandoned or deserted by good luck or fortune.' सुदर्शनः—Analyse सुकरं दर्शनं यस्य स सुदर्शनः, 'Easily seen.' 'Interview with him can easily be obtained.' तव दृष्ट्या दैवं आत्मस्वनुगुणं मन्यामहे—'By your sight we think that destiny (or fate) is (invariably) favourable to us.' दैवहीनस्य जनस्य तु त्वं सुदर्शनो न हि—'Because thou art, surely, not easily to be seen by unfortunate folk.'

St. 74. इत्थं—Construe स्वर्गे च स्वप्रतिजल्पस्पृहानिःस्पन्दवर्तिनि वाचस्पतौ वाचमित्थं व्याहृत्य क्षणं विरते [सति]. वाचस्पति *m.*—In later times he is a *R*ishi. He is also regent of the planet Jupiter, and the name is commonly used for the planet itself. In this character his car is called नीतिघोष and is drawn by eight pale horses. He was son of the *R*ishi Angiras, and he bears the patronymic आङ्गिरस. As preceptor of the gods he is called अनिमिषाचार्य, Chakshas, Ijya, and Indrejya. His wife, Târá, was carried off by Soma, the moon, and this gave rise to a war called the तारकामय. Soma was aided by उशनस्, रुद्र, and all the Daityas and Dànavas, while Indra and the gods took the part of बृहस्पति. " Earth, shaken to her centre," appealed to ब्रह्मा, who interposed and restored Ta'ra' to her husband. She was delivered of a son which B*ri*haspati and Soma both claimed, but Tárà, at the command of Brahmà to tell the truth, declared सोम to be the father, and the child was named Budha. स्वप्रतिजल्पस्पृहानिःस्पन्दवर्तिनि—Analyse स्वस्य निजस्य प्रतिजल्पस्य प्रतिवाक्यस्य स्पृहा इच्छा तस्याः निःस्पन्दवर्तिनि निश्चेष्टं वर्तमाने, 'Remaining

motionless with a desire of expecting a reply (or answer) to his statement.' वाचस्पतौ वाचामित्थं व्याहृत्य क्षणं विरते [सति]—'And in Svarga when the god Váchaspati, after having delivered his speech, in this manner, ceased for a moment, remaining motionless with the desire of expecting a reply to his statement,-'

Sts. 75-76. कुक्षिस्थ°—Construe कुक्षिस्थनिःशेषलोकत्रयभारोद्वहोऽपि अहं मानुषीकुक्षौ वासं विधाय वः शोकक्षयाय रामः इति ख्यातो भूत्वा सुरद्विषां भर्तुः एकबाणकृताशेषशिरश्छेदपराभवं कुर्याम्. कुक्षिस्थ°—Analyse कुक्षौ तिष्ठतीति कुक्षिस्थम्। कुक्षिस्थं यत् निःशेषं लोकत्रयं कुक्षिस्थनिःशेषलोकत्रयं तस्य भारं उद्वहतीति कुक्षिस्थनिःशेषलोकत्रयभारोद्वहः, 'Lifting up the burden of the entire three worlds lying in his womb.' मानुषीकुक्षौ—Analyse मानुष्याः कुक्षिः मानुषीकुक्षिः तस्मिन् तादृशे, 'In the womb of a female' (female-mortal). शोकक्षयाय—Analyse शोकस्य क्षयः शोकक्षयः तस्मै, 'In order to put an end to your sorrow or grief.' सुरद्विषां—Analyse सुरान् द्विषन्तीति सुरद्विषः तेषां, 'Of the enemies of the gods.' एकबाण°—Analyse एकश्चासौ बाणश्च एकबाणः तेन कृतः एकबाणकृतः। अशेषाणि च शिरांसि च अशेषशिरांसि तेषां छेदः अशेषशिरश्छेदः। एकबाणेन कृतो यो अशेषशिरश्छेदः एकबाणकृताशेषशिरश्छेदः तस्माद् यः पराभवः तं तादृशं, 'A defeat brought on by severing all heads with a single shaft.' शोकक्षयाय वः मानुषीकुक्षौ वासं विधाय—'In order to put an end to your sorrow, I, though lifting up the burden of the entire three worlds lying in my womb, will accept an abode in the womb of a female (mortal).' रामः इति भूत्वा सुरद्विषां भर्तुः एकबाणकृताशेषशिरश्छेदपराभवं कुर्याम्—' And becoming a celebrated hero by the name of Ráma will bring on defeat to the lord of the enemies of gods by severing all his heads with a single shaft.'

St. 77. इति—Construe वाचामगोचरो वेदविद् वेद्यो वृषानुजः इति उदारं वचः उदाहृत्य वर्षातल्पं तत्याज. *Cf.* Ku. II. 53. "वचस्यवसिते तस्मिन्ससर्ज गिरमात्मभूः। गर्जितानन्तरां वृष्टिं सौभाग्येन जिगाय सा॥" वाचामगोचरः—'Beyond the range (or scope) of words.' 'One who cannot be fully described by words.' 'Beyond the range of human description.' वर्षातल्प *m.*—'A couch (or sofa) made of water.' वृषानुजः—Analyse वृषा इन्द्रः तस्यानुजो विष्णुः, 'The younger brother of Vishṇu.' वेदविद्, Expl:—वेदान् वेत्ति जानातीति वेदविद्, 'Knowing the Vedas'. वेद्यः—'Fit to be known.' वेदविद् वेद्यो वर्षातल्पं तत्याज—' After saying these noble words, the knower of the Vedas, who is fit to be known, who is beyond human description, and who is the younger brother of Indra, left the watery couch.'

St. 78. चिरशयनगुरुं–Construe शिथिलितफणपंक्तिमुक्तदीर्घश्वसितविधूतमहार्णवो भुजगपतिः खेदात् चिरशयनगुरुं स्वभोगभारं शनकैर्विततत्य अवतस्थे. चिरशयनगुरुं—Analyse चिराय शयनं चिरशयनं तेन गुरुः तं तादृशं, 'Heavy from a long sleep.' स्वभोगभारं—Analyse स्वस्य भोगः आभोगः स्वभोगः तस्य भारः तं, 'The burden of his expanded body.' भुजगपतिः—Analyse भुजगानां पतिः भुजगपतिः, 'A king of serpents' (i. e. S'esha). शनकैः *ind.*—'Slowly.' 'Gradually.' 'Gently.' खेदात् 'From lassitude." From depression.' 'On account of exhaustion.' *Cf.* Our edition of Meghadûta I. 36. "अध्वखेदं नयेथाः." शिथिलित°—Analyse शिथिलिता या फणपंक्ति तस्याः मुक्तं यद् दीर्घश्वसितं तेन विधूतो महार्णवो येन स तादृशः, 'Who has ruffled (or stirred up) the great ocean by his long breathings coming out from the loosened row of his hoods.' The metre of this stanza is पुष्पिताग्रा. For the definition and its Gaṇas see notes on the stanza 88 canto first. भुजगपतिः स्वभोगभारं शनकैर्विततत्य अवतस्थे—'From lassitude the lord of the snakes, which had ruffled the great ocean by its long breathings issuing forth from the loosened row of hoods, slowly stretched out the load of its expanded body, heavy from long sleep and remained so.'

St. 79. भूमिस्पर्शभयात्—Construe भूमिस्पर्शभयात् तरसा उपेत्य लक्ष्म्या करेणोद्धृतं व्यालम्बैकपटान्तं उत्तरीयं अंसशिखरे क्षिप्त्वा निद्रामन्थरताम्रलोचनयुगो लीलालसन्न्यासया गत्या निर्जितवारणेन्द्रगमनो हरिस्ततः क्वापि प्रतस्थे. भूमिस्पर्शभयात्—Analyse भूमेः स्पर्शः भूमिस्पर्शः तस्माद् भयं तस्मात्, 'From fear of touching the ground,' (which was made either of snow or of water; because S'esha the couch of Vishṇu was lying on the sheet of oceanic waters or on snow). व्यालम्बैकपटान्तं—Analyse व्यालम्बमानः एकः पटान्तः पटप्रान्तः यस्य तत्, 'One end of the garment was hanging down loosely.' अंसशिखरे—Analyse अंसयोः स्कन्धयोः शिखरः उर्ध्वभागः अंसशिखरः तस्मिन् तादृशे, 'On the top of his shoulders.' निद्रामन्थरताम्रलोचनयुगः—Analyse निद्रया मन्थरं अलसम् । ताम्रं च । लोचनयोः नयनयोः युगं युगलं यस्य स तादृशः, 'The pair of whose eyes were looking red and dull by sleep.' लीलालसन्न्यासया—Analyse लीलया लसन् न्यासः पदप्रक्षेपणं यस्यां सा तया, 'The planting of feet in which was looking graceful by reason of his sportive gait.' निर्जितवारणेन्द्रगमनः—Analyse निर्जितं वारणेन्द्रस्य गजेन्द्रस्य गमनं येन स तादृशः, 'One who has surpassed the gentle gait of a mighty elephant.' The metre of this stanza is शार्दूलविक्रीडित which is thus defined:—"सूर्याश्वैर्यदि मः सजौ सततगाः शार्दूलविक्रीडितम्." The Gaṇas are म, स, ज, स, त, त and a long syllable. लीलालसन्न्यासया गत्या निर्जितवारणेन्द्रगमनो हरिः क्वापि प्रतस्थे—'Throwing on the top of his shoulders the upper-

garment one end of which was hanging loosely and which was picked up with her hand by the goddess Lakshmî who quickly ran up to it, being afraid of its touching the ground, the god Hari with his eyes red and dull by sleep and with a gait that surpassed the gentle gait of a mighty elephant by his sportive movement, the planting of feet in which looked graceful, then set out from that place (to go) somewhere.' Some portion of the tenth Sarga of Raghuvans'a and much of the second Sarga of Kumárasambhava, have been of much assistance to the poet in the composition of this canto.

CANTO III.

———:0:———

St. 1. अथ—Construe अथ श्रियः प्राणसमस्य तस्य मर्त्यधाम विविक्षां ज्ञात्वा इव पूर्वावतीर्णः वसन्तः सुमनःसमृद्ध्या भुवनं सम्यक् ततान. प्राणसमस्य—Analyse प्राणैः समः प्राणसमः तस्य तादृशस्य, 'Dear (as one's) vital-breaths.' 'Dear as (one's) life.' विविक्षा, Expl:—वेष्टुमिच्छा विविक्षा, 'Desire to enter.' 'Wish to have an entrance.' मर्त्यधाम—Analyse मर्त्यानां धाम मर्त्यधाम, 'Mortal body.' 'Human-frame.' 'An abode of mortals.' 'Home of mortals.' पूर्वावतीर्णः—Analyse पूर्वं अवतीर्णः पूर्वावतीर्णः, 'Previously came down.' 'Made its appearence earlier.' सुमनःसमृद्ध्या—Analyse सुमनसां समृद्धिः सुमनःसमृद्धिः तया तादृश्या, 'Exuberance of flowers.' 'Luxuriance of flowers.' The metre of this canto is उपजाति. See note on stanza I, Canto I. पूर्वावतीर्णो वसन्तो भुवनं सम्यक् ततान—'Then, as if, knowing the desire to enter into a mortal frame of Him, who was dear to Lakshmî as her life, Vasanta (the spring personified) who came down first, splendidly (or completely) spread the earth with a luxuriance of flowers.'

St. 2. भ्रान्त्वा—Construe अथ सर्वत्र करप्रसारी विवस्वान् भ्रान्त्वा दक्षिणाशामालम्ब्य ततो निःस्वः ऋत्विगिव वसूपलब्ध्यै धनदस्य वासं प्रतस्थे. दक्षिणाशां—Analyse दक्षिणा चासौ आशा च दक्षिणाशा तां तादृशीं, 'To the southern quarter.' 'To the southern regions.' In the case of the ऋत्विक्, the analyses of the compound is दक्षिणायाः आशा तां, 'Hope to get a gift or donation.' करप्रसारी—Analyse करान् मयूखान् प्रसारयतीति करप्रसारी, 'Spreading out the rays.' In the case of the ऋत्विक्, करप्रसारी means, 'Spreading out or holding out his hand.' ऋत्विक्, Expl:—ऋतौ यजतीति ऋत्विक्, 'Spreading a sacrifice at a proper season.' निःस्वः—Analyse निर्गतं स्वं यस्मात्, 'He from whom wealth is departed.' 'Deprived of his wealth.' 'Having no property.' 'Poor.' 'Wretched.' वसूपलब्ध्यै—Analyse वसूनां उपलब्धिः तस्यै, 'In order to get light.' In the case of ऋत्विक्, 'In order to get wealth.' धनदस्य—Analyse धनं ददातीति धनदः तस्य तादृशस्य, 'Of Kubera, the lord of wealth.' In the case of the ऋत्विक्, धनद means, 'One who gives wealth.' 'A rich person.' अथ सर्वत्र करप्रसारी विवस्वान् भ्रान्त्वा दक्षिणाशामालम्ब्य—'Now the sun, spreading out the rays in every quarter, in his wanderings, came to the southern regions.' ततः निःस्वः ऋत्विगिव वसूपलब्ध्यै धनदस्य वासं प्रतस्थे—'And thence, in order

to get light (i. e. repair his beams), set out, like a wretched sacrificial priest, to the abode of Kubera' (i. e. the north). Mark the double sense of the several attributes.

St. 3. वृक्षाः—Construe वसन्तस्य वनस्थलीभिः न्यस्ताः सहस्रदीपाः दीपवृक्षाः इव नवकुड्मलाढ्याः वृक्षाः मनोज्ञद्युति चम्पकाख्यारूपं वितेनुः. *Cf.* R. IV. 75. "सरलासक्तमातङ्गग्रैवेयस्फुरितत्विषः। आसन्नोषधयो नेतुर्नक्तमस्नेहदीपिकाः॥" मनोज्ञद्युति—Analyse मनोज्ञा द्युतिर्यस्य तत्तादृशं, 'Having an agreeable splendour or lustre.' चम्पकाख्यारूपं—Analyse चम्पकः इति आख्या यस्याः सा चम्पकाख्या तस्याः रूपं चम्पकाख्यारूपं, 'Showing beauty or elegance in the name of a Champaka (tree).' नवकुड्मलाढ्याः—Analyse नवाश्च ते कुड्मलाश्च नवकुड्मलाः तैः आढ्याः नवकुड्मलाढ्याः, 'Rich in fresh buds just (or newly) opened.' वनस्थलीभिः—Analyse वनानां स्थल्यः वनस्थल्यः ताभिः तादृशीभिः, 'By the natural spots of forest grounds.' सहस्रदीपाः—Analyse सहस्रं दीपाः सहस्रदीपाः, 'Thousands of lights or lamps.' दीपवृक्षाः—Analyse दीपानां वृक्षाः दीपवृक्षाः, 'Lamp-stands.' 'Lamp-sticks.' 'Lamp-trees.' *Cf.* दीपपादपाः. नवकुड्मलाढ्याः वृक्षाः मनोज्ञद्युति चम्पकाख्यारूपं वितेनुः—'The trees, rich in fresh buds just opened, spread out the beauty in the name of Champakas, having an agreeable splendour, as if they were lamp-stands, burning with thousands of lights, placed on the ground by the woods of Vasanta.'

St. 4. संपिण्डितात्मावयवाः—Construe संपिण्डितात्मावयवाः कण्टकितोर्ध्वदण्डाः नवाः पद्माः अन्तर्जलावासविरूढशीतत्रस्ताः [सन्तः] वसन्तातपकाम्ययेव उदीयुः. संपिण्डित°-Analyse संपिण्डिताः संकुचिताः आत्मनः अवयवाः पत्रकिंजल्कादयः यैस्ते संपिण्डितात्मावयवाः, 'Which have contracted their own branches' (*lit.* limbs). कंटकितोर्ध्वदण्डाः—Analyse कंटकिताः ऊर्ध्वदण्डाः ऊर्ध्वनालानि येषां ते कण्टकितोर्ध्वदण्डाः, 'Having standing stalks with a thorny coat.' 'With raised-stalks bearing a thorny coat.' अन्तर्जलावासविरूढशीतत्रस्ताः—Analyse अन्तर्गतं यज्जलं तस्य आवासः तेन विरूढं शीतं तस्मात् त्रस्ताः, 'Afraid of cold increased by the watery abode inside.' वसन्तातपकाम्यया—Analyse वसन्तस्य आतपः तस्य काम्या तया तादृश्या, 'Prompted with a desire for heat of the spring.' नवाः पद्माः वसन्तातपकाम्यया इव उदीयुः—'The fresh lotuses with their raised-stalks bearing a thorny coat, having their branches (petals, fibers &c.) contracted, rose up, as if, prompted with a desire for heat of the spring, being afraid of cold increased by the watery abode inside (their cups).'

St. 5. कर्णे—Construe दीर्घविलोचनानां कर्णे कृतः आलोलदृष्टिद्युतिभिन्नरागः अशोकप्रभवः प्रवालः बालोऽपि परिणामगम्यां कान्तिं प्रपेदे. दीर्घविलोचनानां—

Analyse दीर्घे विलोचने यासां ताः दीर्घविलोचनाः तासां दीर्घविलोचनानां, 'Long-eyed ladies.' 'Ladies having long eyes.' आलोलदृष्टिद्युतिभिन्नरागः—Analyse आलोलाश्च ताः दृष्टयश्च आलोलदृष्टयः तासां द्युतिस्तया भिन्नो रागो यस्य स आलोलदृष्टिद्युतिभिन्नरागः, 'Bearing a diversified tint made bright by rolling glances.' *Cf.* R. VI. 13. "आलोलपत्राभिहतद्विरेफम्." S'ák. I. 15. "भिन्नो रागः किसलयरुचां." अशोकप्रभवः—Analyse अशोकात् प्रभवो यस्य सः, 'Sprung from the As'oka tree.' 'Of an As'oke tree.' परिणामगम्यां—Analyse परिणामे परिणतौ गम्या परिणामगम्या तां तादृशीं, 'To be attained in an advanced state or stage.' 'Brought on by a developed state.' बालः प्रवालः परिणामगम्यां कान्तिं प्रपेदे—'Put on their ears by long-eyed ladies and bearing a diversified tint made bright by their rolling eyes, the sprout sprung from As'oka, though fresh (*lit.* young) assumed a splendour, to be attained in a developed state.'

St. 6. प्रादुर्बभूवुः—Construe कान्त्या स्फुरन्ति शोणितपाटलानि करवीरजानि नवकुड्मलानि प्रवासिनां मनोभवस्य तीरीफलानीव प्रादुर्बभूवुः. नवकुड्मलानि—Analyse नवानि च तानि कुड्मलानि च नवकुड्मलानि, 'Fresh buds' करवीरजानि—Analyse करवीराद् जातानि करवीरजानि, 'Sprung from Karavîra tree.' 'Produced from Karavîra tree.' शोणितपाटलानि—Analyse शोणितवत् पाटलानि शोणितपाटलानि, 'Blood-red.' 'As red as blood.' तीरीफलानि—Analyse तीरीणां फलानि तीरीफलानि, 'Sharp blades of arrows.' तीरी *f.*—'A kind of arrow, three-fourths of which consists of reed and a fourth part of iron.' फल *n.*—'A blade of sword or knife.' *Cf.* खड्गफलं. कान्त्या स्फुरन्ति करवीरजानि नवकुड्मलानि प्रादुर्बभूवुः—'Flashing forth with splendour, the blood-red fresh buds of Karavîra flowers made their appearance like the sharp blades of arrows of the god sprung from the mind (or fancy) of travellers.'

St. 7. वन्ध्यः—Construe वन्ध्योऽप्यशोकः अङ्गनानां रणन्नूपुरं सालक्तकपादघातं लब्ध्वा अतिहर्षाद् उद्गतरोमांचः इव नवैः पुष्पांकुरैः आस. वन्ध्य *adj.*—'Not bearing flower and fruit in due season.' 'Barren.' 'Unfruitful.' Because the As'oka's longing or दोहद was not gratified. When a tree does not flower in time, it is believed to crave for some special treatment, such as a peculiar kind of manure. The As'oka, so dear to lovers, when it withholds its flowers is believed to desire that a young and beautiful woman should be decorated with ornaments, dressed beautifully and should then kick itself with her foot which should itself be nicely decorated. This ceremony is called the दोहदपूरण or gratifying the desire of As'oka. On various trees requiring various gratifications *Cf.* महिमसिंहगणिः,

" पादाहतः प्रमदया विकसत्यशोकः । शोकं जहाति बकुलो मुख [मधु] सीधुसिक्तः । आलोकनात्कुरबकः कुरुते विकासम् । आलिंगितस्तिलक उत्कलिको विभाति " ॥ सारोद्धारिणी also quotes the same. Mallinátha quotes the following:—" स्त्रीणां स्पर्शात् प्रियंगुर्विकसति बकुलः सीधुगण्डूषसेकात् । पादाघातादशोकस्तिलककुरबकौ वीक्षणालिंगनाभ्याम् । मन्दारो नर्मवाक्यात् पटुमृदुहसनाच्चम्पको वक्त्रवातात् । चूतो गीतान्नमेरुर्विकसति च पुरो नर्तनात् कर्णिकारः " ॥ See our edition of Meghadûta II. 17. and the notes thereon. As for the parallel idea, *Cf.* " एकः सख्यास्तव सह मया वामपादाभिलाषी । कांक्षत्यन्यो वदनमदिरां दोहदच्छद्मनास्याः" ॥ also R. VIII. 68. कुसुमं कृतदोहदस्तया यदशोकोऽयमुदीरयिष्यति." Ratná I. 17. " मूले गण्डूषसेकासव इव बकुलैर्वाम्यते पुष्पवृष्ट्या." We also find references to these notions in many places. *Cf.* Kádambarî " कदाचिद्बकुलतरुमिव कामिनीगण्डूषसीधुधारास्वादमुदितो विकासमभजत." And " कदाचिदशोकपादप इव युवतिचरणतलप्रहारसंक्रान्तलक्तको रागमुवाह " । *Cf.* Vâsava. " मधुमदमुदितगण्डूषसीधुसेकपुलकितबकुलः." Also see Karpûramanjarî II. 44. 45. 47. सालक्तकपादघातं—Analyse अलक्तकेन सह सालक्तकः । सालक्तश्चासौ पादश्च सालक्तकपादः तस्य घातः तं तादृशं, 'Kicking with a foot, the soles of which are smeared with red-lac.' रणन्नूपुरं—Analyse रणन्ति नपुराणि यस्मिन् स रणन्नूपुरः तं तादृसं, 'Having jingling anklets.' उद्गतरोमांचः—Analyse उद्गताः रोमांचाः यस्य सः, 'On which was produced the erection of hair.' 'Horripilated.' अतिहर्षात्—Analyse अतिशयो हर्षः अतिहर्षः तस्मात्, 'From an excessive joy.' पुष्पांकुरैः—Analyse पुष्पाणां अंकुराणि पुष्पांकुराणि तैः तादृशैः, 'By shoots of flowers.' अतिहर्षादशोकः नवैः पुष्पांकुरैः उद्गतरोमांचः इव आस–'The As'oka tree, though barren, burst into fresh shoots of flowers as if its trunk had on it the erection of the hair, from an excessive joy, on receiving kicks from the feet, smeared with red-lac, of beautiful young women, the anklets on which made a jingling sound.'

St. 8. महीध्रमूर्ध्नि—Construe भ्रमरेन्द्रनीलैर्विभक्तशोभः शिखिकण्ठनीलैर्गृहीतभास्वन्मुकुटानुकारो नवकर्णिकारो महीध्रमूर्ध्नि कान्तिं ततान. महीध्रमूर्ध्नि—Analyse महीं धरतीति महीध्रः तस्य मूर्धा महीध्रमूर्धा तस्मिन् तादृशे, 'On the top (or summit) of a mountain.' भ्रमरेन्द्रनीलैः—Analyse भ्रमराः एव इन्द्रनीलाः तैः तादृशैः, 'Sapphires made of bees.' भ्रमर *m.*—'A bee.' From this word is derived द्विरेफ, having two रकारs and meaning, 'a bee.' विभक्तशोभः—Analyse विभक्ता शोभा यस्य सः, 'Having its beauty or elegance divided.' शिखिकण्ठनीलैः—Analyse शिखिनां ये कण्ठाः तैः नीलाः तैः तादृशैः, 'By the blue-colour on the necks of peacocks.' गृहीतभास्वन्मुकुटानुकारः—Analyse भास्वन्तः मुकुटाः भास्वन्मुकुटाः । गृहीतः भास्वन्मुकुटानां अनुकारो येन सः, 'One that betrays or displays an imitation of glittering crowns.' नवकर्णिकारः—Analyse नवश्चासौ क-

र्णिकारश्च नवकर्णिकारः, 'A fresh Karṇikára tree.' As for the Karṇikà-ra's longing or दोहद, see above our note. शिखिकण्ठनीलैर्गृहीतभास्वन्मुकुटानुकारो नवकर्णिकारः कान्तिं ततान—'On the top of the mountain, a fresh Karṇikára tree with its beauty divided by bees looking like sapphires, and betraying an imitation of glittering crowns, by means of the blue colour on the neck of the peacocks, spread its splendour.'

St. 9. वासन्तिकस्य—Construe वासन्तिकस्य भानोः अंशुचयेन हतप्रभावं हेमन्तमालोक्य प्रीत्या सरोरुहामुद्धृतकंटकेन वनेन रम्यं जहसे इव. *Cf.* Kirà. X. 36. "कथमिव तव संमतिर्भवित्री सममृतुभिर्मुनिनावधीरितस्य । इति विरचितमल्लिकाविकासः स्मयत इव स्म मधुं निदाघकालः ॥" वासन्तिकस्य, Expl:—वसन्ते भवो वासन्तिकः तस्य, 'Pertaining to Vasanta.' 'Belonging to Vasanta.' अंशुचयेन—Analyse अंशूनां चयः अंशुचयः तेन तादृशेन, 'Collection or multitude of rays.' हतप्रभावम्—Analyse हतः प्रभावो यस्य स तं तादृशं, 'One whose power has been crippled.' 'Bereft of power.' सरोरुहां—Analyse सरसि रोहन्तीति सरोरुहः तेषां तादृशानाम्, 'Of the pond-growing,' i. e. of lotuses. उद्धृतकंटकेन—Analyse उद्धृतं नष्टं कंटकं शत्रुर्यस्य स तेन तादृशेन, 'One whose enemy has been rooted up,' or it may be analysed as, ऊर्ध्वं धृतं कंटकं येन, 'Which had held up thorns (on its grounds).' सरोरुहां वनेन जहसे—As for the impersonal construction in लिट् see our notes on stanza 55 canto I. हतप्रभावं हेमन्तमालोक्य सरोरुहां वनेन रम्यं जहसे इव—'Beholding Hemanta (the winter), the power of which had been crippled, by multitude of rays of the sun, belonging to the spring, the forest of lotuses, whose enemy had been rooted up, as it were, laughed heartily through affection.'

St. 10. समीरण°—Construe समीरणानर्तितमञ्जरीके चूते निसर्गेण निषक्तभावाः भृंगाः अशोकवनेषु पुष्पावतंसेषु दीप्तेषु इव पदं न चक्रुः. समीरण°—Analyse समीरणेन आनर्तिताः मञ्जरीकाः यस्य तादृशे, 'The clusters of blossoms of which were made to dance (set in motion) by a breeze.' निषक्तभावाः—Analyse निषक्तो भावो यैस्ते, 'Whose affection or feeling clings to.' पुष्पावतंसेषु—Analyse पुष्पाणां अवतंसाः तेषु तादृशेषु, 'Crests or ornaments of flowers.' 'Any ring-shaped ornament made of flowers.' अशोकवनेषु—Analyse अशोकानां वनानि अशोकवनानि तेषु तादृशेषु, 'Forests abounding in the As'oka trees.' चूते निसर्गेण निषक्तभावाः भृङ्गाः पुष्पावतंसेषु पदं न चक्रुः—'The bees, whose affection naturally clung to the mango tree, the clusters of the blossoms whereof were made to dance by

the breeze, did not set their foot in the As'oka forests, the crests of flowers wherein, were, as if, on fire.'

St. 11. विनिद्र°—Construe विनिद्रपुष्पाभरणः समुल्लसत्कुन्दलतावनद्धः पलाशः मधुना उद्भूतभस्मा राशीकृतो मन्मथदाहवह्निरिव रेजे. विनिद्र°—Analyse विनिद्राणि च तानि पुष्पाणि च विनिद्रपुष्पाणि तेषां आभरणानि यस्य सः, 'Wearing ornaments of full blown flowers.' समुल्लसत्°—Analyse समुल्लसन्त्यः याः कुन्दलताः ताभिः अवनद्धः, 'Intertwined by blooming or flashing Kunda creepers.' उद्भूतभस्मा—Analyse उद्भूतं भस्म यस्मिन् स उद्भूतभस्मा, 'In which the ashes have been produced.' 'Having ashes visible (to the eyes).' राशीकृतः, Expl:—अराशिः राशिः सम्पद्यमानः राशीकृतः 'Made into a heap.' 'Heaped up.' मन्मथदाहवह्निः—Analyse मन्मथस्य दाहः मन्मथदाहः तस्य वह्निः 'Fire which had consumed the god of Love.' पलाशः मधुना [संगतः] मन्मथदाहवह्निरिव रेजे—'The Palàs'a tree, intertwined by Kunda creepers, wearing ornaments of full blown flowers, began to look bright in the association of the spring, like fire which had burnt the god of love, having visible ashes and made into a heap.'

St. 12. वसन्त°—Construe वसन्तदीप्तातपखेदितानां महीरुहां वातचलाः प्रवालाः रेजुः यथा विद्रुमभंगताम्रा अतिश्रमेण निष्कासिता जिह्वा. वसन्त°—Analyse दीप्तश्चासौ आपतश्च दीप्तातपः । वसन्तस्य दीप्तापतेन खेदिताः वसन्तदीप्तातपखेदिताः तेषां तादृशानां, 'Of the plants scorched up by the blazing heat of Vasanta (the spring).' महीरुहां—Analyse मह्यां रोहन्तीति महीरुहः तेषां महीरुहां, 'Of the earth-growing.' 'Of plants.' 'Of trees.' वातचलाः—Analyse वातेन चलाः वातचलाः, 'Set in motion by the wind or breeze.' विद्रुमभंगताम्रा—Analyse विद्रुमस्य भङ्गः विद्रुमभङ्गः तद्वत् ताम्रा विद्रुमभंगताम्रा, 'Red like the fracture of a coral strand.' अतिश्रमेण—Analyse अतिशयः श्रमः अतिश्रमः तेन तादृशेन 'By excessive labour.' महीरुहां वातचलाः प्रवालाः रेजुः यथा विद्रुमभङ्गताम्रा अतिश्रमेण निष्कासिता जिह्वा—'The sprouts set in motion by the breeze, of the earth-growing plants scorched up by the blazing heat of the spring, shone forth like the tongue, red as the fracture of a coral strand, thrown out on account of excessive labour.'

St. 13. प्रालेय°—Construe रात्रिः प्रालेयकालप्रियविप्रयोगग्लानेव क्षयमाससाद दिवसश्च वसन्तक्रूरातपश्रान्तः इव क्रमेण मन्दं जगाम. *Cf.* R. IX. 38. "उपययौ तनुतां मधुखण्डिता हिमकरोदयपांडुमुखच्छविः । सदृशमिष्टसमागमनिर्वृत्तिं वनितयानितया रजनीवधूः." प्रालेय°—Analyse प्रालेयस्य कालः प्रालेयकालः । प्रियस्य विप्रयोगः प्रियविप्रयोगः । प्रालेयकालः एव प्रियः तस्य विप्रयोगात् ग्लानं यस्याः सा प्रालेयकालप्रियविप्रयोगग्लाना, 'Exhausted or emaciated

by the separation from the lover,' viz. the frosty season. वसन्त°—Analyse क्रूरश्चासौ आतपश्च क्रूरातपः । वसन्ते क्रूरातपः वसन्तक्रूरातपः तेन श्रान्तः वसन्तक्रूरातपश्रान्तः, 'Fatigued by the intolerable (or intense) heat of the spring.' रात्रिः प्रालेयकालप्रियविप्रयोगग्लानेव क्षयमाससाद—'The night began to wane (*lit.* came to or approached to waning) being exhausted by reason of separation from the lover,' viz. the frosty season. दिवसश्च वसन्तक्रूरातपश्रान्तः इव क्रमेण मन्दं जगाम—'And the day gradually began to pass (or move) slowly as if exhausted by the intense heat of the spring.'

St. 14. ततः—Construe ततः क्षोणीपतिः स्मरस्य आहवधामकल्पं भ्रान्तशिलीमुखांकं रक्तदीप्तिसन्तानभास्वत्करवीरकीर्णं उद्यानमासेवत. आहवधामकल्पं—Analyse आहवस्य धाम आहवधाम । ईषदूनं आहवधाम आहवधामकल्पं, 'Almost like (or nearly equal to) the battle-field.' क्षोणीपतिः—Analyse क्षोण्याः पतिः क्षोणीपतिः, 'Lord of the earth.' भ्रान्त°—Analyse भ्रान्ताः शिलीमुखाः द्विरेफाः तेषां अङ्कः यस्य तत्, 'Bearing a mark (or line) of bees which were flying about.' As applied to आहवधाम or battle-field, it may be analysed as, भ्रान्ताः शिलीमुखाः बाणाः तेषां अङ्को यस्य तत्, 'Marked or distinguished by the iron shafts that were flying about.' रक्तदीप्ति°—Analyse रक्ता चासौ दीप्तिश्च रक्तदीप्तिः ताम्रवर्णः तस्याः सन्तानेन सातत्येन भास्वन्तः प्रकाशमानाः ये करवीराः हयमारपुष्पाणि तैः कीर्णं व्याप्तं, 'Full of bright Karavîra flowers beaming forth with reddish lustre.' As applied to आहवधाम, it may be analysed thus, रक्तं शोणितं तस्य दीप्तिसन्तानेन भास्वत्कराः ये वीराः भटाः तैः कीर्णं व्याप्तमित्यर्थः, 'Full of warriors whose hands were shining by a continuous glitter of the blood.' ततः क्षोणीपतिः स्मरस्य आहवधामकल्पं उद्यानमासेवत—'Then the lord of the earth repaired to the garden which was almost like a battle-field of the god of Love, bearing a line of bees flying about and full of bright Karavîra flowers beaming forth with continuous reddish lustre.'

St. 15. रम्याणि—Construe रामानुगतो रम्याणि विहंगपक्षानिलनर्तितपल्लवानि उद्भ्रान्तभृङ्गाणि लतागृहाणि रहोविहारैः संभावयामास. रामानुगतः—Analyse रामाभिः अनुगतः, 'Accompanied by beautiful young damsels.' विहङ्ग°—Analyse विहङ्गानां पक्षाः तेषां अनिलैः आनर्तिताः पल्लवाः येषु तानि, 'The sprouts in which have been made to dance by a breeze of the birds' feathers.' उद्भ्रान्तभृङ्गाणि—Analyse उद्भ्रान्ताः भृङ्गाः येषु तानि, 'The bees in which were hovering about.' लतागृहाणि—Analyse लतानां गृहाणि लतागृहाणि, 'Arbours.' 'Bowers of creepers.' रहोविहारैः—Analyse रहसि विहाराः रहोविहाराः तैः तादृशैः. 'By means of his solitary

sports' or 'sports in solitude.' 'Sports in secret places.' रामानुगतो रम्याणि लतागृहाणि रहोविहारैः संभावयामास—'In company with beautiful young ladies the king honoured by his visit the charming arbours, the bees in which were hovering about and the sprouts of which were made to dance by the breeze produced from the feathers of birds.'

St. 16. त्वं—Construe हे नूपुर त्वं अंघ्रौ अप्रमादं कुरु । हे कांचि क्षणं नितम्बभारं भर । इति तस्मिन्विहरन्नृपत्नीकक्ष्यातुलाकोटिपुटैर्निनेदे इव. अप्रमादं—Analyse न प्रमादः अप्रमादः तं तादृशं, 'Care.' 'Vigilance.' 'Carefulness. नितम्बभारम्—Analyse नितंबयोः भारः नितंबभारः तं तादृशं, 'The burden of hips.' तस्मिन् Refers to लतागृहे, 'In the arbour of creepers.' विहरन्°-Analyse विहरन्त्यः याः नृपस्त्रियः तासां कक्ष्या च तुलाकोटयश्च विहरन्नृपत्नीकक्ष्यातुलाकोटयः तासां यानि पुटानि तैः विहरन्नृपत्नीकक्ष्यातुलाकोटिपुटैः 'By the covers of the foot-ornaments and the zone of the sporting ladies of the king.' तुलाकोटि *m. f.*—'A particular ornament worn on the feet and toes by women.' The Maràthi student will recognize this expression in तोरड्या generally worn on their feet by girls newly married. निनेदे—'Reproached.' 'Blamed.' Derived from निंद् *vt.* I. U. (सेट्) 'to ridicule,' censure,' 'to reproach,' 'to blame.' हे नूपुर त्वं अंघ्रौ अप्रमादं कुरु—'O anklet, be thou careful about the feet.' हे कांचि क्षणं नितम्बभारं भर–'Bear, O zone, the burden of hips for a moment.' इति तस्मिन् [लतागृहे] विहरन्नृपत्नीकक्ष्यातुलाकोटिपुटैर्निनेदे इव 'Thus in that arbour, the folds of the girdle and the anklets of the sporting ladies of the king, reproached one another.' The poet here represents a quarrel between the zone and the anklets. Each was proud of its own sound and so was cautioning the other to be careful about its duty as otherwise the superior sound of the one would drown that of the other.

St. 17. चिक्षेप—Construe दूरस्थपुष्पस्तबकावभङ्गव्याजेन संदर्शितबाहुमूला अनङ्गक्षतधैर्यवृत्तिर्बाला पत्यौ मुहुरर्धदृष्टिं चिक्षेप. अर्धदृष्टिं—Analyse अर्धा चासौ दृष्टिश्च अर्धदृष्टिः तां तादृशीं, 'Half a glance' i. e. a side-long glance. अनङ्ग°—Analyse अनङ्गेन क्षता धैर्यस्य वृत्तिर्यस्याः सा अनङ्गक्षतधैर्यवृत्तिः, 'Whose steady conduct was disturbed by the bodiless-god,' (i. e. god of Love). दूरस्थ°—Analyse दूरे तिष्ठन्तीति दूरस्थानि । दूरस्थानि च पुष्पाणि च दूरस्थपुष्पाणि तेषां स्तबकानां अवभङ्गः तस्य व्याजः तेन, 'Under the plea of plucking the bunches of flowers lying at a long distance.' संदर्शितबाहुमूला—Analyse संदर्शितं बाह्वोर्मूलं यया, 'Who had exhibited or

showed the region of her shoulders.' बाहुमूल *n.* 'The root or juncture of the arm.' 'Armpit.' 'Extremity of the upper part of the arm.' 'Shoulder-blade.' 'The region of the shoulders.' बाला *f.*—' A girl not more than sixteen years of age. Jayadeva defines:-"आषोडशाद्भवेद्बाला तरुणी त्रिंशका मता । पञ्चपञ्चाशका प्रौढा भवेद्वृद्धा ततः परम् ॥" अनङ्गक्षतधैर्यवृत्तिर्बाला पत्यौ अर्धदृष्टिं चिक्षेप—' A certain young girl, whose steady conduct was disturbed by the bodiless-god, and who exhibited the region of her shoulders under the plea of plucking the bunches of flowers lying at a long distance often cast a side-long glance at her husband.'

St. 18. पत्या—Construe परस्याः विलासवत्याश्चरणान्तरागे पत्या विधीयमाने अन्यत्र युक्तोऽपि लाक्षारसः तत्प्रतिपक्षनेत्रे रागं बबन्ध नु. विलासवती *f.* Expl:—विलसनशीला विलासवती, ' A wanton or coquettish woman.' चरणान्तरागे—Analyse चरणयोरन्तः चरणान्तः तस्मिन्रागः तस्मिन् तादृशे, ' Colour to the soles of the feet.' लाक्षारसः—Analyse लाक्षायाः रसः लाक्षारसः, ' A kind of red dye.' Lac obtained from the cochineal insect or a similar insect as well as from the resin of a particular tree; according to some the nest of the insect is formed of a resinous substance which is used as sealing-wax and commonly termed shel-lac. This लाक्षारस was largely used as an article of decoration by women in India. तत्प्रतिपक्षनेत्रे—Analyse तस्याः प्रतिपक्षस्य नेत्रं तस्मिन्, 'On the eyes of her rival.' अन्यत्र युक्तोऽपि लाक्षारसस्तत्प्रतिपक्षनेत्रे रागं बबन्ध नु—'While the dye to the soles of the feet of a coquettish lady was being given by her Royal husband, the lac, though painted elsewhere (or in other place), indeed imparted its red colour to the eyes of her rival, '(i. e. her eyes became red with warth).

St. 19. पातुं—Construe सुदत्याः वदनारविन्दं पातुमादाय ललनाभिर्दृष्टः ईशः अपुष्परेणुव्यथितेऽपि तस्याः नेत्रे मुखगन्धवाहं चिक्षेप. सुदत्याः—Analyse शोभनाः दन्ताः यस्याः सा सुदती तस्याः, ' Having a set of beautiful teeth.' वदनारविन्दं—Analyse वदनमेव अरविन्दं वदनारविन्दं, ' A lily-like face.' वदनारविन्दं पातुं—' In order to drink up her lotus-like mouth with great eagerness,' i. e. to kiss it with eagerness. सादरं चुम्बनं पानमुच्यते says the marginal note of the Ms. B. *Cf.* R. II. 19. " पपौ निमेषालसपक्ष्मपंक्तिरुपोषिताभ्यामिव लोचनाभ्याम्." अपुष्परेणुव्यथिते—Analyse पुष्पाणां रेणुः पुष्परेणुः तेन व्यथिते पुष्परेणुव्यथिते । न पुष्परेणुव्यथिते अपुष्परेणुव्यथिते, ' Not injured or affected by the dust of pollens of flowers.' मुखगन्धवाहं—Analyse मुखस्य गन्धवाहः मुखगन्धवाहः तं तादृशं, ' A fragrant breath issuing forth from the mouth.' ललनाभिर्दृष्टः ईशः तस्याः नेत्रे मुखगन्धवाहं चिक्षेप—' The king gave a fragrant breath of his mouth to the eyes

though not affected by the dust of the pollens of flowers of a certain damsel, having a beautiful set of teeth, when he was seen by young damsels, although he had lifted up her lily-like face for kissing.' *Cf.* S'ak. III. 78. "कथमप्युन्नमितं न चुम्बितं तु."

St. 20. पुष्पावभङ्गे—Construe निजहस्तकांत्या विन्यस्तरागं कठिनं पलाशं पुष्पावभंगे प्रवालकृत्ये विनियोजयन्ती परा भर्त्रा सस्मितमालिलिंगे. पुष्पावभङ्गे—Analyse पुष्पाणां अवभङ्गः पुष्पावभङ्गः तस्मिन् तादृशे, 'Plucking of flowers.' निजहस्तकान्त्या—Analyse निजश्चासौ हस्तश्च निजहस्तः तस्य कांतिः तया तादृश्या, 'By the lustre of her own hand.' विन्यस्तरागं—Analyse विन्यस्तो रागो यस्मिन् स विन्यस्तरागः तं तादृशं, 'To which the colour has been transferred or transmitted.' प्रवालकृत्ये—Analyse प्रवालानां कृत्यं प्रवालकृत्यं तस्मिन् तादृशे, 'In forming a bouquet or nosegay of tender sprouts' प्रवालकृत्ये पलाशं विनियोजयन्ती परा भर्त्रा सस्मितमालिलिंगे—'Another damsel employing (or using) a hard Palás'a, to which was imparted the hue of her own hand, at the time of plucking the flowers in forming a bouquet of sprouts, was embraced with smiles by her lord.'

St. 21. स्निग्ध°—Construe चारुतमालकान्ता प्रियंगुश्यामद्युतिस्त्वं स्निग्धद्विजालीरुचिरं गन्धाहृतभृंगचक्रं एतत् सन्माधवीमण्डपमास्यं बिभर्षि. स्निग्ध°—Analyse स्निग्धाः कान्तिप्रदाः ये द्विजाः दन्ताः तेषां आली आवली तया रुचिरं सुभगं, 'Charming on account of a row or set of beautiful teeth.' Refers to आस्यं. As applied to the upper-shoot of a Mádhavî or Vàsantî creeper it may be analysed as, स्निग्धाः शोभनाः ये द्विजाः पक्षिणः तेषां आली श्रेणिः तया रुचिरं सुभगं, 'Graceful on account of a line of beautiful birds.' प्रियंगुश्यामद्युतिः—Analyse प्रियंगुवत् श्यामा द्युतिर्यस्याः सा, 'Having a complexion or lustre dark like that of the Priyangu creeper.' As applied to a Vásantî creeper the compound may be analysed as, प्रियंगुसम्पर्कात् श्यामा नीला कृशा वा द्युतिर्यस्याः सा, 'Having a splendour dark-blue (thin or spare) from association with a Priyangu creeper.' चारुतमालकान्ता—Analyse चारुतमः अतिशयसुन्दरः अलकान्तः कुन्तलप्रान्तो यस्याः सा, 'Having a border of hair ravishingly beautiful.' As applied to a Vàsantî creeper it may be analysed as, चारुः कमनीयो यस्तमालः तस्य संपर्कात् कान्ता, 'Brilliant from association with a graceful Tamâla tree.' गन्धाहृतभृङ्गचक्रं—Analyse गन्धेन मुखोच्छ्वासगन्धेन आहृतं भृङ्गाणां अभीकानां चक्रं वृन्दं येन तत्, 'The fragrant breath whereof had attracted a hoard of lechers or libidinous persons.' As applied to the upper-shoot of a Màdhavî creeper, the compound may be analysed as, गन्धेन सौगन्धेन आहृतं आकृष्टं भृङ्गाणां भ्रमराणां चक्रं कुलं येन तत्, 'Which had attracted a multitude of bees

by reason of its sweet odour.' सन्माधवीमण्डपं—Analyse सतां सज्जनानां माधवीनां दूतीनां च मण्डपः आश्रयः यस्मिन् तत्, 'Having an asylum for the good as well as for bawds.' As applied to the upper-shoot of a Mádhavî creeper, the compound may be analysed as, सच्च तन्माधवीमण्डपं च सन्माधवीमण्डपं 'An excellent arbour of Mádhaví creeper.' स्वं स्निग्धद्विजालीरुचिरं गन्धाहृतभृङ्गचक्रमेतदास्यं बिभर्षि—'With thy hair the ends of which are ravishingly beautiful, with thy complexion dark like that of the Priyangu creeper, thou wearest a face, charming on account of a row of beautiful teeth, the fragrant breath whereof has attracted a hoard of lechers and is an asylum for the good as well as for bawds.'

St. 22. मध्येललाटं—Construe मध्येललाटं तिलकस्य तृप्तिः इयं च ओष्ठद्युतिः पाटला भाति पुन्नागसंयोगविभूषितायास्ते चेतः अशोकभावं यातम्. मध्येललाटं—Analyse ललाटस्य मध्यं मध्येललाटं, 'In middle of the forehead.' तिलक *m. n.* Expl:—कुंकुमचन्दनादिकृतविशेषकम्। अथ वा। सुचिभेदजनितकस्तुरीचिह्नम्। A mark made with saffron powder, sandal paste, or unguents, upon the forehead and between the eyebrows, either as an ornament or sectarian distinction. It also means a species of tree with beautiful flowers so called either because it is similar in some way to the sesamum plant or because it is used as an ornament like the mark on the forehead. ओष्ठद्युतिः—Analyse ओष्ठयोः द्युतिः ओष्ठद्युतिः, 'The redness of thy lips.' In the other sense, the compound may be analysed as, ओष्ठवद् द्युतिर्यस्याः सा, 'Having a lustre like that of the lips.' पाटला—'Having pale-red colour,' or 'the red Lodhra tree.' पुन्नागसंयोगविभूषितायाः—Analyse पुरुषाणां नागः पुन्नागः पुरुषोत्तमः तस्य संयोगेन विभूषिता पुन्नागसंयोगविभूषिता तस्याः तादृश्याः, 'More graceful from her association with the best of men' (i. e. a king). In the other sense the expression may be analysed as, पुन्नागस्य केसरवृक्षस्य संयोगेन संपर्केण विभूषितायाः, 'More beautiful by the contact of the Kesara tree.' अशोकभावं—Analyse न शोकः अशोकः तस्य भावः अशोकभावः तं तादृशं 'Absence of grief.' In the other sense अशोकभाव means, 'Transformed into an As'oka tree.' मध्येललाटं तिलकस्य तृप्तिः इयं च ओष्ठद्युतिः पाटला भाति—'There is the Tilak mark in middle of thy forehead and the lustre of thy lips appears red and thy heart is now free from grief for thou lookest more graceful from thy association with the best of men.' Said by the female friends to their नायिका.

St. 23. किं—Construe हे बाले श्रमकारिणा कौतुकेन किं ते। त्वं उद्यानविहाररागं सृज। अस्योपवनस्य त्वं लक्ष्मीः इत्येवं सखीभिर्ललना ऊचे. श्रमकारिणा—Analyse श्रमान् कारयतीति श्रमकारी तेन, 'Causing exertions.' उद्यान-

विहाररागं—Analyse उद्यानेषु विहाराः उद्यानविहाराः तेषु रागः तं तादृशं, 'Ardent affection or passion for sports in gardens.' When alluded to उद्यान, a celebrated Buddhist place of pilgrimage and its Vihàras or monasteries, the compound may be analysed as, उद्यानेषु उदग्वर्तिदेश-विशेषेषु। अथ वा। विपिचां सुगतानां वा स्थानविशेषे ये विहाराः सुगतालयाः तेषु रागः अनुरागः तं तादृशं, 'An ardent devotion to Buddhist temples situated in the country of उद्यान.' विहार *m.*—A Buddhist or Jaina temple or convent originally the hall where the Buddhist priests met or walked about; afterwards these halls were used as temples and sometimes became the centre of a whole monastic establishment.' हे बाले श्रमकारिणा कौतुकेन किं ते। त्वं उद्यानविहाररागं सृज—'Of what use, O young girl, is this vehement desire which puts you to exertions pray, abandon your passion for sports in gardens.' अस्योपवनस्य त्वं लक्ष्मीः इत्येवं सखीभिर्ललना ऊचे—'You are in-sooth the Goddess of Fortune of this garden (or planted-forest)': 'in these words, was the young damsel addressed by her female friends.' Mark the names of the several trees that occur in the two preceding stanzas and which make the attribute उपवनस्य लक्ष्मीः, given to the girl by her friends, appropriate.

St. 24. प्रियेण—Construe प्रियेण तन्व्याः कर्णे विनिवेशितस्य नवाशोकदलस्य रागः आनीलया नेत्ररुचा निरस्तः [सन्] तस्याः विपक्षचक्षुरेव जगाम. नवाशोकदलस्य—Analyse अशोकस्य दलं अशोकदलम्। नवं च तदशोकदलं च नवाशोकदलं तस्य तादृशस्य, 'Of a new leaf of As'oka.' नेत्ररुचा—Analyse नेत्रयोः रुक् नेत्ररुक् तया 'By the beauty of eyes.' विपक्षचक्षुः—Analyse विपक्षस्य चक्षुः विपक्षचक्षुः तत्, 'To the eyes of a rival.' प्रियेण तन्व्याः कर्णे विनिवेशितस्य नवाशोकदलस्य रागः विपक्षचक्षुरेव जगाम—'The hue of a new leaf of As'oka tree put on the ear of a lovely girl by her lover, being expelled (or cast away) by the bluish lustre of her eyes, did go to the eyes only of her rival.' A similar idea occurs in the 18th verse.

St. 25. हारिप्रलापः—Construe अथ हारिप्रलापः गुणानां निधिः पर्यन्तभूमौ मदमन्दपातं चक्षुर्निधाय निकटोपयातां प्रतिहाररक्षीं वाचमुवाच. हारिप्रलापः—Analyse हारिः प्रलोभकः प्रलापः प्रवादः यस्य सः, 'Of an attractive speech.' 'Of a pleasing address.' मदमन्दपातं—Analyse मदेन मन्दः पातः यस्य तत्, 'The blinking whereof was soft or tardy through excessive joy or delight.' पर्यन्तभूमौ—Analyse पर्यन्ता चासौ भूमिश्च पर्यन्तभूमिः तस्यां तादृश्यां, 'On a neighbouring or adjacent ground or district.' निकटोपयातां—Analyse निकटं उपयाता निकटोपयाता तां तादृशीं, 'Who had come near.' 'Who had advanced near.' प्रतिहाररक्षीं—Analyse

प्रतिहारं रक्षतीति प्रतिहाररक्षी तां तादृशीं, 'A female door-keeper.' 'A portress.' द्वारिप्रलापः निकटोपयातां प्रतिहाररक्षीं वाचमुवाच—"Then directing his eyes, the blinking whereof was soft through excessive delight to the region round about, that king of a pleasing address, and a receptacle of merits, spoke a word to a portress who had advanced to him.'

St. 26. कुर्वन्ति—Construe शुभाभिः नयनप्रभाभिः लोभेन विलोकयन्त्यः कुरङ्गनेत्राः तरुण्यः विलसत्प्रसूनमेनं पुष्पतरुं शारत्विषं कुर्वन्ति. कुरङ्गनेत्राः—Analyse कुरङ्गाणां नेत्राणीव नेत्राणि यासां ताः तादृश्यः, 'Fawn-eyed damsels.' विलसत्प्रसूनं—Analyse विलसन्ति प्रसूनानि यस्य स विलसत्प्रसूनः तं तादृशं, 'Having beautiful or shining flowers or buds.' नयनप्रभाभिः—Analyse नयनानां प्रभाः नयनप्रभाः ताभिः, 'By the flashing lustre of eyes.' 'By the splendour of eyes.' शारत्विषं—Analyse शारा त्विद् यस्य स शारत्विद् तं तादृशं, 'Bearing a mottled splendour.' 'Displaying a mottled lustre.' पुष्पतरुं—Analyse पुष्पाणां तरुः पुष्पतरुः तं तादृशं, 'A flowery tree.' 'A tree laden with flowers.' लोभेन विलोकयन्त्यः तरुण्यः पुष्पतरुं शारत्विषं कुर्वन्ति—'The fawn-eyed young damsels, eagerly looking with their beautiful eyes, flashing forth lustre, at this flowery tree having shining flowers, give it an aspect of mottled splendour.'

St. 27. विभाति—Construe गन्धाहृता चम्पककुड्मलाग्रे सरन्ती भृङ्गीसरणी प्रदीपस्य अन्तं निषेवमाणा कज्जलरेखिणी धूमावलीव विभाति. भृङ्गीसरणी—Analyse भृङ्गीणां सरणी, 'A continuous line of female black-bees.' गन्धाहृता—Analyse गन्धेन आहृता गन्धाहृता, 'Attracted by sweet odour.' चम्पककुड्मलाग्रे—Analyse कुड्मलानां अग्रं कुड्मलाग्रम् । चम्पकानां कुड्मलाग्रं चम्पककुड्मलाग्रं तस्मिन् तादृशे, 'On the foremost points or ends of Champaka buds.' धूमावली—Analyse धूमस्य आवली धूमावली, 'A line of smoke.' कज्जलरेखिणी—Analyse कज्जलस्य रेखिणी कज्जलरेखिणी, 'Having lines of collyrium.' 'Bearing streaks of lamp-soot.' भृङ्गीसरणी प्रदीपस्य अन्तं निषेवमाणा धूमावलीव विभाति—'The continuous line of female black-bees attracted by the sweet odour and moving about the foremost points of Champaka buds looks like a line of smoke, having streaks of collyrium, and resting on the end of a light.'

St. 28. विलोकय–Construe–उदन्यया वारिविगाहितायाः हरिण्याः अक्ष्णोः शितिकान्तिजालैः तन्निकटप्ररूढं रक्तोत्पलं इन्दीवरत्वं गमितमिति विलोकय. शितिकान्तिजालैः–Analyse शितिश्चासौ कान्तिश्च शितिकान्तिः तस्याः जालानि तैः, 'By the streams of blue-black light, or splendour.' उदन्या *f.* Expl.–उदकस्येच्छा उदन्या । अशनायावत्, 'Thirst.' *Cf.* Páṇi. VII. 4. 34. "अशनायोदन्यधनाया बुभुक्षा-

पिपासागर्द्धेषु " 'The Denominative roots अशनाय, उदन्य, and धनाय are irregularly formed, when they respectively mean 'to be hungry,' 'to be thirsty,' 'to be greedy.' 'Thus अशनायति from अशन + क्यच्, आ instead of ई; the other form being अशनीयति who is not hungry at the time, but wishes to get food for some future occasion, and therefore when not meaning 'to be hungry'; उदन्यति 'he is thirsty,' उदन् being substituted for उदक; in any other sense we have उदकीयति, who wants water for purpose of bathing &c. धनायति 'he is greedy;' in any other sense, धनीयति who is poor and therefore wishes to get riches. वारिविगाहिताया:—Analyse वारिषु विगाहिता तस्या: 'Of the animal impelled to rush into water.' 'Of the animal made to enter in water.' रक्तोत्पलं—Analyse रक्तं च तदुत्पलं च रक्तोत्पलं, 'Red-lotus.' तन्निकटप्ररूढं—Analyse प्रकर्षेण रूढं प्ररूढम्। तस्या: निकटे प्ररूढं तन्निकटप्ररूढं, 'Grown up in her vicinity.' 'Stood near her.' तन्निकटप्ररूढं रक्तोत्पलं इन्दीवरत्वं गमितमिति विलोकय—'See, O portress, that the red-lotus which is grown up near the animal, is reduced to the state of a blue-lotus, by reason of the streams of blue-black light shooting forth from the eyes of a female antelope, impelled to rush into water by excessive thirst.'

St. 29. संछादिते—Construe पद्मरजोवितानै: संछादिते वारिणि परिभ्रमन्नसौ राजहंस: स्ववर्त्मरेखाभि: विभज्य खगेभ्य: अब्जवनं प्रयच्छतीव. पद्मरजोवितानै:—Analyse पद्मानां रजांसि पद्मरजांसि तेषां वितानानि तै: तादृशै:, 'By a cover of pollen-dust of lotuses.' राजहंस:—Analyse हंसानां राजा राजहंस:, 'A king-goose.' 'A Royal swan.' 'A flamingo.' स्ववर्त्मरेखाभि:—Analyse स्वस्य वर्त्म स्ववर्त्म तस्य रेखा: ताभि: 'Lines made by his path (in water).' अब्जवनं—Analyse अब्जानां वनं अब्जवनं, 'A bed or cluster of lotuses.' Here वन means, a quantity of lotuses or other plants growing in a thick bed or cluster; as, कुमुदवनं, 'A bed or cluster of water-lilies.' वारिणि परिभ्रमन्नसौ राजहंस: खगेभ्य: अब्जवनं विभज्य प्रयच्छतीव—'Yonder the swan, swimming in (or moving over) water enveloped in a cover of pollen-dust of lotuses gives, as it were, a bed of lotuses to the birds, dividing it by a line of demarcation made by its watery path.'

St. 30. इयत्प्रमाण:—Construe तव प्रसादेन इयत्प्रमाणोऽपि सर:प्रदेशो मम भोग्योऽस्तु इत्येष शंपाय विसारितांसो मद्गुर्हंसाय संदर्शयतीव. इयत्प्रमाण:—Analyse इयत् प्रमाणं यस्य स इयत्प्रमाण:, 'Having only so large (so much) a measure.' सर:प्रदेश:—Analyse सरस: प्रदेश: सर:प्रदेश:, 'A region or

portion of a lake.' मद्गु *m.*—'A kind of aquatic bird.' 'A kind of cormorant.' करढोंक in Maràthi. शोषाय is equivalent to शोष्टुं, 'To dry up.' विसारितांसः—Analyse विसारितौ अंसौ येन स तादृशः, 'With its shoulder-wings spread.' तव प्रसादेन इयत्प्रमाणोऽपि सरःप्रदेशः मम भोग्योऽस्तु—'Even to such an extent or measure may the portion of the lake be set aside for my use by thy favour.' इत्येष विसारितांसो मद्गुः शोषाय हंसाय संदर्शयतीव—'In this way, yonder the cormorant, with its shoulder-wings spread, in order to dry them, points out, as it were, the lake to the swan.'

St. 31. पद्मः—Construe अयं पद्मः पवनावधूतैः तरङ्गलेशैः निर्धौतरागः सितो नु। द्रुहिणेन कृतादिकर्मापि यावकेन तावन्न संभावितो नु. पवनावधूतैः—Analyse पवनेन अवधूताः पवनावधूताः तैः तादृशैः, 'Set in motion (or shaken) by the wind or breeze.' निर्धौतरागः—Analyse निर्धौतो रागो यस्य स तादृशः, 'The hue of which has been washed away.' तरङ्गलेशैः—Analyse तरङ्गाणां लेशाः तरङ्गलेशाः तैः तादृशैः 'By watery particles (or by small quantities) of ripples.' द्रुहिणः [or द्रुहणः or द्रुघणः]—'An epithet of Brahmá.' The word is derived from द्रुह् *vi.* 4. P. (वेट्) 'to bear hatred,' 'to seek to hurt.' द्रुह्यति दुष्टेभ्यः। अथ वा। द्रुः संसारवृक्षो हन्यतेऽनेनेत्यर्थः. *Cf.* Bháguri "ब्रह्मात्मभूः स्याद्द्रुहिणो द्रुघणश्च पितामहः." कृतादिकर्मा—Analyse कृतं आदिकर्म यस्य स तादृशः, 'The first framing or creation of which has been made.' यावक *m. n.* 'A lac.' यावकेन denoting करण. *Cf.* Pánini. I-4-42. "साधकतमं करणं." 'That which is especially auxiliary in the accomplishment of the action is called the instrument or करणकारक.' सितोऽयं पद्मः पवनावधूतैः तरङ्गलेशैः निर्धौतरागो नु—'Was it that this lotus became white when its hue was washed off by particles of ripples, set in motion by breezes?' द्रुहिणेन कृतादिकर्मापि यावकेन तावन्न संभावितो नु—'Or was it not honoured, indeed with lac by Brahmá, even though its first creation (or framing) had been made by him?'

St. 32. ततः—Construe एवं वदन्नेव स वृषेन्द्रोपमखेलगामी दीर्घभुजः सलिलं सलीलं विभिन्दन् वरांगनाभिर्वृतस्ततो दीर्घिकां जगाहे. *Cf.* Ku. VII. 49. "स खेलगामी तमुवाह वाहः सशब्दचामीकरकिंकिणीकः। तटाभिघातादिव लग्नपंके धुन्वन्मुहुः प्रोतघने विषाणे॥" सलीलं *adv.*—Analyse लीलया सहितं सलीलं, 'Playfully.' 'Sportingly.' वरांगनाभिः—Analyse वराश्च ताः अङ्गनाश्च वरांगनाः ताभिः, 'By beautiful or noble damsels.' वृषेन्द्रोपमखेलगामी—Analyse वृषेन्द्रोपमाः ये खेलाः तैः गच्छतीति, 'Moving on with sports similar to (or resembling) those of a best bull (or those of an excellent athlete; or those of an amorous or lustful man).' वृष means, one of the four classes into which men

are divided in erotic works. *Cf.* " पद्मिनी चित्रिणी चैव शंखिनी हास्तिनी तथा। शशो मृगो वृषोऽश्वश्च स्त्रीपुंसोर्जातिलक्षणम्. " दीर्घभुजः—Analyse दीर्घौ भुजौ यस्य स दीर्घभुजः, ' Having long arms. ' ' Long-armed. ' एवं वदन् वरांगनाभिर्वृतो दीर्घभुजः स दीर्घिकां जगाहे—' Conversing thus and playfully splitting water that long-armed king, moving on with sports resembling those of an excellent bull, thence immediately entered into an artificial pond, surrounded by noble damsels.'

St. 33. तस्य—Construe क्षत्रकुलैककेतोः तस्योरसि कमलाकरेण न्यस्ता पंकजरेणुपंक्तिः तरङ्गदोषा सौवर्णसूत्रश्रियं मुहुराततान. क्षत्रकुलैककेतोः—Analyse क्षत्राणां कुलं क्षत्रकुलम्। एकश्चासौ केतुश्च एककेतुः। क्षत्रकुलस्य एककेतुः क्षत्रकुलैककेतुः तस्य तादृशस्य, ' On a sole banner of Kshatriya race. ' ' On the best of the Kshatriyas. ' तरङ्गदोषा—Analyse तरङ्गा एव दोः तरङ्गदोः तेन तरङ्गदोषा, ' With an arm consisting of ripples or waves.' ' With an arm made of ripples. ' The Instrumental singular of तरङ्गदोस् is तरङ्गदोषा or तरङ्गदोष्णा. कमलाकरेण—Analyse कमलानां आकरः कमलाकरः तेन तादृशेन, ' By a lake where lotuses abound. ' ' By a lake abounding in lotuses. ' पङ्कजरेणुपंक्तिः—Analyse पङ्के जातानि पङ्कजानि तेषां रेणवः तेषां पंक्तिः पङ्कजरेणुपंक्तिः, ' A streak or line made of pollen-dust of lotuses. ' सौवर्णसूत्रश्रियं—Analyse सुवर्णस्य विकारः सौवर्णं। सौवर्णं च तत् सूत्रं च सौवर्णसूत्रं तस्य श्रीः तां तादृशीं, ' Beauty or splendour of a golden thread. ' पङ्कजरेणुपंक्तिः सौवर्णसूत्रश्रियं तरङ्गदोषा मुहुराततान—'A streak of pollen-dust placed by the lake, abounding in lotuses, and with ripples for its hands, on the breast of that king, the sole banner of the Kshatriya race, expanded at every moment the beauty of golden thread. '

St. 34. पद्माकरः—Construe पद्माकरः कामीव ऊरुदघ्नं वारि विगाहमानं रामाजनं नितम्बभागे वीचीकराग्रेण शनैः सशब्दं व्यास्फालयामास. पद्माकरः—Analyse पद्मानां आकरः पद्माकरः, ' A large pond abounding in lotuses. ' रामाजनं—Analyse रामाः एव जनः रामाजनः तं तादृशं, ' Young women. ' *Cf.* S'ak. III. IV. सखीजनं. ऊरुदघ्नं, Expl:—ऊरू प्रमाणमस्य ऊरुदघ्नं, ' Reaching as far as the thighs. ' *Cf.* जानुदघ्नं. In this sense, the Taddhita affix द्वयस is also employed, as, ऊरुद्वयसं, पुरुषद्वयसं, हस्तिद्वयसं. वीचीकराग्रेण—Analyse वीच्यः एव कराग्रं तेन, ' By fingers of waves. ' नितम्बभागे—Analyse नितम्बानां भागः नितम्बभागः तस्मिन् तादृशे. ' On the surface of the hips (or buttocks). ' सशब्दं *adv.*—Analyse शब्देन सह सशब्दं, ' With noise,' ' noisily. ' पद्माकरः वारिविगाहमानं रामाजनं नितम्बभागे वीचीकराग्रेण व्यास्फालयामास—' The lotus-lake, like a lover, gradually slapped with noise, with its fingers of ripples, the young damsels, on the surface of their hips, who had entered into water reaching as far as their thighs. '

St. 35. तस्यावगाहे—Construe अथ तस्य वनिताजनस्य अवगाहे पीननितम्बचक्रैः दूरीकृतः तनुषुदरेषु लब्धप्रवेशः सरस्तरङ्गः स्तनैरुदासे. वनिताजनस्य—Analyse वनिताः एव जनः वनिताजनः तस्य तादृशस्य, 'Of the crowd of young women.' पीननितम्बचक्रैः—Analyse पीनाश्च ते नितम्बाश्च पीननितम्बाः तेषां चक्राणि तैः तादृशैः, 'By multitudes of fat hips.' 'By clusters of fleshy hips.' लब्धप्रवेशः—Analyse लब्धः प्रवेशो येन, 'Got an admission.' 'Had an entrance.' सरस्तरङ्गः—Analyse सरसः तरङ्गः सरस्तरङ्ग, 'A wave of the lake.' उदास् *vt.* 4. A. (सेट्). 'To throw aside.' तनुषूदरेषु लब्धप्रवेशः सरस्तरङ्गः स्तनैः उदासे—'When that crowd of young damsels entered the lake, the ripples of the lake were sent to a distance (or expelled) by the multitudes of their fleshy hips, then they obtained entrance in their thin bellies but they were again thrown aside by their breasts.'

St. 36. क्रीडा°—Construe तासां क्रीडापरिक्षोभरयेण पङ्कजरेणुजाले उत्सारिते [सति] तदम्बुरुहाकरांभः कुसुम्भरक्तात् कञ्चुकात् कृष्टमिव बभासे. क्रीडा°—Analyse क्रीडानां परिक्षोभः तस्य रयः तेन तादृशेन, 'On account of the force due to the disturbance by their sports.' पङ्कजरेणुजाले—Analyse पङ्कजानां रेणवः पङ्कजरेणवः तेषां जालं पङ्कजरेणुजालं तस्मिन् तादृशे, 'A net of pollen-dust of lotuses.' कुसुम्भरक्तात्—Analyse कुसुम्भमिव रक्तं कुसुम्भरक्तं तस्मात्, 'Red as safflower or saffron.' अम्बुरुहाकरांभः—Analyse अम्बुषु रोहन्तीति अम्बुरुहाः पद्माः तेषां आकरः आश्रयः अम्बुरुहाकरः तस्य अंभः, 'Water of a lake abounding in lotuses.' कृष्टं—Is equivalent to आकृष्टं meaning, 'drawn,' 'squeezed.' बभासे—Is equal to आबभासे, 'shone' 'blazed,' 'looked splendid.' पङ्कजरेणुजाले उत्सारिते अम्बुरुहाकरांभः कञ्चुकात् कृष्टमिव बभासे—'When the cluster of pollen-dust of lotuses was driven away by the force due to the disturbance of their sports, the water of the lotus-lake looked translucent as if squeezed out from a bodice, red as saffron.'

St. 37. रामाभिः—Construe अग्रे उत्कण्टकदण्डं सरोजं रामाभिः छिदया न सम्भावितं [परं] इन्दीवराणां पंक्तिः उदहारि। जनस्य मृदुष्वेव अभिरुचिर्हि [न पुनस्तीक्ष्णेषु]. उत्कण्टकदण्डं—Analyse उत्कण्टकः उद्गतकण्टकः दण्डो नालं यस्य सः, 'The stalk of which had burst into thorns.' 'Bearing a thorny stalk.' An adjective to सरोजं. The Calcutta edition has the following remark:—"उग्रदण्डपातिनो नृपादेः सहसा शत्रुणा छेदो न सम्भवतीति ध्वनिः." छिदा *f.*—'Dividing.' 'Cutting.' 'Plucking.' 'Rooting up.' सरोजं—Analyse सरसि जातं सरोजं, 'A lotus.' अग्रे उत्कण्टकदण्डं सरोजं रामाभिः छिदया न सम्भावितं [परं] इन्दीवराणां पंक्तिः उदहारि—'A lotus, in front, with its thorny stalk, was not honoured by its plucking; but a

row of blue-lilies was rooted up by the young damsels.' जनस्य मृदुष्वेव शक्तिर्दीप्ता—' The fiery energy of people (generally) bursts upon the weak only.'

St. 38. बाला°—Construe अपां वैमल्यं बालापरिष्वङ्गसुखाय अन्तर्जलावारितमूर्ति यातुः पत्युर्विघ्नाय बभूव । जलाशयानां प्रसादो व्यर्थो हि. बाला°—Analyse बालानां परिष्वङ्गः बालापरिष्वङ्गः तस्य सुखं तस्मै, 'In order to have the pleasure (or to get the happiness) of embracing girls.' अन्तर्जलावारितमूर्ति *adv.*—Analyse अन्तर्जले आवारिता आवरणं प्रापिता मूर्तिस्तनुर्यस्मिन्कर्मणि यथा स्यात् तथा, 'In a manner in which his body was concealed or hidden in the interior of water.' Or it may be analysed as, जलैरावारिता आवरणं प्रापिता मूर्तिस्तनुर्यस्मिन्कर्मणि यथा स्यात् तथा, 'In a manner in which his body was hidden under the covering of water.' And अन्तः may be construed with यातुः. अन्तर्यातुः—' Swimming in the interior of water.' ' Stealthily moving in the inner bed of water.' जलाशयानाम्, Expl.—जलानि शेरते एष्विति जलाशयाः तेषां, ' Of lakes,' ' of reservoirs.' By the application of " डलयोः सावर्ण्यं " were we to accept the reading जडाशयानाम् as given by some of the Mss., प्रसाद would then mean, चित्तानुरागः ' mental attachment,' 'affection,' or प्रेमोद्गारः 'expressions of kind regards' &c. अपां वैमल्यं बालापरिष्वङ्गसुखाय अन्तर्जलावारितमूर्ति यातुः पत्युर्विघ्नाय बभूव—'The transparency of water became a source of obstacles to that Royal husband moving in a manner in which his body was concealed in the inner-bed of water, with a desire of getting the pleasure of embracing young girls.' जलाशयानां प्रसादो व्यर्थो हि—' For the clearness of water in lakes becomes a useless appendage (to lovers).' जडाशयानां प्रसादो व्यर्थो हि—' For the expressions of kindness (or kind regards) in case of the stupid becomes useless.'

St. 39. भृङ्गाः—Construe सरोजखण्डे निलीनेन योषिद्द्वितीयेन नराधिपेन उत्सारिताः भृङ्गाः अपरासां निहितावतंसं कर्णान्तं वक्तुमिव ईयुः. सरोजखण्डे—Analyse सरोजानां कमलानां खण्डं वृन्दं सरोजखण्डं तस्मिन् तादृशे, 'In the clusters of lotuses.' In the collection of lotuses.' योषिद्द्वितीयेन—Analyse योषिता द्वितीयः योषिद्द्वितीयः तेन, ' With a young woman as a second.' 'Or with a young woman making the second' i. e. the king himself and a young girl. This is not an unusual compound. *Cf.* the expressions मातृषष्ठाः पाण्डवाः, ' The Pàndavas with their mother as the sixth.' छायाद्वितीयो नलः, 'Nala made two by his shadow.' अधीते चतुरो वेदानाख्यानपञ्चमान्, ' He reads the four Vedas with their A'khyánas as a fifth.' नराधिपेन—Analyse नराणां अधिपः

नराधिपः तेन तादृशेन 'By the lord of people.' कर्णान्तं—Analyse कर्णयोः अन्तः कर्णान्तः तं तादृशं, 'To the extremity of the ears.' 'Near or close to the ears.' निहितावतंसं—Analyse निहितः अवतंसो यत्र स निहितावतंसः, 'On which the ear-ornaments were put.' *Cf.* Ku. VII. 38. "स्ववाहनक्षोभचलावतंसाः." नराधिपेन उत्सारिताः भृङ्गाः अपरासां कर्णान्तं वक्तुमिव ईयुः—'The bees, which were driven away, by the lord of people, with himself and a young damsel, hidden behind a cluster of lotuses, came close to the ear, decorated with ear-ornaments of other damsels as if, to speak to them (of the king's hiding place).'

St. 40. नृपेण—Construe केलीकलहे नृपेण अपरस्याः छिन्नच्युतस्य हारस्य समीपे अम्बुजिनीपलाशे पूर्वस्थिताः वीचीकणिकाः संवरणान्यभूवन्. केलीकलहे—Analyse केलीषु कलहः केलीकलहः तस्मिन् तादृशे, 'In a love-quarrel.' छिन्नच्युतस्य—Analyse आदौ छिन्नः पश्चात् च्युतः छिन्नच्युतः तस्य तादृशस्य, 'First broken and then dropped down.' अम्बुजिनीपलाशे—Analyse अम्बुजिन्याः पलाशं अम्बुजिनीपलाशं तस्मिन् तादृशे, 'On a leaf of the lotus-plant.' वीचिकणिकः—Analyse वीचीनां कणिकाः वीचीकणिकाः, 'Drops of waves.' 'Drops of ripples.' पूर्वस्थिताः—Analyse पूर्वं स्थिताः पूर्वस्थिताः, 'Lying or existing before.' 'Previously settled.' 'Settled before.' संवरण *n.*—An admirable mixture or blending of things so as to cover or screen the sight of the beholder and thus make him unable to distinguish the real object from the fictitious one by the help of his physical eyes. हारस्य समीपे अम्बुजिनीपलाशे पूर्वस्थिताः वीचीकणिकाः संवरणान्यभूवन्-'In a love-quarrel the pearl necklace of a certain girl, having been broken by the king, dropped on a leaf of the lotus-plant on which the drops of ripples were settled before, close to her, and so became an illusive screen to her eyes.' In the present instance the young girl was not able to make out her broken pearl necklace with her physical eyes, although it was lying on a lotus-leaf on which were previously settled water-drops; and the mixture of the pearls with those drops was so unique as to baffle all attempts of discernment.

St. 41. क्रीडाविमर्दे—Construe क्रीडाविमर्दे बालमृणालभङ्गशङ्काहृतः हंसः स्वच्छे जले भिन्नभ्रष्टस्य शंखमयस्य वलयस्य खण्डं विकृष्य चिक्षेप. क्रीडाविमर्दे-Analyse क्रीडायां विमर्दः क्रीडाविमर्दः तस्मिन् तादृशे, 'In the crushing due to sports.' 'In the pressing or rubbing together due to sports.' भिन्नभ्रष्टस्य—Analyse आदौ भिन्नं पश्चाद् भ्रष्टं भिन्नभ्रष्टं तस्य तादृशस्य, 'First broken and then dropped down to the bottom.' बालमृणाल°—Analyse बालश्चासौ मृणालश्च बालमृणालः तस्य भङ्गः छेदः तस्य शङ्कया आहृतः, 'Drawn by a suspicion of its being (suspecting it to be) a piece of a fresh lotus.' शंख-

मयस्य, Expl.—शंखरूपं शंखमयं तस्य तादृशस्य, ' Made of a conch, ' ' Made of a shell. ' क्रीडाविमर्दे हंसः स्वच्छे जले भिन्नभ्रष्टस्य वलयस्य खण्डं विकृष्य चिक्षेप– ' In the crushing due to their sports, a swan drawn by a suspicion of its being a piece of a fresh lotus, drew out a piece of a conch (or shell) bracelet which was broken and fell down in the transparent water and threw it away. '

St. 42. रोधोलता°—Construe अथ कांचिनादे सर्पति [सति] उत्त्रासमुक्तः कलहंसनादो रोधोलतामण्डपयातकान्तासंभोगतः व्यलीकाद् राजानं ररक्ष. रोधोलता°—Analyse रोधसि केलीसरस्तीरे यो लतामण्डपो लताकुञ्जः तत्र यातायाः गतायाः कान्तायाः रमण्याः सम्भोगतः सम्भोगोद्भवात्, ' From a sensual injoyment with a beloved who had gone to a bower of creepers on the bank of the pleasure-pond. ' कांचिनादे—Analyse कांचेः नादः कांचिनादः तस्मिन् तादृशे, ' In the jingling sounds of a zone. ' उत्त्रासमुक्तः—Analyse उद्गतः त्रासः उत्त्रासः तस्माद् मुक्तः उत्त्रासमुक्तः, ' Given out from a great terror. ' कलहंसनादः—Analyse कलहंसस्य नादः कलहंसनादः, ' A cry of the swan. ' उत्त्रासमुक्तः कलहंसनादो व्यलीकाद् राजानं ररक्ष —'When the jingling sound of the zone was spreading around, a cry of the swan, given out from great terror, preserved the king from unpleasantness consequent on a carnal enjoyment with a beloved who had gone to a bower of creepers on the bank (of the pleasure-pond). '

St. 43. निरुद्ध°—Construe निरुद्धहासस्फुरिताधरोष्ठः सद्यःसमाविष्कृतरोमहर्षः तस्य गण्डो जलावमग्नप्रमदोपगूढेरुद्भासको बभूव. निरुद्ध°—Analyse निरुद्धेन हासेन स्फुरितौ अधरोष्ठौ यस्य स तादृशः, ' The (nether and upper) lips of which were throbbing from a suppressed laughter. ' सद्यः°—Analyse सद्यः तत्क्षणमेव समाविष्कृतः संदर्शितो रोमहर्षो येन सः, ' The bristling of hair on which was instantly manifested or shown. ' जलावमग्न°—Analyse जलेषु अवमग्ना या प्रमदा तस्याः उपगूढिः तस्याः जलावमग्नप्रमदोपगूढेः, ' Of the embrace of a young damsel immersed in water. ' उपगूढिः *f.*—Is equivalent to उपगूहनं, ' An embrace. ' उद्भासकः—Analyse उद्भासयतीति उद्भासकः, ' Causing to appear. ' ' Making evident. ' ' Showing. ' ' Manifesting. ' ' Enlightening. ' ' Making intelligible. ' तस्य गण्डो जलावमग्नप्रमदोपगूढेः उद्भासको बभूव—' His face indicated evident signs of his having given a close embrace to a young woman immersed in water,—the bristling of hair on which instantly manifested itself and the lips whereon were throbbing from a suppressed laughter. '

St. 44. फुल्लं—Construe यदि इदमेव फुल्लं कमलं एवं नीलोत्पलयोर्विकाशः अत्र किं । इति भ्रान्तशङ्की हंसः सरस्तरन्त्याः सुदत्याः वदनं न सिषेवे. नीलोत्पलयोः—

Analyse नीले च ते उत्पले च नीलोत्पले तयोः, 'Blue water-lilies.' आत्तशङ्को—Analyse आत्ता गृहीता शङ्का यस्य सः, 'Having his doubt or suspicion taken away,' i. e. removed. यदि इदमेव फुल्लं कमलं एवं नीलोत्पलयोर्विकाशः अत्र किं—'If it is only a full-blown lotus, well, why should there be a display of a pair of blue-lilies here?' इति आत्तशङ्को हंसः सरस्तन्त्याः सुदत्याः वदनं न सिषेवे—'In this way the swan whose doubt was totally removed, did not go after the face of the lady with a beautiful set of teeth, swiming across the lake.'

St. 45. सुगन्धि°—Construe काचित् सुगन्धिनिश्वासगुणावकृष्टं मुखे पतन्तं करपल्लवेन दुर्वारं भ्रमरीसमूहं अन्तः सलिलप्रवेशात् तत्याज. *Cf.* Ku. III. 56. "सुगन्धिनिश्वासविवृद्धतृष्णं बिम्बाधरासन्नचरं द्विरेफम्। प्रतिक्षणं संभ्रमलोलदृष्टिर्लीलारविन्देन निवारयन्ती॥". सुगन्धि°—Analyse शोभनो गन्धो यस्य स सुगन्धिः। सुगन्धिश्चासौ निश्वासश्च सुगन्धिनिश्वासः तस्य गुणेन अवकृष्टः सुगन्धिनिश्वासगुणावकृष्टः कमलवत्सुरभिसमुच्छ्वासगुणावबद्धस्तं 'Drawn down by the excellence of her sweet smelling breath.' करपल्लवेन—Analyse करः पल्लव इव करपल्लवः तेन तादृशेन, 'By a sprout-like hand.' दुर्वारं, Expl:-वारयितुं दुष्करः दुर्वारः तं, 'Difficult to be kept off.' Difficult to be warded off.' अन्तःसलिलप्रवेशात्,—Analyse अन्तः सलिले प्रवेशः अन्तःसलिलप्रवेशः तस्मात्, 'By reason of her entering deep into water.' भ्रमरीसमूहं—Analyse भ्रमरीणां समूहः भ्रमरीसमूहः तं तादृशं, 'A multitude of female bees.' 'A collection of female bees.' काचिद् अन्तःसलिलप्रवेशाद् दुर्वारं भ्रमरीसमूहं तत्याज—'A certain girl went away from (*lit.* left) a hoard of female bees, difficult to be kept off by her sprout-like-hand, and flying towards (*lit.* falling on) her mouth (being) attracted by the excellence of her sweet-smelling breath, on account of her entering deep into water.'

St. 46. मत्स्येन—Construe चीनांशुकपृष्ठलक्ष्यकांचीमणिग्रासकुतूहलेन मत्स्येन उपनितंबं आघ्राय मुक्ता एका चिरं संत्राससुभ्रु चकम्पे. चीनांशुक°—Analyse चीनांशुकस्य पृष्ठे ये लक्ष्याः दृश्याः कांचीमणयः तेषां ग्रासे कुतूहलं यस्य स तेन तादृशेन, 'Having a (strong) desire of making a mouthful of (to devour) the jewels of her zone visible (or to be seen) on the surface of the silk-woven garment of China.' संत्राससुभ्रु *adv.*—Analyse संत्रासाद् भुग्ने भ्रुवौ यस्मिन्कर्मणि यथा स्यात् तथा, 'In a manner in which the eyebrows became contracted through fear.' उपनितम्बं *adv.*—Analyse नितम्बस्य समीपं उपनितम्बं, 'Near the hips or buttocks.' मत्स्येन उपनितम्बं आघ्राय मुक्ता एका चिरं संत्राससुभ्रु चकम्पे—'Another lady, got out of the way of a fish which had a desire to make a mouthful of the jewels of her zone, visible on the surface of the silk-woven garment of

China and which smelt near her hips, began to tremble for a long time with eyebrows contracted through excessive fear (or great alarm). '

St. 14. यत्न°—Construe अथ स यत्नगम्यं मैथिलीमुखं अनुभूय नहि तृप्तिमाययौ । आननेन परिघट्यबोधितं पद्मकुड्मलं राजहंसः इव. यत्नगम्यं—Analyse यत्नेन गम्यं यत्नगम्यं, 'Accessible with efforts.' मैथिलीमुखं—Analyse मैथिल्याः मुखं मैथिलीमुखं, 'The face of the daughter of the Mithila king.' राजहंसः—Analyse हंसानां राजा राजहंसः, 'A royal swan.' पद्मकुड्मलं—Analyse पद्मस्य कुड्मलं पद्मकुड्मलं, 'A lotus-bud.' यत्न°—'Then he having known (the pleasure of) the face of the daughter of the Mithila king, accessible with efforts, was not (completely) satisfied, like a royal swan enjoying a lotus-bud, made to bloom, after striking it with its bill.'

St. 15. प्रेम°—Construe स दयार्द्रहृदयः यत्प्रेमवेगदृढदंशपीडितं तत् तदीयमधरोष्ठपल्लवं शनैः पिबन् वेदनां क्षणेन विनिनाय. प्रेम°—Analyse दृढश्चासौ दंशश्च दृढदंशः । प्रेम्णः यो वेगः तेन दृढदंशेन पीडितं प्रेमवेगदृढदंशपीडितं, 'Injured (or wounded) by a bite sharp on account of the force of love.' अधरोष्ठ°—Analyse अधरश्चासौ ओष्ठश्च अधरोष्ठः स एव पल्लवः तं अधरोष्ठपल्लवं, 'Sprout-like lower lip.' दयार्द्र°—Analyse दयया आर्द्रं हृदयं यस्य स दयार्द्रहृदयः, 'Having a heart wet with pity.' 'Kind-hearted.' प्रेम°—'He, with his kind heart, drinking slowly that sprout-like lower lip of hers, which was injured by a bite, sharp on account of the force of love, removed the pain in a moment.'

St. 16. ग्राहितं—Construe नृपतिशक्रसूनुना विविधचाटुचेष्टितैः ग्राहितं स्वाधरं [सा] मानिनी पानवर्जितं अदन्तविक्षितं च भूयः एव मुजति स्म [विमृजति स्म]. नृपति°—Analyse नृपतीनां शक्रः नृपतिशक्रः नृपेन्द्रः तस्य सूनुः तेन तादृशेन, 'By the son of the best of kings.' स्वाधरं—Analyse स्वस्य अधरः स्वाधरः तं तादृशं, 'His own lower lip.' विविध°—Analyse विविधानि च चाटुचेष्टितानि च विविधचाटुचेष्टितानि तैः तादृशैः, 'With various agreeable words and gestures.' पानवर्जितं—Analyse पानेन वार्जितः पानवार्जितः तं तादृशं, 'Without drinking it up.' 'Without kissing.' अदन्तविक्षितं—Analyse दन्तैः विक्षितः दन्तविक्षितः। न दन्तविक्षितः अदन्तविक्षितः तं तादृशं, 'Without injuring it with her teeth.' ग्राहितं—'The proud lady left at once his lower lip, which she was forced to take in by the son of the best of kings, with various agreeable words and gestures, without a kiss on it and without a bite by her teeth.'

St. 17. स्वं—Construe रहसि अपवाहितांशुकं स्वं नितम्बं प्रिये पश्यति सति कामिनी प्रार्थनामपि विनैव स्वयं पल्लवस्निग्धरागं अधरं [तस्मै] ददौ. अपवाहित°—Analyse अपवाहितं अंशुकं यस्मात् स अपवाहितांशुकः तं तादृशं, 'The silk-woven garment from which has been removed.' पल्लव°—Analyse पल्लवः इव स्निग्धो रागः यस्मिन् स तं तादृशं, 'Having a colour glossy like the foliage.' स्वं—'When the loving husband was looking in secret at her hip, from which the silk-woven garment was removed, the loving damsel herself offered even without a request, her lip, with a colour glossy like the foliage.'

St. 18. सा—Construe मदेन मदनेन लज्जया साध्वसेन च विमिश्रचेष्टिता सा सपदि तादृशीं दशामाययौ। शक्यविभ्रमा या [दशा] वक्तुमपि न. विमिश्र°—Analyse विमिश्रं चेष्टितं यस्याः सा विमिश्रचेष्टिता, 'Displaying actions mixed (or mingled) together.' शक्यविभ्रमा—Analyse शक्याः विभ्रमाः यस्यां सा शक्यविभ्रमा, 'The gestures whereof were easily practised.' Translate:—'She, displaying her actions blended together by pride, love, coyness and fear, instantly reached that state in which she practised her gestures easily, and so it could not be described.'

St. 19. वर्जनाय—Construe भामिनी सुरतस्य वर्जनाय यत् पटुचाटुचेष्टितं वाञ्छति स्म तदेव स्वयं योषितः निधुवनस्य वृद्धये समजायत. पटु°—Analyse पटु च चाटु च चेष्टितं च एतेषां समाहारः पटुचाटुचेष्टितं, 'The clever and agreeable words and actions.' वर्जनाय—'The clever and agreeable words and actions which the damsel longed for in order to avoide the intercourse, themselves resulted in increasing the excitement of the lady.'

St. 20. अश्रुणा—Construe कामिनी भर्तरि आत्मनः सुरतखेदं अश्रुणा व्याजहार। पुलकेन संमदं च व्याजहार। भावनृत्यकुशला इव गिरा तु लज्जया न व्याजहार.

सुरतखेदं—Analyse सुरतस्य खेदः सुरतखेदः तं सुरतखेदं, 'Fatigue due to enjoyment.' भावनृत्यकुशला—Analyse भावे नृत्ये च कुशला भावनृत्यकुशला 'Skilled in emotional feelings and dance.' अश्रुणा—'The loving girl proclaimed her fatigue due to enjoyment by her tears and her joy by horripilation to her husband, but not by words, being overcome with modesty, like a woman skilled in emotional feelings and dance.'

St. 21. यत्—Construe रतिषु तरसा अभियोजितं यद्यद् योषितः खेदवृत्तये आस तत्तदेव पुनः कामिना मृदु साधित [सत्] तच्छ्रमं अपनयति स्म. खेदवृत्तये—Analyse खेदस्य वृत्तिः खेदवृत्तिः तस्यै खेदवृत्तये, 'For the feeling of depression.' तच्छ्रमं—Analyse तस्याः श्रमः तच्छ्रमः तं तादृशं, 'Her fatigue.' यत्—'Whatever, being done with force, brought on the feeling of depression regarding the enjoyment to the lady, removed her fatigue when again softly effected by the loving husband.'

St. 22. केश°—Construe अथ निधुवनेन विश्लथं केशपाशं बन्धुं उद्यता मैथिली प्रिये बाहुमूलगतलोचने [सति] लज्जया सस्मितं अवनमति स्म. केशपाशं—Analyse केशानां पाशः केशपाशः तं, 'The braid of hair.' बाहु°—Analyse बाह्वोर्मूलं बाहुमूलं तत्र गते लोचने यस्य स तस्मिन्, 'Having eyes directed to the pit of the arms.' सस्मितं—Analyse स्मितेन सह यथा स्यात्तथा, 'Smilingly.' Translate:—'Then the daughter of the king of Mithilá who strove to bind her braid of hair which had become loose by the enjoyment, bent her head smilingly through coyness, when her loved-companion directed his eyes towards the pit of the arms.'

St. 23. इति—Construe इति अनङ्गशिखिना हृदि हते [सति] क्ष्माधिपस्य दुहितुः निविष्टया लज्जया कतिपयेषु वासरेषु गलितेषु तानवं शिश्रिये. *Cf.* Ku. VIII. 13. " वासराणि कतिचित्कथञ्चन स्थाणुना पदमकारयत प्रिया । ज्ञातमन्मथरसा शनैः शनैः सा मुमोच रतिदुःखशीलताम् ॥" अनङ्ग°—Analyse अनङ्गस्य मदनस्य शिखी बाणः अनङ्गशिखी तेन, 'By the arrow of the bodiless one,' (i. e. मदन). क्ष्माधिपस्य—Analyse क्ष्मायाः अधिपः क्ष्माधिपः तस्य तादृशस्य, 'Of the lord of the earth.' तानवं शिश्रिये—means, तानवं तनुत्वम् । मन्दभावमिति यावत् । शिश्रिये, 'Attained diminution (i. e. became loose).' इति—'When her heart was thus hit by the arrow of the bodiless one (i. e. the god of love), the seated feeling of modesty of the daughter of the lord of the earth began to diminish after the passing of several days.'

St. 24. शर्वरीषु—Construe शर्वरीषु विरलीकृतत्रपा नृपात्मजा निद्रया हृता किल । नीविबन्धनमतीत्य संस्थितमस्य हस्तं बलाद् नापाहरत. *Cf.* Ku. VIII. 4. नाभिदेशनिहितः सकम्पया शङ्करस्य रुरुधे तया करः तदुकूलमथ चाभवत्स्वयं दूरमु-

न्छुसितनीविबन्धनम् ॥" शर्वरीषु, Expl:—श्टणाति चेष्टाः इति शर्वरी तासु, 'During the nights.' 'At night times.' Derived from शृ vt. 9. P. (सेट्). Cf. Unàdisûtra "कृशृगृवृञ्चतिभ्यः ष्वरच्." Also Pàṇi. IV. 1. 41. "षिद्गौरादिभ्यश्च," 'The affix ङीष् is employed in forming the feminine after words ending with affixes which have an indicatory ष् and after the words गौर and the rest.' Vide शब्दार्णव, "शर्वरी शार्वरी क्षर्या." विरलीकृतत्रपा—Analyse विरलीकृता त्रपा यस्याः सा विरलीकृतत्रपा, 'With her sense of modesty (or female bashfulness) diminished (or relaxed).' नृपात्मजा—Analyse नृपस्य आत्मजा नृपात्मजा 'The daughter of the king.' नीविबन्धनं—Analyse नीवेर्बन्धनं नीविबन्धनं, 'The knot of the garment.' शर्वरीषु—'The daughter of the king, with her sense of modesty relaxed, during the course of nights, was in truth overpowered by sleep and did not forcibly throw off his hand, resting after getting beyond the knot of the garment.'

St. 25. निद्रिता—Construe निद्रिता सा भयानकस्वप्नदर्शनकृतं प्रतिभयं प्रपद्य राघवं उरःस्थले कुचघटौ सन्निधाय दृढं परिषस्वजे. प्रतिभयं—Analyse प्रतिगतं भयेन प्रतिभयं, 'Exciting fear.' Cf. Pàṇi. II. 2. 18. and the Vàrtika thereto, "प्रादयो गताद्यर्थे प्रथमया," 'The word प्र &c., when the sense is that of 'gone' or the like, combine with what ends with the first case-affix.' Or it may be analysed as, प्रतिगतं भयमस्मिन् इति प्रतिभयं. Cf. Pàṇi. II. 2. 24. and the Vàrtika thereto. "प्रादिभ्यो धातुजस्योत्तरपदस्य लोपश्च वा बहुव्रीहिर्वक्तव्यः", 'The optional compounding of what arises from a verbal root coming after प्र &c. should be stated, and the elision of the subsequent term.' See Hema. "प्रतिभयं भये भीष्मे." भयानक°—Analyse स्वप्नस्य दर्शनं स्वप्नदर्शनम्। भयानकं यत् स्वप्नदर्शनं तेन कृतं, 'Brought on by the sight of a terrible dream.' कुचघटौ—Analyse कुचावेव घटौ कुचघटौ, 'Pitcher-like breasts.' उरःस्थले—Analyse उरसः स्थलं उरःस्थलं तस्मिन्, 'On the broad surface of the chest.' Translate :—'She, in her sleep, was overcome with exciting fear, brought on by the sight of a terrible dream and placing in close contact her pitcher-like breasts on the broad chest (of Ràghava), embraced him closely.'

St. 26. ज्ञात°—Construe मदातुरे कामिनि नीविबन्धनं क्षिपति [सति] ज्ञातमन्मथरसा सा भयेन अञ्जलिं कुर्वती किल अंशुकात् करयुग्मं जहार. Cf. Ku. VIII. 13. "ज्ञातमन्मथरसा शनैः शनैः।" ज्ञात°—Analyse ज्ञातो मन्मथस्य रसो यया सा ज्ञातमन्मथरसा, 'Who had known the taste of the god of love.' 'Who had learnt the flavour of the mind-churning god.' मदातुरे—Analyse मदेन आतुरः मदातुरः तस्मिन्,

'Agitated by passion.' नीविबन्धनं—Analyse नीवेर्बन्धनं नीविबन्धनं, 'The knot of the cloth.' करयुग्मं—Analyse करयोर्युग्मं करयुग्मं, 'A pair of the hands or arms.' ज्ञात°—'That lady, who (then) knew the taste of love, removed her hands from the silk-woven cloth, folding them as if (किल) with fear, when her loving husband, agitated by passion, began to undo the knot of the garment.'

St. 27. संमता—Construe मेधया भुवनस्य संमतापि निधुवनोपदेशिनि राघवे [सति] भूरिशः तदुपदेशवाञ्छया गुणितस्य विस्मृतिं व्याजहार. निधुवनोपदेशिनि—Analyse निधुवनं उपदिशतीति निधुवनोपदेशी तस्मिन् तादृशे, 'Giving instructions in the art of pleasure (or enjoyment).' गुणितस्य विस्मृतिं—'Forgetfulness of the multiplicity (of instructions).' 'Forgetfulness of the large number (of instructions).' तदुपदेश°—Analyse तस्य उपदेशः तदुपदेशः तस्मिन् वाञ्छा तया, 'With a desire of receiving instructions from him.' Translate:—'While Râghava was giving her instructions in the art of pleasure, she, who was acknowledged by the world to be possessed of intellect (or memory) said that she forgot the multiplicity of instructions, with a desire of receiving them frequently.'

St. 28. स्वेद°—Construe स्वेदबिन्दुनिचिताग्रनासिका धूतहस्तलतिका सशीत्कृतिः सोढमन्मथरसा नृपात्मजा राघवस्य तृप्तये न बभूव. स्वेद°—Analyse स्वेदानां बिन्दवः तैः निचिता अग्रनासिका यस्याः सा, 'Having the tip of her nose covered over with drops of perspiration.' धूत°—Analyse हस्तः एव लतिका हस्तलतिका । धूता हस्तलतिका यया सा, 'Having her creeper like hands trembling.' सशीत्कृतिः—Analyse शीत्कृत्या सह सशीत्कृतिः, 'Breathing pleasantly.' सोढ°—Analyse सोढो मन्मथस्य रसो यया सा, 'Who had patiently endured the flavor (or relish) of love.' नृपात्मजा—Analyse नृपस्य आत्मजा नृपात्मजा, 'The daughter of the king.' स्वेद°—'That daughter of the king, with the tip of her nose covered over with drops of perspiration, her creeper-like hand trembling, breathing pleasantly after having enjoyed the relish of love, did not suffice for the gratification of Râghava.'

St. 29. चोदयति—Construe युवतिकृत्यनैपुणं शिक्षितुं अवनिपालनन्दने चोदयति [सति] देहजन्मशरखण्डितत्रपा सा रहसि कर्मकर्तृतां ययौ. *Cf.* Ku. VIII. 17. "शिष्यतां निधुवनोपदेशिनः शङ्करस्य रहसि प्रपन्नया । शिक्षितं युवतिनैपुणं तया यत्तदेव गुरुदक्षिणीकृतम् ॥" अवनि°—Analyse अवनिं पालयतीति अवनिपालः तस्य नन्दनः तस्मिन्, 'The son of the protector of the earth.' युवति°—Analyse युवतेः कृत्यं युवतिकृत्यं तस्मिन् नैपुणं युवतिकृत्यनैपुणं, 'The skill (or proficiency) in woman's deeds.'

देह°—Analyse देहजन्मनो मन्मथस्य शरेण बाणेन खण्डिता निर्गता त्रपा लज्जा यस्याः सा, 'Having her modesty relaxed (or destroyed) by the arrows of the body-born one' (i. e. the god of love). कर्मकर्तृतां—Analyse कर्मणः कर्तृता कर्मकर्तृता तां, 'An object-agent' or 'object containing agent,' i. e. an agent which is at the same time the object of an action.' 'Agent of an action.' 'One who acts of his own accord.' Translate:—'While the son of the king was impelling her to learn the skill in (or art of) woman's deeds, she, with her modesty relaxed by the arrow of the body-born one (i. e. the god of love), assumed, in secret, the agency of action (in love affairs i. e. became the कर्ता of the affairs of love).' The poet means to say that सीता was till then the कर्म or an object of शिक्षितुं (i. e. a recipient of the art of woman's deeds). But now she became the agent or कर्ता who could impart instructions in युवतिकृत्यनैपुणं.

St. 30. यत्—Construe मदनेन पीडिता यद् जगाद तद् सहासरसं अभिधि प्रिये [सति] वलितदेहशोभिनी लज्जिता [सती] ततद् अस्फुटं सस्मितं उवाच सहासरसं—Analyse हासेन सह सहासः स एव रसो यस्मिन् तद् यथा स्यात्तथा 'With a relish for ridicule.' सस्मितं *adv.*—Analyse स्मितेन सह सस्मितं, 'Smilingly.' 'Laughingly.' वलित°—Analyse वलितो यो देहः तेन शोभते इति वलितदेहशोभिनी, 'Shining with her body turned (aside).' अस्फुटं—Analyse न स्फुटं अस्फुटं, 'Faintly.' यत्—'While her loving husband uttered with a relish for ridicule what she had said, when troubled with love, she, shining with her body turned, said it faintly, with a smiling face, being ashamed.'

St. 31. रत्न°—Construe संगतौ [तयोर्विलासकाले] भाषितं हृदि निधाय रत्नतल्पनिकटस्थिते शुके निःसहास्मि मां विमृज इति जल्पति [सति] व्रीडिता पञ्जरं परिजघान. रत्न°—Analyse रत्नानां तल्पः तस्य निकटे स्थितः तस्मिन्, 'Hung near the bed of jewels.' निःसहा—Analyse निर्गतं सहो यस्याः सा निःसहा, 'From whom power is departed.' 'Powerless.' Translate:—'Having stored her speech in its heart at the time of their intercourse, when the parrot, hung near the bed of jewels, was uttering the words 'I am powerless, please, leave me,' she, overcome with shame, struck the cage of the bird.'

St. 32. राम°—Construe रामवक्त्रगलितैः श्रमाम्बुभिः कुचयुगस्य कुंकुमं छिद्रितं निरीक्ष्य सखीजने हसिते [सति] सा संमुखात् सस्मितं व्यपजगाम. राम°—Analyse रामस्य वक्त्राद् गलितानि तैः तादृशैः 'Trickling down from the face of Ráma.' श्रमाम्बुभिः—Analyse श्रमस्य अम्बूनि श्रमाम्बूनि तैः, 'By the drops of fatigue.' कुचयुगं—Analyse कुचयोर्युगं तस्य, 'Of the pair

of breasts.' सखीजने—Analyse सख्यः एव जनः सखीजनः तस्मिन्, 'Female friends.' कुंकुमं, Expl:—कुंकुं इति शब्दोऽस्ति वाचकत्वेनास्य, 'Saffron,' 'saffron powder.' *Cf.* Pāṇi. V. 2. 127. "अर्शआदिभ्योऽच्," 'The affix अच् (अ) comes in the sense of मतुप् after words अर्श &c.' Or it is derived from कुक् *vt.* 1. A. (सेट्) 'To take,' 'to receive.' कुक्यते इति कुंकुमम्. *Cf.* Pāṇi. VII. 1. 80. "आच्छीनद्योर्नुम्." 'When the affix शतृ comes after a verbal stem ending in अ or आ, it may optionally take the augment नुम् before the neutral case-ending शी and before the feminine affix ई. (कुक् + उमच् + नुम् = कुंकुमम्). इत्यत्र "नुम्" इति योगविभागान्नुम्. Translate:—'When her (female) friends saw the saffron paste on her breasts, wiped off by the drops of fatigue, trickling down from Rāma's face, and laughed, she moved away from their presence with a smile.'

St. 33. स्वानु°—Construe अथ ईर्ष्यया इव चोदितोद्यतः मनोभवः मैथिलस्य दुहितुश्चेतसः स्वानुवृत्तिविधिवन्ध्यं लज्जितं निरवशेषं आक्षिपत्. स्वानु°—Analyse स्वस्य अनुवृत्तिः स्वानुवृत्तिः तस्याः विधौ वन्ध्यं स्वानुवृत्तिविधिवन्ध्यं, 'Unproductive of actions in conformity with his self.' चोदितोद्यतः—Analyse आदौ चोदितः पश्चाद् उद्यतः चोदितोद्यतः, 'Active on being incited.' मनोभवः—Analyse मनसि भवः जन्म यस्य स मनोभवः, 'The mind-born one.' 'The fancy-born one.' निरवशेषं—Analyse निर्गतः अवशेषो यस्मात् तद् यथा स्यात्तथा, 'In a manner not keeping any residue (i. e. wholly, entirely).' स्वानु°—'Active on being incited as if by envy, the god of love, wholly drove out of the mind of the daughter of the मैथिल king the sense of shame, which was unproductive of actions in conformity with his self.'

St. 34. दीर्घिका°—Construe क्वचित् प्रमदकानने दीर्घिकाजलतरंगनिर्धुतत्यक्तपुष्पमयमण्डनौ तौ इतरेतराश्रयाः मृजाः चाटुरम्यं तेनतुः. दीर्घिका°—Analyse दीर्घिकायाः जलतरङ्गेषु निर्धुतं अत एव त्यक्तं पुष्पमयं मण्डनं याभ्यां तौ तादृशौ, 'Who had abandoned their decorations of flowers which were washed off by the waves in the water of the oblong pond.' चाटुरम्यं—Analyse चाटुना रम्यं यथा स्यात्तथा, 'In a manner pleasing on account of agreeable words.' इतरेतराश्रयाः—Analyse इतरेतरं आश्रयन्ते इति इतरेतराश्रयाः, 'In which they hung for support on each other.' प्रमदकानने—Analyse प्रमदं च तत् काननं च प्रमदकाननं तस्मिन्, 'In a pleasure-garden.' मृजा *f.*—'A bath,' *Accu. plu.*, and an object to तेनतुः. Translate:—'Sometimes in the pleasure garden, they two abandoned their decorations of flowers which were washed off by the waves in the water of the artificial pond and enjoyed, in a man-

ner pleasing on account of agreeable words, baths, in which they hung for support on each other.'

St. 35. चाटु°—Construe चाटुमात्रकरणप्रयोजनः स तुल्यरागमपि यावकं योषितः तरुणपल्लवप्रभे चरणपङ्कजद्वये न्यपातयत्. चाटु°—Analyse चाटु एव चाटुमात्रं तस्य करणमेव प्रयोजनं यस्य सः, 'Whose sole aim was to do coaxing things.' तुल्यरागं—Analyse तुल्यो रागो यस्य स तं तादृशं, 'Of a similar colour.' चरण°—Analyse चरणमेव पङ्कजं चरणपङ्कजं तस्य द्वयं तस्मिन् तादृशे, 'On a pair of lotus-like feet.' तरुण°–Analyse तरुणश्चासौ पल्लवश्च तरुणपल्लवः तस्य प्रभेव प्रभा यस्य स तस्मिन् तादृशे, 'Having a lustre like that of the fresh sprout.' चाटु°—'He, whose sole aim was to do coaxing things, placed the red dye, though of a similar colour, on the pair of the lady's lotus-like feet, which had the lustre of fresh (or young) sprouts.'

St. 36. अंघ्रि°—Construe तरुणार्करोचिषा कुंकुमेन स्वयं अंघ्रियुग्मं अनुलिम्पतः अस्य तत् परिरूढवेपथु करयुग्मं दूरमेवारुरोह. अंघ्रि°—Analyse अंघ्र्योः युग्मं अंघ्रियुग्मं, 'A pair of toes.' तरुण°—Analyse तरुणश्चासौ अर्कश्च तरुणार्कः तस्य रोचिरेव रोचिर्यस्य तत् तेन तादृशेन, 'Having brilliancy of the new sun.' करयुग्मं—Analyse करयोर्युग्मं करयुग्मं, 'A pair of arms.' परिरूढ°—Analyse परिरूढो वेपथुर्यस्य तत् परिरूढवेपथु, 'With its tremor much increased.' तद्दूरमेवारुरोह—'Began to ascend very high,' i. e. owing to the tremor of his arms he could not paint the dye on her proper limb but far away from it. Translate:—'That pair of his arms, who was himself painting her toes with saffron paste, having the brilliance of the new sun, began to ascend very high, with its tremor much increased.'

St. 37. मेखलां—Construe अत्र [नितम्बे] परं किंचिद् अनुपाश्रितो मणिमेखलागुणो दुर्नहो तु इति मेखलां अधिनितम्बं अर्पयन् स करं तत्र तत्र पुनरादधौ. अधिनितम्बं—Analyse नितम्बे इति अधिनितम्बं, 'Above the hips.' अनुपाश्रितः—Analyse न उपाश्रितः अनुपाश्रितः, 'Not depending on something for support.' 'Holding nothing for support.' दुर्नहः—Analyse नद्धुं दुष्करः दुर्नहः 'Hard to fasten.' 'Difficult to bind up.' मणि°—Analyse मणीनां मेखला मणिमेखला तस्याः गुणः मणिमेखलागुणः, 'The string of the girdle of jewels.' 'The string of the jewelled-zone.' Translate:—'The string of the girdle of jewels, unsupported by some other thing is here indeed hard to fasten. With this thought, he, putting the zone above her hips, placed his hands there again and again.'

St. 38. आचरन्—Construe अथ पुलकितेन पाणिना विलेपनक्रियां आचरन् स चन्दने सममपि स्थिते सति पुनः पुनः कुचयुगं सस्पृहं अस्पृशत्. विलेपन°—

Analyse विलेपनस्य क्रिया तां, 'The work of amorous painting.' सस्पृहं *adv.*—Analyse स्पृहया सह सस्पृहं, 'Wistfully.' 'With a passionate longing.' कुचयुगं—Analyse कुचयोर्युगं कुचयुगं, 'A pair of breasts.' आचरन्—'He, performing the work of amorous painting with his hand, thrilled with joy, longingly touched the pair of her breasts again and again though the sandle paste was in its proper position.'

St. 39. पत्रं—Construe आनमिततर्जनीशिरःस्पृष्टकर्णलतिकः अयं पत्रमर्पयन् पूर्वं अर्धमुकुलीकृतेक्षणं सुरभिगर्भं तन्मुखं अन्वभूत्. पत्रं=पत्रावली, Drawing lines or figures on the face or person with coloured and fragrant pigments (or sometimes with musk and fragrant substances). आनमित°—Analyse आनमिता या तर्जनी तस्याः शिरसा स्पृष्टा कर्णयोर्लतिका येन सः, 'Who has touched her creeper-like ears with the point of his fore-fingers slightly bent.' अर्ध°—Analyse अर्धं मुकुलीकृते ईक्षणे यस्य तत् 'The eyes on which were half closed.' तन्मुखं—Analyse तस्याः मुखं तन्मुखं, 'Her face.' सुरभि°—Analyse सुरभिगर्भे यस्य तत् सुरभिगर्भं, 'Having fragrance in its interior.' 'Possessing fragrance in its interior.' Translate:—'He, drawing figures (on her face), touched her creeper-like ears with the point of his fore-finger slightly bent and had an experience of her face which had fragrance in its interior and the eyes on which were previously half-closed.'

St. 40. आत्मना—Construe तदा अधरपानलोलुपः पुनः पुनः [तमेव] निष्पिबन् मुदितः स पुरा युवतिदन्तवाससि आत्मनेव कृतं यावकं उज्जहार. युवति°—Analyse युवतेर्दन्तवासः युवतिदन्तवासः तस्मिन् तादृशे, 'On the lips of the young lady.' अधर°—Analyse अधरस्य पाने लोलुपः अधरपानलोलुपः 'Eager to drink (kiss) her lower lip.' आत्मना—'He then, eager to kiss her lower lip, drank (it) with delight again and again and removed the dye which he himself had formerly painted on (*lit.* applied to) the lips of the young lady.'

St. 41. चुम्बति—Construe स्वयमुपाहिताञ्जनं योषितो विलोचनं प्रियतमे चुम्बति [सति] अविकाशचक्षुषो [जानक्याः] कर्णगं अशोकपल्लवं निजं रागं प्राप. उपाहित°—Analyse उपाहितं अञ्जनं यस्य तद् उपाहिताञ्जनं, 'To which the collyrium was applied.' अविकाश°—Analyse न विकाशो ययोस्ते अविकाशे । तादृशे चक्षुषी यस्याः सा तस्याः अविकाशचक्षुषः, 'Having eyes which had not an open (or splendid) appearance.' 'Had eyes which were partially opened.' कर्णगं—Analyse कर्णं गच्छतीति कर्णगं, 'Placed on the ear.' अशोकपल्लवं—Analyse अशोकस्य पल्लवं अशोकपल्लवं, 'The sprout

of an As'oka tree.'. चुम्बति—' While the husband kissed the eye of the lady, to which he himself had applied the collyrium, the sprout of As'oka placed on her ear, whose eyes had not an open (or splendid) appearance, assumed its own (attractive) colour.'

St. 42. पुष्प°—Construe पुष्परत्नविभवैः राजनन्दने यथेप्सितं विभूषयति [सति] सा दर्पणं चकांक्ष ननु । योषितां मण्डनं स्वामिसंमदफलं हि. *Cf.* Ku. VII. 22. "आत्मानमालोक्य च शोभमानमादर्शबिम्बे स्तिमितायताक्षी । हरोपयाने त्वरिता बभूव स्त्रीणां प्रियालोकफलो हि वेषः" ॥ पुष्प°—Analyse पुष्पाणि च रत्नानि च पुष्परत्नानि तेषां विभवाः तैः तादृशैः, 'With the excellence of flowers and jewels.' यथेप्सितं *adv.*—Analyse ईप्सितं अनतिक्रम्य यथेप्सितं, 'According to one's liking.' 'To his liking.' राजनन्दने—Analyse राज्ञः नन्दनः राजनन्दनः तस्मिन् तादृशे, 'A son of a king.' 'A prince.' स्वामि°—Analyse स्वामिनां संमदः स्वामिसंमदः स एव फलं यस्य तत् स्वामिसंमदफलं, 'Having its reward in the pleasure of their lords.' पुष्परत्नविभवैः—' Did she not wish for a mirror while the prince was decorating her to his liking with the excellence of flowers and jewels ? (No), for the decorations of women have their reward in the pleasure of their lords.'

St. 43. ताम्—Construe अनङ्गकृतचारुविभ्रमां तां निर्दयं समुपगुह्य समकालं चुम्बितुं वीक्षितुं च अप्रभुः राघवो मुहुर्व्याकुलः इव आस. अनङ्ग°—Analyse अनङ्गेन कृताः चारुविभ्रमाः यया सा तां तादर्शी, ' Who has made pretty gestures on account of love.' ' Who was making pretty (amorous) gestures sprung from love.' विभ्रम *m.*—Amorous gestures of any kind, particularly one thus defined:—" चित्तवृत्त्यनवस्थानं शृङ्गाराद्विभ्रमो मतः." निर्दयं—Analyse दयायाः अभावो निर्दयं, ' Pitilessly.' 'Passionately.' ' Violently.' समकालं—Analyse समः कालः यस्य तद् यथा स्यात्तथा, 'Simultaneousty.' अप्रभुः—Analyse न प्रभुः अप्रभुः, 'Wanting power.' ' Unable.' ताम्—' Having passionately embraced her, who was making pretty gestures on account of love, Rághava, unable to kiss and look at her simultaneously was, as it were, often confused.'

St. 44. प्रार्थिता—Construe सा प्रार्थितापि कानिचिन्न चकार । स्वयमपि कानिचिद् व्यधत्त । अबला हृदयरत्नविक्रयक्रीतं एनं यथेप्सितं अन्वभूत्. हृदय°—Analyse हृदयमेव रत्नं हृदयरत्नं तस्य विक्रयेण क्रीतः तं तादृशं, ' Bought by the sale of the jewels of her heart.' यथेप्सितं—Analyse ईप्सितमनतिक्रम्य यथेप्सितं, ' According to her desire.' प्रार्थिता—' Certain things she did not do though requested and others she did herself. The lady had an enjoyment of him, who was bought by the sale of the jewel of her heart, according to her desire.'

St. 45. येन—Construe असौ तां येन येन हरति स्म तत्तदेव [तस्याः] योषितः पुनराप हि [यस्मात् कारणात्] सज्जनेषु विहितं यच्छुभं सद्यः एव फलबन्धि जायते. सज्जनेषु—Analyse सन्तश्च ते जनाश्च सज्जनाः तेषु तादृशेषु, ‘ To the virtuous.’ फलबन्धि—Analyse फलानि बध्नातीति फलबन्धि. ‘ Developing (or forming) fruit. ’ येन—‘ He got from the lady those very things by whichever of them he attracted her; for, the good that is done to the virtuous develops fruit at once. ’

St. 46. कर्मणि—Construe स्वमुखपद्मविच्युतस्वेदबिन्दुहतकान्तवक्षसि कर्मणि [क्रीडाकर्मणि] उपकाञ्चि संचरत् तस्य चक्षुः वीक्ष्य सा तनुं [तस्य] वक्षसि मुमोच स्वमुख°—Analyse स्वस्य मुखं स्वमुखं । तदेव पद्मं तस्माद् विच्युताः ये स्वेदबिन्दव तैः हतं कान्तस्य वक्षो यस्मिन् तत् तस्मिन् तादृशे, ‘ In which she struck her husband's breast with drops of sweat falling down from her lotus-like face. ’ उपकाञ्चि *adv.*—Analyse काञ्च्याः समीपं उपकाञ्चि, ‘ Near the girdle (or zone). ’ कर्मणि—‘ When she observed his eyes moving about the region of the girdle in the act in which she struck her husband's breast with drops of sweat falling down from her lotus-like face, she threw her body on his breast.’

St. 47. भर्तरि—Construe अधरदंशनिग्रहैः जल्पयति भर्तरि [सति] प्रणयमौनमास्थिता [सा] तादृशं निग्रहं चिरमवाप्तुमिच्छया वचनानि नो चकार. प्रणयमौनं—Analyse प्रणयाद् मौनं प्रणयमौनं. ‘ Silence through affection. ’ अधर°—Analyse अधरस्य दंशः तेन निग्रहाः तैः, ‘ By the chastisement of biting her lower lip.’ भर्तरि—‘ While her husband was making her talk by the chastisement of biting her lower lip, she, preserving silence through affection (or silent through affection) uttered no words, with a desire to get that kind of punishment for a long time. ’

St, 48. बालया—Construe हृदि बालया स्तनौ निधाय प्रसादने दन्तं आस्यकमलं [च] प्राप्तुमिच्छुः [स] विनापि दोषतो मुहुर्मुहुः रोषमाविरकरोत्. आस्यकमलं—Analyse आस्यं कमलमिव आस्यकमलं, ‘The lotus-like face.’ बालया—‘ He, desirous of getting, during propitiation, her teeth and lotus-like face after the placing of the breasts on his chest by her, frequently showed his anger even without any fault of hers. ’

St. 49. अल्पदोष°—Construe जम्पती अल्पदोषविषयेऽपि प्रणयकोपवक्रतां जग्मतुः । अतिवृद्धिमागता स्नेहजातिः सुलभरोषसत्रणा जायते. अल्पदोष°—Analyse अल्पश्चासौ दोषश्च अल्पदोषः तस्य विषयः तस्मिन्, ‘ As regards small faults.’ प्रणय°—Analyse प्रणयस्य कोपः प्रणयकोपः तेन वक्रता तां तादृशीं, ‘To peevishness (or fretfulness) consequent on a lover's feigned anger. ’ स्नेहजातिः—Analyse स्नेहस्य जातिः स्नेहजातिः, ‘ Genuine love. ’ ‘ Genuine affection. ’ अतिवृद्धि—Analyse अतिशयिता वृद्धिः अतिवृद्धिः तां, ‘ Extraor-

dinary growth (or increase). ' सुलभ°—Analyse सुलभो यो रोषस्तेन सव्रणा सुलभरोषसव्रणा, ' Bearing the sore of easy wrath.' 'Bearing the sore of wrath easily provoked.' अल्पदोष°—'The couple became cross through lover's feigned anger even as regards small faults.' ' Love, developed very much, has the sore of easy wrath.'

St. 50. अश्रुषु—Construe प्रणयकोपवह्निना लोहितत्वमुपनीय अश्रुषु पायितः [अस्मिन्] निपातितः तत्कटाक्षविशिखः अस्य सुस्थिरं धैर्यं निचकर्त. प्रणय°—Analyse प्रणयस्य कोपः प्रणयकोपः स एव वह्निस्तेन, ' By the fire of her anger through excess of affection. ' तत्कटाक्ष°—Analyse तस्याः कटाक्षः एव विशिखो बाणः तत्कटाक्षविशिखः, ' The dart of her glance. ' अश्रुषु—' The dart of her glance reddened (*lit.* brought to redness) by the fire of her anger through excess of affecticn, watered in her tears and discharged at him, hewed down his very sιeady courage. '

St. 51. कोपिता—Construe चिरनिवृत्तसङ्गतिः [अत एव] कोपिता सुप्तं एनं एत्य परिबोधशङ्किनी सा हस्तरुद्धचलकुण्डला शनकैः धृतश्वासवृत्ति चुचुम्ब. चिर°—Analyse चिरं निवृत्ता सङ्गतिर्यस्याः सा, ' Being removed from his company for long. ' परिबोध°—Analyse परिबोधं शङ्कते इति परिबोधशङ्किनी. ' Apprehensive of his waking. ' हस्त°—Analyse चलानि च तानि कुण्डलानि च चलकुण्डलानि । हस्ताभ्यां रुद्धानि चलकुण्डलानि यया सा, ' Who held by her hands the moving or dangling ear-rings.' *Cf.* R XI. 15. " ताडका चलकपालकुण्डला. " And Buddha-Charita V. 41. " चलकुण्डलचुम्बिताननाभिः. " धृत°—Analyse धृता श्वासस्य वृत्तिर्यस्मिन् कर्मणि यथा स्यात्तथा, ' In a manner in which she held her breath. ' कोपिता—' Provoked to anger when removed for long, she approached him, who was asleep and apprehensive of his waking, she held back her dangling ear-rings with her hands and kissed him slowly after holding hər breath. '

St. 52. कैतवेन—Construe कलहेषु कैतवेन सुप्तया [तया] वसनं क्षिपन् आत्तसाध्वसः स ' चोर ' इति उदितहासविभ्रमं सप्रगल्भं अधरे अवखण्डितः. *Cf.* Ku. VIII. 3. " कैतवेन शयिते कुतूहलात्पार्वती प्रतिमुखं निपातितम् । चक्षुरुन्मिषति सस्मितं प्रिये विद्युदाहतमिव न्यमीलयत् " ॥ आत्तसाध्वसः—Analyse आत्तं साध्वसं येन स आत्तसाध्वसः, ' Full of fear. ' ' Having his fear vanished.' उदित°—Analyse उदितः हासः एव विभ्रमो यस्मिन् यथा स्यात्तथा, 'In a manner in which the laughing was excited sportively. ' सप्रगल्भं—Analyse प्रगल्भेन सह सप्रगल्भं, ' Boldly. ' कैतवेन—' In their love quarrels she pretended sleep and when he, full of fear, was taking off her garment, she sportively (*lit.* in a sportive laughter) calling him a thief boldly bit his (nether) lip.'

St. 53. सङ्गतानि—Construe सङ्गतानि परिहृत्य चारिणौ मानमेत्य कुहचिद् अन्ययातनयनौ तौ परस्परं उरसा निहत्य कलहं वितेनतुः किल. अन्य°—Analyse अन्ययोर्याते नयने ययोस्तौ, 'With their eyes meeting each other.' कुहचित् *ind.*—'Somewhere.' 'Anywhere.' 'To any place.' संगतानि—'They lived shunning each other's company and becoming proud they sought (love) quarrels.' 'Somewhere when their eyes met they, indeed, struck each other with their breasts.'

St. 54. एकदा—Construe एकदा अरिकदनः अर्धशशिमौलिसन्निभः स कान्तया सार्धं इद्धरुचि परिसंहृतातपं अम्बरं द्रष्टुं सौधमारुरोह. अरिकदनः—Analyse अरीणां कदनः अरिकदनः, 'The destroyer of foes (or enemies).' इद्धरुचि—Analyse इद्धा रुचिर्यस्य तद् इद्धरुचि, 'Having a clear brightness.' 'Possessing clear lustre.' परिसंहृतातपं—Analyse परिसंहृतः आतपो यस्मात् तत् परिसंहृतातपं, 'Free from heat.' 'That from which heat has been removed.' अर्ध°—Analyse अर्धश्चासौ शशिश्च अर्धशशिः स एव मौलौ यस्य स अर्धशशिमौलिः तेन सन्निभः अर्धशशिमौलिसन्निभः, 'Resembling S'iva having the half moon on his crest.' एकदा—'Once, the destroyer of his foes, who resembled S'iva having the half moon on his crest, ascended the mansion with his loved-companion inorder to behold the sky, possessing clear lustre and free from heat.'

St. 55. वासरस्य—Construe राघवो वासरस्य विगमे समीरणैर्मन्दनर्तितसुगन्धिकुन्तलां सौधपृष्ठं अधितस्थुषीं जानकीं इदं वचो उवाच. मन्द°—Analyse मन्दं नर्तिताः सुगन्धयः कुन्तलाः यस्याः सा मन्दनर्तितसुगन्धिकुन्तला तां तादृशीं, 'Whose fragrant locks were made to dance (or flow) gently.' सौधपृष्ठं—Analyse सौधस्य पृष्ठं सौधपृष्ठं, 'On the terrace of the palace.' सौधः, Expl:– सुधा लेपोऽस्यातीति सौधः, 'A mansion.' 'A palace.' *Cf.* Pāṇi. V. 2. 103 and the Vàrtika thereto, "अण्प्रकरणे ज्योत्स्नादिभ्य उपसंख्यानम्," 'The words ज्योत्स्ना &c, are governed by this rule and take अण्.' समीरणैः, Expl:–सम्यग् ईरते गच्छन्ति। ईरयन्ति प्रेरयन्ति वा। इति समीरणाः तैः तादृशैः, 'By the breezes.' 'By the winds.' वासरस्य—'At the close (or end) of the day, Rághava addressed as follows Janakî, who was seated on the terrace of the palace and whose fragrant locks were made to dance (or flow) gently by the winds.'

St. 56. सन्निगृह्य—Construe करसन्ततिं सन्निगृह्य अस्तमस्तकमधिश्रितः एष रागवान् रविः क्वचित् प्रस्थितोऽपि समुत्सुकः सन् भुवनं क्षणं पश्यतीव. करसन्ततिं Analyse कराणां सन्ततिः तां, 'The collection of rays.' अस्तमस्तकं—Analyse अस्तस्य मस्तकं अस्तमस्तकं तत्, 'On the top of the setting mountain.' सन्निगृह्य—'Though tnis red sun collecting all his rays, has set out

somewhere; yet resting on the peak of the setting mountain, he is, as it were, looking eagerly at the world for a moment.'

St. 57. दिङ्मुखात्—Construe दिङ्मुखाद् अपसरन्तं नष्टतेजसं आतपं मुहुः अनुव्रजत्तमः भानुना रश्मिभिः समवबध्य कृष्यमाणमिव लक्ष्यते. दिङ्मुखात्—Analyse दिशां मुखं दिङ्मुखं तस्मात् तादृशात्, 'From the face of the quarters.' नष्टतेजसं—Analyse नष्टं तेजो यस्य स नष्टतेजाः तं नष्टतेजसं, 'Which has lost its lustre.' मुहुः *ind.*—'Suddenly.' 'All at once.' दिङ्मुखात्—'The darkness, suddenly following the sun-shine, which has lost its lustre and is moving away from the face of the quarters, is observed as if being dragged by the sun having bound it firmly together with his rays.'

St. 58. अन्तराणि—Construe स्रष्टरि तमसोऽन्तराणि प्रयच्छति [सति] युगक्षये जगतीव जलधिमध्यवर्तिनी रुचिः भूयः एव रविमण्डले लीयते. युगक्षये—Analyse युगस्य क्षयः युगक्षयः तस्मिन् युगक्षये, 'At the time of the destruction of the world.' रविमण्डले—Analyse रवेर्मण्डलं रविमण्डलं तस्मिन् रविमण्डले, 'In the disc of the sun.' जलधिमध्यवर्तिनी—Analyse जलं धीयतेऽत्र जलधिः तस्य जलधेर्मध्यं जलधिमध्यं तस्मिन् वर्तते इति जलधिमध्यवर्तिनी, 'Lying in the middle (or centre) of the ocean.' अन्तराणि—'As the earth, coming to the centre of the ocean at the time of the destruction of the world, when the Creator makes room for (or gives space or scope to) darkness, sinks down (in it), so the brightness of the sun lying in the middle of the ocean once more (भूय एव) sinks in the solar disc.'

St. 59. ध्वान्त°—Construe ध्वान्तजालं सागरे निहितमण्डलं रविं वारिभिः पिहितदण्डं फुल्लमम्बुजं आयतं भृंगचक्रमिव सर्वतः उपयाति. ध्वान्तजालं—Analyse ध्वान्तस्य जालं ध्वान्तजालं, 'A net of darkness.' *Cf.* Pāṇi. VII. 2. 18. "क्षुब्धस्वान्तध्वान्तलग्नम्लिष्टविरिब्धफाण्टबाढानि मन्थमनस्तमःसक्ताविस्पष्टस्वरानायासभृशेषु," 'The following words are made without इट् augment in the senses given against them:—1 क्षुब्धः 'a churning stick,' 2 स्वान्तः 'the mind,' 3 ध्वान्तः 'darkness,' 4 लग्नः 'attached,' 5 म्लिष्टः 'indistinct or unintelligible,' 6 विरिब्धः 'a note or tune,' 7 फाण्टः 'made without an effort or by an easy process,' and 8 बाढः excessive.' निहितमण्डलं—Analyse निहितं मण्डलं येन स निहितमण्डलः तं तादृशं, 'Who has his disc placed (or put) in.' पिहितदण्डं—Analyse पिहितः दण्डः यस्य तत् पिहितदण्डं, 'Having its stalk concealed (or hidden).' भृङ्गचक्रं—Analyse भृङ्गाणां चक्रं भृङ्गचक्रं, 'A circle of bees.' अम्बुजं—Analyse अम्बुनि जातं अम्बुजं, 'Produced in water' (i. e. a lotus). ध्वान्त°—'The net of darkness everywhere sur-

rounds the sun who has his disc placed in the ocean, as a long circle of bees surrounds a full-blown lotus whose stalk is concealed by the waters.'

St 60. एक°—Construe अविकले निशाकरे उत्पतति [सति] नभःस्यन्दनस्य धातुपङ्कपरिदिग्धमण्डलं एकचक्रमिव अस्तगं रविबिम्बं राजते. एकचक्रं—Analyse एकं च तच्चक्रं च एकचक्रं, 'A single wheel.' नभःस्यन्दनस्य—Analyse नभः एव स्यन्दनः नभःस्यन्दनः तस्य तादृशस्य, 'Of the sky-chariot.' रविबिम्बं—Analyse रवेर्बिम्बं रविबिम्बं, 'The disc of the sun.' अस्तगं Analyse अस्तं गच्छतीति अस्तग, 'Resting on the setting mountain.' अविकले—Analyse न विकलः अविकलः तस्मिन् तादृशे, 'Entire.' 'Perfect.' 'Full.' निशाकरे—Analyse निशां करोतीति निशाकरः तस्मिन् तादृशे, 'The night-maker.' 'The moon.' As opposed to दिवाकर. धातु°—Analyse धातूनां गैरिकादीनां पंकः कर्दमः तेन परिदिग्धं क्लिन्नं मण्डलं यस्य तत् तादृशं, 'Having its ring smeared with the mud of metallic substances.' 'Having its ring covered over with mineral dust.' एक°-'The disc of the sun, resting on the setting mountain, appears, while the full moon is rising up, like a single wheel of the sky-chariot having its ring covered over with mineral dust.'

St. 61. संहृत°—Construe संहृतात्मकिरणं मण्डलं क्रमाद् यथा यथा वृद्धिमुद्वहति तथा तथा रविः गौरवादिव सागराम्भसि शनैर्निमज्जति. संहृत°—Analyse संहृताः आत्मकिरणाः येन तत् सहृतात्मकिरणं, 'Having its rays withdrawn.' सागराम्भसि—Analyse सागरस्य अम्भः सागराम्भः तस्मिन् सागराम्भसि, 'In the oceanic waters.' 'In the water of the ocean.' वृद्धिमुद्वहति—'Attains growth.' गौरवादिव—'As if from heaviness.' संहृत°—'As the disc of the sun which has compressed (all) its rays gradually increases in bulk, it slowly sinks down in the water of the ocean as if on account of its heaviness.' The poet means to say that the orb of the sun when it covers the world with its rays of light becomes light in weight; but when it compresses together all its rays, it becomes heavy and thus sinks down in the water of the ocean.

St. 62. उन्मुखाः—Construe सागरान्तरितमण्डलश्रियः दिनकरस्य उन्मुखाः रश्मयः तोयमभिभूय निर्गताः वाडवस्य शिखिनः शिखाः इव भान्ति. *Cf.* सुभाषितावलिः verse 1759 "पयोनिधेर्वाडववह्निमिश्रं यत्पीतमम्भो बहु घस्मरेण." Also शार्ङ्गधर verses 105, 109, 284. उन्मुखाः—Analyse उद्गतानि मुखानि येषां ते उन्मुखाः, 'With their points upturned (or turned up).' दिनकरस्य—Analyse दिनं करोतीति दिनकरः तस्य तादृशस्य, 'Of the maker of the day' (i. e. of the sun). सागरान्त°—Analyse सागरेण अन्तरिता मण्डलस्य श्रीर्यस्य

सागरान्तरितमण्डलश्रीः तस्य तादृशस्य, 'The beauty of whose disc is concealed by the ocean.' वाडवः, Expl—वडवायां जातः वाडवः or वाडोऽस्यास्तीति वाडवः or वाडं वातीति वाडवः. 'The submarine fire.' शिखिन् *m.*—'A fire.' उन्मुखाः—'The upturned rays of the sun, the beauty of whose disc is concealed by the ocean, appear like the flames of the submarine fire come out after over-powering the water (of the ocean)'.

St. 63. सन्ध्यया—Construe वासरस्य विगमे घनं तमः अग्रतश्च सन्ध्यया परिरुद्धं प्रावृषि एकतः सिन्धुजलभिन्नं पयोनिधेः सलिलमिव भाति. प्रावृषि—'In the rainy-season.' Derived form प्रवृष् *vi.* or *vt.* 1. P. (सेट्) 'To rain.' 'To sprinkle.' 'To pour down.' *Cf.* Páṇi. "नहिवृतिवृषिव्यधिरुचिसहितनिषु क्वौ," 'A long vowel is substituted for the final vowel of the preceding word, before the verbs नह्, वृत्, वृष्, व्यध्, रुच्, सह्, and तन्, when these roots take the affix क्वि.' सिन्धु°—Analyse सिन्धोर्जलेन भिन्नं सिन्धुजलभिन्नं, 'Divided by the water of the rivers.' Explain, स्यन्दन्ते आपोऽत्र सिन्धुः। *Cf.* Uṇádisûtra, "स्यन्देः संप्रसारणं धश्च इति उः." पयोनिधेः—Analyse पयसां निधिः। अथ वा। पयांसि निधीयन्तेऽत्र पयोनिधिः तस्य पयोनिधेः, 'Of the ocean.' *Cf.* Páṇi. III. 3. 93. "कर्मण्यधिकरणे च," 'The affix कि comes after a घु verb, when a word in the accusative case is in composition with it, and when the relation of the word so formed to its verb, is that of location.' सन्ध्यया—'And the thick (mass of) darkness, kept back in the front by the twilight, at the close of the day, appears like the water of the ocean, divided by the waters of the rivers on one side, during the monsoons.'

St. 64. सन्ध्यया—Construe पश्य तमसि क्रमात् सर्पति [सति] सन्ध्यया अरुणितपत्रसञ्चयं श्लक्ष्णपल्लवनिरन्तरं तद् वनं परिणामसम्पदं विन्दतीव. अरुणित°—Analyse अरुणिताः पत्राणां सञ्चयाः यस्मिन् तद् अरुणितपत्रसञ्चयं, 'The multitudes of leaves in which were reddened.' श्लक्ष्ण°—Analyse श्लक्ष्णाश्च ते पल्लवाश्च तैः निर्गतं अन्तरं यस्मिन् तत्, 'Dense with tender shoots (or sprouts).' *Cf.* Uṇádisûtra, "श्लिषेरच्चोपधायाः." परिणामसम्पदं—Analyse परिणामस्य सम्पद् परिणामसम्पद् तां, 'The beauty of ripeness.' सन्ध्यया—'Behold how the forest having the multitudes of its leaves reddened by the twilight and dense with tender shoots, acquires the beauty of ripeness when the darkness gradually spreads through it,'

St. 65. अन्धकार°—Construe सर्वतः सर्पता कृष्णसर्पमलिनेन अन्धकारनिकरेण समन्ततो रुध्यमानविषयाः दिग्भुवः परित्वाः संकुचन्ति नु. अन्धकारनिकरेण—Analyse अन्धकारस्य निकरः अन्धकारनिकरः तेन तादृशेन, 'By

the mass of darkness.' 'By the thick darkness.' कृष्णसर्पमलिनेन— Analyse कृष्णश्चासौ सर्पश्च कृष्णसर्पः । कृष्णसर्पवन्मलिनः कृष्णसर्पमलिनः तेन तादृशेन, 'Soiled like a black serpent.' रुध्यमानविषयाः—Analyse रुध्यमानाः विषयाः यासां ताः रुध्यमानविषयाः, 'Having their ranges shut up.' परिखाः, Expl:—परितः खन्यन्ते इति परिखाः, 'The moats.' 'Trenches or fossæ round the fort or town.' दिग्भुवः—Analyse दिशां भूः दिग्भूः तस्याः दिग्भुवः, 'Of the site of direction (or quarter).' अन्धकार°—'The trenches of the directions, with their ranges shut up, on all sides, by the thick darkness, soiled like a black serpent and spreading everywhere, are indeed contracted.'

St. 66. भाति—Construe मत्तशिखिकण्ठकर्बुरं ध्वान्तजालपरिरुद्धमम्बरं भाति यथा अर्कदीपकृततापसंभृतप्रौढकज्जलमलीमसं. मत्त°—Analyse मत्ताः ये शिखिनः तेषां कण्ठाः इव कर्बुरं मत्तशिखिकण्ठकर्बुरं, 'Variegated like the throat of the proud peacocks.' ध्वान्त°—Analyse ध्वान्तस्य जालं तेन परिरुद्धं ध्वान्तजालपरिरुद्धं, 'Filled with a net of darkness.' 'Enveloped (or wrapped up) in a net of darkness.' मलीमस *adj.*—'Dirty. 'Unclean.' *Cf.* Pàṇi. V. 2. 114. "ज्योत्स्नातमिस्राशृङ्गिणोर्जस्विन्नूर्जस्वलगोमिन्मलिनमलीमसाः," 'The words ज्योत्स्ना, तमिस्रा, शृङ्गिण, ऊर्जस्विन्, ऊर्जस्वल, गोमिन्, मलिन and मलीमस are irregularly formed, in the sene of मतुप् and are names.' अर्क°—Analyse अर्कः एव दीपः तेन कृतो यः तापः तेन संभृतं यत् प्रौढं कज्जलं तेन मलीमसं अर्कदीपकृततापसंभृतप्रौढकज्जलमलीमसं, 'Stained with thick lamp-black gathered by the heat proceeding from the sun-lamp.' भाति—'The sky, variegated like the throat of a proud peacock and filled with a net of darkness, appears as if stained with thick soot gathered by the heat proceeding from the sun-lamp.'

St. 67. पश्य—Construe पूर्वमुद्गतमेतद् असितोरगत्विषः विष्णुवर्त्मनो दूरमग्नरविरश्मिभासुरमेकं छिद्रमिव दीप्तरुचि ज्योतिः पश्य. दीप्तरुचि—Analyse दीप्ता रुचिर्यस्य तद् दीप्तरुचि, 'With radiant splendour.' पूर्वमुद्गतं—'Risen up (in the sky) in front (in the eastern direction).' असितोरगत्विषः—Analyse असितो यः उरगः तस्य त्विडिव त्विड् यस्य तत् तस्य तादृशस्य, 'Of that which has the beauty like that of a black serpent.' विष्णुवर्त्मनः—Analyse विष्णोर्वर्त्म विष्णुवर्त्म तस्य विष्णुवर्त्मनः विष्णुपदस्य, 'Of Vis*h*nu's path.' 'Of the sky.' *Cf.* R. XIII. 1. "अथात्मनः शब्दगुणं गुणज्ञः पदं विमानेन विगाहमानः." *Cf.* Vik. I. 18. "पितुः पदं मध्यममुत्पतन्ती।" दूर°—Analyse दूरे मग्नो यो रविः तस्य रश्मयः तैः भासुरं दूरमग्नरविरश्मिभासुरं, 'Resplendent with the rays of the sun who has dived (or sunk) deep down into it.' भासुरः, Expl:—भाः अस्ति शीलमस्य स भासुरः,

'Shining.' 'Splendid.' *Cf.* Páṇi. III. 2. 161. "भञ्जभासमिदो घुरच्," 'The affix घुरच् comes is the sense of the agent having such a habit &c., after the verbs भञ्ज् 'to break,' भास् 'to shine,' and मिद् to be fat.' पश्य—'Behold this light (of the moon), with radiant splendour, has sprung up (in the sky) in front (in the eastern direction) as if it were a hole, resplendent with the rays of the sun, who had dived deep down into it, in the path of Vishṇu (i. e. in the sky) which has the beauty like that of a black serpent.'

St. 68. पश्चिमे—Construe पश्चिमे नभसि वेगिनो रविरथस्य लोहचक्रहतमेरुमस्तकाद् उद्गताः हुताशविप्लुषः इव लोहिताः तारकाः भान्ति. रविरथस्य—Analyse रवेः रथः रविरथः तस्य रविरथस्य, 'Of the chariot of the sun.' लोह°—Analyse लोहस्य चक्राणि लोहचक्राणि तैः हतं मेरोः मस्तकं तस्मात् तादृशात्, 'From the summits of the mount Meru against which struck the iron wheels.' मेरु *m.*—A mountain at the top or summit of the earth, on which is situated स्वर्ग, the heaven of Indra, containing the cities of the gods and the habitations of celestial spirits. Around this mountain the sun with all the planets is said to revolve. This mountain chain is now clearly established in the regions of north pole. See Prof. B. G. Tilaka's 'The Arctic Home in the Vedas,' chapter IV. हुताशविप्लुषः—Analyse हुतं अश्नातीति हुताशः तस्य विप्लुषः हुताशविप्लुषः, 'The sparks of the offering-eater' (i. e. the sparks of fire). पश्चिमे—'The crimson stars in the western horizon (*lit.* sky) appear like the sparks of fire flying from the summits of the mount Meru which are struck by the iron-wheels of the swift chariot of the sun.'

St. 69. मीलिताः-Construe रविभयेन मीलिताः तारकाः रश्मिधामहतलोहिताः इव दिङ्मुखैकरचनाः [सत्यः] दिनकृत्करात्यये समन्ततः उन्मिषन्ति. मीलिताः, 'Crowded together.' 'Or closed their eyes.' रविभयेन—Analyse रवेर्भयं रविभयं तेन रविभयेन, 'Through fear of the sun.' 'By the sun's fear.' तारकाः—'Stars.' *Cf.* Páni. VII. 3. 45. and the Vártika thereto, "तारका ज्योतिष्युपसंख्यानम्," 'तारका is formed when it means 'stars,' but तारिका a maid-servent from तारयति.' रश्मि°—Analyse रश्मीनां धाम रश्मिधाम तेन हताः अत एव लोहिताः रश्मिधामहतलोहिताः, 'Red on being struck by the multitude of rays.' उन्मिषन्ति—'To open the eyes.' 'To shine.' 'To twinkle.' From मिष् *vt.* or *vi.* 6. P. (सेट्) with उत्. दिन°-Analyse दिनं करोतीति दिनकृत् तस्य कराणां अत्ययः दिनकृत्करात्ययः तस्मिन् तादृशे, 'At the passing away of the sun's rays.' दिङ्मुखैकरचनाः—Analyse दिशां मुखं दिङ्मुखम् । एका चासौ रचना च एकरचना । दिङ्मुख य

एकरचना यासां ताः तादृश्यः, 'Being intent to decorate the face of the quarters.' मीलिताः—'The stars, which closed (their eyes) through fear of the sun, and which are red on being struck by the multitude of rays, open, as it were, (their eyes) on all sides, being intent to decorate the face of the quarters, at the passing away of the sun's rays.'

St. 70. पूर्व°—Construe असौ हिमरुचिः पूर्ववारिनिधिपृष्ठतः क्रमात् कलान्तरं दर्शयन् एकपक्षसुलभक्रमां वृद्धिं अद्य मुहुरेव विन्दति. पूर्ववारि°—Analyse वारीणां निधिः वारिनिधिः। पूर्वश्चासौ वारिनिधिश्च पूर्ववारिनिधिः तस्य पृष्ठतः पूर्ववारिनिधिपृष्ठतः, 'On the surface of the eastern ocean.' हिमरुचिः—Analyse हिमाः रुचयः यस्य स हिमरुचिः, 'Having cool rays of light' (i. e. the moon). कलान्तरं—Analyse अन्याः कलाः कलान्तरं, 'Different phases.' 'Different digits.' एक°—Analyse एकश्चासौ पक्षश्च एकपक्षः तस्मिन् सुलभः क्रमः यस्याः सा तां तादृशीं, 'Of an easy gradation in one fortnight.' मुहुरेव *ind*—'All at once.' पूर्व°—'The moon, showing gradually his digits on the surface of the eastern ocean, to-day obtains, all at once, his (full) development, which is of easy gradation in one fortnight' (i. e. the bright half of the month).

St. 71. पश्य—Construe पूर्वतः सपदि भृङ्गपटलासितप्रभं यत्तमो निर्गतं [तद्] हिमांशुना करेण जघने तुद्यमानामिव पश्चिमं याति [इति] पश्य. भृङ्ग°—Analyse भृङ्गपटलमिव असिता प्रभा यस्य तत् तादृशं, 'Of a black lustre like a collection (or cluster) of bees.' हिमांशुना—Analyse हिमाः अंशवो यस्य स हिमांशुः तेन हिमांशुना, 'By the cool-rayed moon.' पश्य—'See that the darkness, of a black lustre like a cluster of bees, which has started suddenly from the east, is proceeding to the west being, as it were, hit on the hip by the moon with his hands' (i. e. rays).

St. 72. क्षीर°—Construe विवर्धिना क्षीरवारिनिधिना प्लाव्यमानवदसौ हारशुभ्रनिजरश्मिसंचयो निशाकरः शनैः शनैः उदयतः [उदयाचलाद्] उत्पतति. क्षीर°—Analyse क्षीरं मधुरं च तद्वारि च तस्य निधिः तेन तादृशेन, 'By the store of sweet (or translucent) water.' विवर्धिना, Expl:—विशेषेण वर्धितुं शीलमस्य स विवर्धी तेन तादृशेन, 'Rising up.' 'Flowing up.' निशाकरः—Analyse निशां करोतीति निशाकरः, 'The night-making moon.' उदयतः = उदयाचलात्, 'From the eastern mountain behind which the sun rises.' निज°—Analyse निजाश्च ते रश्मयश्च निजरश्मयः तेषां सञ्चयः निजरश्मिसञ्चयः। हार इव शुभ्रः निजरश्मिसञ्चयो यस्य स तादृशः, 'Having the collection of his rays white like a necklace.' क्षीर°—'The moon, having the collection of his rays white like a necklace, springs up

gradually from the rising-mountain, being made to float, as it were, by the ocean, the store of sweet (or translucent) water, which is now rising.'

St. 73. क्षिप्यमाण°—Construe सर्वतः प्रसर्पतः शीतरश्मिकिरणस्य अन्तरं दातुमिव क्षिप्यमाणघनतामसोत्करं दिशां मण्डलं दूरमुत्सरति. *Cf.* Ku. VIII. 39. "बद्धकोशमपि तिष्ठति क्षणं सावशेषविवरं कुशेशयम्। षट्पदाय वसतिं ग्रहीष्यते प्रीतिपूर्वमिव दातुमन्तरम् ॥" क्षिप्यमाण°—Analyse क्षिप्यमाणो घनतामसोत्करो यस्मात् तत्, 'That from which the mass (or heap) of thick darkness is being dispelled (or dispersed).' शीत°—Analyse शीतरश्मेः किरणः शीतरश्मिकिरणः तस्य तादृशस्य, 'To the rays of the cool-rayed moon.' क्षिप्यमाण°—'The circle of quarters, having the mass of thick darkness which is being dispelled (or dispersed), as if to afford the space to the rays of the cool-rayed moon, which are spreading everywhere, goes to a very long distance.'

St. 74. क्षीयमाण°—Construe उद्गमे क्षीयमाणवपुः इन्दुः समन्ततो वर्धमानकिरणः [सन्] अर्कतप्तगगनानुबन्धिना तेजसा परितः विलीयते इव. क्षीयमाण°—Analyse क्षीयमाणं वपुर्यस्य स तादृशः, 'Having a lean or spare body.' वर्धमान°—Analyse वर्धमानाः किरणाः यस्य स तादृशः, 'Having his rays increased (or spread over).' अर्क°—Analyse अर्केण तप्तं यद्गगनं तस्य अनुबन्धि तेन तादृशेन, 'Attaching to the sky heated by the sun.' Three of our Mss. read गगण for गगन, but according to some authorities the word गगण appears to be a wrong form. *Cf.* "फल्गुने गगने फेने णत्वमिच्छन्ति बर्बराः." क्षीयमाणवपुः—'The moon having a lean body at his rising, has his rays increased on all sides and disappears, as it were, being surrounded by the lustre, attaching to the sky heated by the sun.'

St. 16. मदान्ध°—Construe मदान्धमातङ्गघटाद्रिसंकटे परिक्वणन्ती बलकायनिम्नगा वल्गुतरङ्गरङ्गितैः तरङ्गिता सती पुरुहूततेजसः पुरः प्रतस्थे. मदान्ध°—Analyse मदेन अन्धा या मातङ्गानां घटा सैव अद्रिः तस्य संकटं तस्मिन् तादृशे, 'On account of the obstruction of the mountain formed of the troops of elephants blind with rut.' सङ्कटं, Expl:—सङ्कटतीति सङ्कटं, 'Obstruction.' *Cf.* Pāṇi. III. 1. 134. Derived from कट् *vt.* or *vi.* 1. P. (सेट्) 'To rain,' 'to cover,' 'to go.' Or it may be derived from सम् and कटच्. *Cf.* Pāṇi. V. 2. 29. "सम्प्रोदश्च कटच्," 'The affix कटच् (कट) comes after the prepositions सं, प्र, उद्, and वि.' Thus संकटम्, प्रकटम्, उत्कटम् and विकटम्. बल°—Analyse बलमेव कायः बलकायः। बलकायरूपा निम्नगा बलकायनिम्नगा सेनात्मकनदी, 'A river consisting of the army.' तरङ्गिता *adj.* Expl:—तरङ्गाः सञ्जाताः अस्याः तरङ्गिता, 'Wavy.' 'Billowy.' 'Tossing with waves.' *Cf.* Pāṇi. V. 2. 36. "तदस्य संजातं तारकादिभ्य इतच्," 'The affix इतच् (इत) comes after the words तारका &c in the first case in construction in the sense of 'that whereof this is

observed or produced or appeared.' वल्गु°—Analyse तुरङ्गाणां रङ्गितानि तुरङ्गरङ्गितानि । वल्गूनि च तानि तुरङ्गरङ्गितानि च वल्गुतुरङ्गरङ्गितानि तैः तादृशैः, 'With lovely movements of the horses.' पुरुहूत°—Analyse पुरुहूतस्य इन्द्रस्य तेजः इव तेजो यस्य स तस्य तादृशस्य, 'Of him having the brilliance of Indra.' मदान्ध°—'The river consisting of his army, noisy by the obstruction of the mountain formed of the troops of elephants blind with rut, and foaming with waves of the lovely movements of the horses, set out in front of him, having the brilliance of Indra.'

St. 17. स्व°—Construe स्वदृष्टिरोधि रथोत्थं रजः श्रवणाग्रमारुतैः यदि नाहरिष्यत [तदा] मदस्रुतां दन्तिनां विनिर्गताभिः घटाभिः वर्त्म पुरो नादृक्ष्यत. स्व°—Analyse स्वेषां दृष्टयः स्वदृष्टयः ताः रुणद्धीति स्वदृष्टिरोधि, 'Blinding or obstructing their sight.' 'Obscuring their sight.' श्रवण°—Analyse अग्राश्च ते मारुताश्च अग्रमारुताः श्रवणानां अग्रमारुताः श्रवणाग्रमारुताः तैः तादृशैः or श्रवणानां अग्रेभ्यः उत्थिताः मारुताः श्रवणाग्रमारुताः तैः तादृशैः, 'By the wind (or breezes) produced from the fore-points of their flapping-ears.' रथोत्थं—Analyse रथेभ्यः उत्थं रथोत्थं, 'Raised by the cars.' मदस्रुतां—Analyse मदं स्रवन्तीति मदस्रुतः तेषां मदस्रुतां, 'Of those who shed (or shower) rut.' स्व°—'Had not the dust, raised by the cars, blinding their sight, been cleared off by the wind (produced) from the fore-points of their flapping-ears, the path in their front would not have been seen by the troops of elephants showering rut, when in swift motion.'

St. 18. व्यतीत°—Construe अथ व्यतीतरथ्ये रथे पुरगृहदीर्घिकासमीरणानर्तितपद्मजं रजः तस्याः विलासवत्याः लसदंशुजालयोः कपोलयोः पपात. व्यतीत°—Analyse व्यतीता रथ्या येन स व्यतीतरथ्यः तस्मिन् तादृशे, 'Which has gone over some ground of the high road.' कपोलयोः—'On both the cheeks'. Derived from कम्प् *vi.* I. A. (सेट्) 'To shake.' 'To tremble.' *Cf.* Uṇádi-Sûtra, "कपिगडिगण्डिकटिपटिभ्य ओलच्," The penultimate nasal is dropped since the root is authoritatively written कपि in the Sûtra by शाकटायन. Or कं सुखं पोलति. Derived from पुल् *vi.* I. P. (सेट्) 'To be great or large.' 'To be lofty or high.' 'To be piled or heaped up.' *Cf.* Páṇi. III. 2. 1. विलासवत्याः, Expl—विलसनशीला विलासवती तस्याः विलासवत्याः, 'Of the sportive lady.' लसदंशुजालयोः—Analyse लसन्तः ये अंशवः तेषां जालानि ययोः तौ तयोः लसदंशुजालयोः, 'Shining with the collections or multitudes of rays.' पुरगृहदीर्घिका°—Analyse पद्मेभ्यः जातं पद्मजम् । पुरगृहा या दीर्घिका तस्याः समीरणेन आनर्तितं पद्मजं यस्य तत् पुरगृहदीर्घिकासमीरणानर्तितपद्मजं, 'Raised (or sprung) from the lotuses in the artificial pond lying

outside the city.' पुरगृह्य=पुरबाह्य, 'Lying outside the city.' *Cf.* Pâṇi. III. 1. 119. "पदास्वैरिबाह्यापक्ष्येषु च," 'The root ग्रह् takes the affix क्यप्, when it means a 'word', a 'dependent', 'outside' or a 'partisan'. Thus प्रगृह्यम् 'the Pragṛihya that do not admit of Sandhi, already defined in Sûtra I. 1. 2. So also अवगृह्यं. The word अस्वैरि means dependent upon other, not free to provide for himself. Thus गृह्यकाः शुकाः, 'The captive parrots.' The word बाह्य means 'situated outside.' Thus ग्रामगृह्या सेना 'an army lying outside the village.' The word बाह्या being in the feminine gender indicates that the derivative word formed from ग्रह् must also be feminine in gender to have this sense. The word पक्ष्य is derived from पक्ष 'a side, a party,' and means a partisan, follower or friend. Thus वासुदेवगृह्याः 'siding with or being the partisans of Vàsudeva.' So also अर्जुनगृह्याः 'belonging to the party of Arjuna.' व्यतीत°—'When the car went over some ground of the high road, the dust of the lotuses in the artificial pond outside the city made to dance by the wind, settled upon the cheeks, shining with collections of rays, of that sportive lady.'

St. 19. वराङ्गना—Construe पथि प्रस्तरभेदकोटिभिः चक्रे हतस्य वरूथिन यत् चलनं तच्चलनं पिधाय वराङ्गना तं प्रियं बलसन्निधावपि आललम्बे. वराङ्गना—Analyse वरा चासौ अङ्गना च वराङ्गना, 'A beautiful or noble woman.' प्रस्तर°—Analyse प्रस्तराणां भेदाः तेषां कोटयः प्रस्तरभेदकोटयः ताभिः तादृशीभिः, 'By the points of pieces of stones.' वरूथिनः, Expl:—वरूथः रथगुप्तिः सोऽस्यास्तीति तस्य वरूथिनः, 'Of a war-car or chariot furnished with protecting plank or ledge.' व्रियते रथो अनेनेति । परप्रहरणाभिघातरक्षार्थं रथसन्नाहवदावरणम् । *Cf.* Uṇádisûtra, "जॄवृभ्रूभ्यामूथन्." Derived from वृ *vt.* 5. U. (सेट्) 'To cover.' 'To surround.' बल°—Analyse बलस्य सन्निधिः बलसन्निधिः तस्मिन् तादृशे, 'In the presence of the army.' पिधाय *ger.*—Is equivalent to समाश्रित्य, 'Taking advantage of,' or पुरस्कृत्य, 'Having placed before or caused to precede.' 'Having honoured or paid respect to.' The Sinhalese *Sanna* interprets the gerund by संवा [समा] धाय and Principal Dharmàràma renders it by संवरणयकोट. Both these interpretations are unintelligible to me. वराङ्गना—'Taking advantage of the shocks of joltings to the wheel of the war-car struck by the points of pieces of stones, on the road, the beautiful lady hung upon her dear lord even in the presence of the army.'

St. 20. रथ°—Construe अथ वनान्तवर्तिनी सीता रथध्वनिप्रापितसंमर्दं समुत्पुच्छयमानं उन्मुखं उदग्रकर्णं गवां कुलं एकतः परिधावद् ददर्श. रथ°—Analyse

रथस्य ध्वनिना प्रापितः संमदो यस्य तत्, 'Gladdened by the noise of the car.' 'Conducted or led to experience joy by the noise.' 'Joy in which was instilled by the noise of the car.' समुत्पुच्छयमानं—*Denomi. pre. parti.* of (समुत्पुच्छयते) 'Uplifting the tails.' 'With their tails erect.' उन्मुखं—Analyse उद्गतं मुखं यस्य तद् उन्मुखं, 'Looking upwards.' उदग्रकर्ण—Analyse उदग्राः कर्णाः यस्य तत्, 'Having their ears erect or raised.' वनान्तवर्तिनी—Analyse वनस्य अन्तः वनान्तः तत्र वर्तिनी वनान्तवर्तिनी, 'Being in the middle or on the skirts of the forest.' वनान्तः वनप्रदेशः or simply 'a forest.' The word अन्त has no special meaning here. It may mean प्रदेश or it may be added to strengthen the force of the locative termination. *Cf.* Cháritra-vardhana, "अन्तशब्दे स्वरूपे." रथ°—'Sîtâ, who was in the midst of the forest, then saw a herd of wild cows, gladdened by the noise of the car, with their tails uplifted, looking upwards, having the ears erect and running on one side (of the forest).'

St. 21. विनिद्र°—Construe मृदुभिः समीरणैः विनिद्रपद्माः कलहंसिकागिरः विसारयन्त्यः स्वदेशसीमासरितः विलङ्घिताः [सत्यः] वधूचेतसि शुचं साधु सन्दधुः. विनिद्र°—Analyse विनिर्गता निद्रा येषां तानि विनिद्राणि । विनिद्राणि पद्मानि यासु ताः विनिद्रपद्माः, 'The lotuses in which were blooming (*lit.* have shaken off their sleep).' कलहंसिकागिरः—Analyse कलहंसिकानां गिरः कलहंसिकागिरः, 'The inarticulate sounds of female swans.' An object to विसारयन्त्यः. स्वदेश°—Analyse स्वस्य देशः स्वदेशः तस्य सीमायाः सरितः स्वदेशसीमासरितः, 'The rivers on the boundary of one's own country.' वधूचेतसि—Analyse वध्वाः चेतः वधूचेतः तस्मिन् तादृशे, 'In the heart of the bride.' विनिद्र°—'The rivers on the boundary of her country having lotuses blooming by the gentle breezes and spreading inarticulate sounds of the female swans, produced, when crossed, a great grief in the heart of the bride.'

St. 22. विवृत्त°—Construe स्वजन्मभूमौ विवृत्तदृष्टाः गिरयो विषयव्यतिक्रमाद् अवनीतले शनैर्निमज्जन्तः इव नृपात्मजाकपोलं अश्रुभिः अजस्रमातेनतुः. विवृत्त°—Analyse विवृत्तेन विवर्तनेन दृष्टाः विवृत्तदृष्टाः, 'Seen as rolling.' 'Seen by turning back.' विषयव्यतिक्रमात्—Analyse विषयाणां व्यतिक्रमः विषयव्यतिक्रमः तस्मात्, 'On account of passing over countries.' अवनीतले—Analyse अवन्याः तलं अवनीतलं तस्मिन् अवनीतले. 'Into the surface of the earth or ground.' स्वजन्मभूमौ—Analyse स्वस्य जन्मभूमिः स्वजन्मभूमिः तस्यां स्वजन्मभूमौ, 'In the native country.' 'On the native land.' नृपात्मजा°—Analyse नृपस्य आत्मजा नृपात्मजा तस्याः कपोलः तं तादृशं, 'To the cheeks of the daughter of the king.' विवृत्त°—'The mountains of her native country seen as rolling on account of passing over the country

and slowly plunging, as it were, into the surface of the earth, frequently covered the cheeks of the princess with tears.'

St. 23. द्विपेन्द्र°—Construe द्विपेन्द्रदन्ताहतवन्यसल्लकीकषायगन्धिर्वनान्तमारुतस्तत्र पथि योषितामलकाग्रवल्लरीः शनैर्विधुन्वन् मुखानि पस्पर्श. द्विप°—Analyse वन्याश्च ताः सल्लक्यश्च वन्यसल्लक्यः । द्वाभ्यां पिबन्तीति द्विपाः तेषां इन्द्राः द्विपेन्द्राः तेषां दन्तैः आहताः याः वन्यसल्लक्यः तासां कषायस्य गन्धः इव गन्धो यस्य स तादृशः, 'Having an astringent odour (or flavour) of the wild Sallakî (trees) being struck with the tusks by princes of elephants.' अलकाग्रवल्लरीः—Analyse अलकानां अग्राणि अलकाग्राणि तान्येव वल्लर्यः ताः तादृशीः, 'Creeper-like ends of the hair.' वनान्तमारुतः—Analyse वनस्य अन्तः वनान्तः तस्य मारुतः वनान्तमारुतः, 'The wind of the borders of the forest.' 'The wind of the forest.' द्विपेन्द्र°—'There, on the road, the wind of the borders of the forest, having an astringent odour on account of the wild Sallakî (trees) being struck with the tusks of the princes of elephants and slowly shaking the creeper-like ends of the hair touched the faces of the ladies.'

St. 24. अथ—Construe अथ तामसः प्रतानः नृपस्य भीमं भयमादिशन् क्षपायाः विगमेऽपि वैरोचनरोचिषां संहतिं प्रसह्य क्षिपन् पथि दिशः प्रततान. प्रतानः—Analyse प्रकर्षेण तानः प्रतानः, 'A mass.' 'A heap.' तामसः, Expl:—तमसो जातः तामसः, 'Belonging to darkness.' 'Dark.' वैरोचन°—Analyse विरोचनाद् आगतानि वैरोचनानि । वैरोचनानि च तानि रोचींषि च वैरोचनरोचींषि तेषां वैरोचनरोचिषां, 'Belonging (or pertaining) to the rays of the sun.' अथ—'A mass of darkness giving great fear to the king and forcibly throwing aside the collection of the sun's rays even after the disappearance of the night, spread to all directions on the road.'

St. 25. अरिष्ट°—Construe तमोभिभूताः प्रतिकूलमारुताः अरिष्टसन्तापविरूपदर्शनाः दिशः विनाशोपनताः इव अविप्रसन्नानि मुखानि क्षणं भेजिरे. *Cf.* R. XI. verses 58 to 62. अरिष्ट°—Analyse अरिष्टः अशुभश्चासौ संतापः दिग्दाहश्च अरिष्टसंतापः तेन विरूपं दर्शनं यासां ताः तादृश्यः, 'Having monstrous appearance on account of the inauspicious heat.' अरिष्ट *m.*—'Bad or ill-luck.' 'Misfortune.' 'A natural phenomena boding misfortune.' 'Sign or symptom of approaching death.' As applied to विनाशोपनताः the compound may be analysed in the following way :—अरिष्टस्य दुःखस्य संतापः भोगचिन्ता तेन विरूपं दर्शनं यासां ताः तादृश्यः, 'Having an unnatural (or care-worn) appearance consequent on the anxiety of befalling calamity.' तमोऽभिभूताः—Analyse तमसा अभिभूताः तमोऽभिभूताः, 'Enveloped in darkness.' When applied ot

विनाशोपनताः the compound may be analysed as :—तमसा अज्ञानेन अभिभूताः मोहिताः तमोऽभिभूताः, 'Infatuated by the quality of darkness.' प्रतिकूलमारुताः—Analyse प्रतिकूलाः मारुताः यासु ताः प्रतिकूलमारुताः, 'Having contrary winds.' Winds blowing in opposite or contrary directions often bode bad omen or approaching calamity. As applied to विनाशोपनताः the compound may be analysed as :—प्रतिकूलाः मारुताः देवाः यासु ताः प्रतिकूलमारुताः, 'Having the deities disposed in a hostile manner.' अविप्रसन्नानि—Analyse विशेषेण प्रसन्नानि विप्रसन्नानि । न विप्रसन्नानि अविप्रसन्नानि, 'Highly dissatisfied.' 'Highly displeased.' विनाशोपनताः—Analyse विनाशं उपनताः विनाशोपनताः, 'Verging on destruction.' अरिष्ट°—'The quarters, having monstrous appearance on account of the inauspicious heat, enveloped in darkness and having contrary winds, assumed for a moment displeased looks, like persons, verging on destruction.'

St. 26. अथ—Construe अथ दीप्तिभिः उदीचीं दिशं क्षणादवभास्य अग्रतः प्रकाशीभवत्तेजः बलेन पुरुषाकृतिश्रिया [च] विभक्तं उत्पातमनु व्यदृश्यत. *Cf.* R. XI. 63. "तेजसः सपदि राशिरुत्थितः प्रादुरास किल वाहिनीमुखे । यः प्रमृज्य नयनानि सैनिकैर्लक्षणीयपुरुषाकृतिश्चिरात्." पुरुषा°—Analyse पुरुषस्य आकृतेः श्रीः पुरुषाकृतिश्रीः तया तादृश्या, 'With the splendour of a man's form.' अथ—'Then after that portent, a certain lustre manifesting itself in front and instantly illuminating the northern quarter with its radiance was seen distinct with the splendour of a man's form and with manly power.'

St. 27. ततः—Construe ततः श्रवणावसङ्गिनीं विशुष्कपङ्केरुहबीजमालिकां विलोचनोपान्ते विनिद्ररक्तोत्पलशङ्कया ततामलिसन्ततिमिव दधानः [भृगूणां प्रभुः रामेण गिरा जगदे इत्युत्तरेणान्वयः]. श्रवणावसङ्गिनीं—Analyse श्रवणयोः कर्णयोः अवसङ्गिनी श्रवणावसङ्गिनी तां तादृशीं, 'Hanging on his ears.' विशुष्क°—Analyse पङ्के रोहन्तीति पङ्केरुहः तेषां बीजानि पङ्केरुहबीजानि । विशुष्काणि च तानि पङ्केरुहबीजानि च विशुष्कपङ्केरुहबीजानि तेषां मालिका विशुष्कपङ्केरुहबीजमालिका तां तादृशीं, 'A garland of dry lotus-seeds.' विनिद्र°—Analyse रक्तानि च तानि उत्पलानि च रक्तोत्पलानि । विनिद्राणि च तानि रक्तोत्पलानि च विनिद्ररक्तोत्पलानि तेषां शङ्का तया तादृश्या, 'With the expectation of blooming red-lotuses.' विलोचनोपान्ते—Analyse विलोचनयोः उपान्तः विलोचनोपान्तः तस्मिन् तादृशे, 'At the corner of the eyes.' अलि°—Analyse अलीनां सन्ततिः अलिसन्ततिः तां तादृशीं, 'A row of black-bees.' This and the next four verses form a कुलक. For the definition &c. see our notes on II. 2. ततः—'Then the lord of the Bh*r*igus had a garland of dry lotus-seeds pending on his ears, like a row of bees, spread at the corner of his eyes, with the expectation of blooming red-lotuses.'

St. 28. विशाल°—Construe विशालवामांसतटावलम्बिनीं तीव्रतपोहुताशनस्फुलिङ्गपातैरिव बिन्दुचित्रितां द्वीपितनुं समुद्वहन् रुषा परिज्वलन् तनूदरः [भृगूणां प्रभुः रामेण गिरो जगदे इत्युत्तरेणान्वयः]. विशाल°—Analyse वामश्चासौ अंसश्च वामांसः। विशालः वामांसः विशालवामांसः तस्य तटे अवलंबिनी विशालवामांसतटावलंबिनी तां तादृशीं, 'Suspending on the slope of his broad left-shoulder.' द्वीपितनुं—Analyse द्वीपिनः तनुः द्वीपितनुः तां द्वीपितनुं, 'The hide (or skin) of a leopard.' तनूदरः—Analyse तनु उदरं यस्य स तनूदरः, 'Having a thin stomach.' तीव्र°—Analyse तीव्रो यस्तपसां हुताशनः तस्य स्फुलिङ्गानां पाताः तीव्रतपोहुताशनस्फुलिङ्गपाताः तैः तादृशैरिव, 'Like the falling of sparks of the fire of his rigorous asceticism.' बिन्दुचित्रितां—Analyse बिन्दुभिः चित्रिता बिन्दुचित्रिता तां तादृशीं, 'Variegated with spots.' 'Marked with spots.' विशाल°—'The thin-bellied lord of the Bh*ri*gus, burning with rage, carried a leopard's skin suspended on the slope of his broad left shoulder, which was variegated with spots, as if, with the mark of the sparks of the burning fire of his rigorous asceticism.'

St. 29. भुजे—Construe अतिभीमे वामे भुजे द्विषां निधनावहं सशरं शरासनं निधाय अपरस्मिन् करे परदुर्गपारगं परं परशुं बिभ्रत् स परासुहा [भृगूणां प्रभुः रामेण गिरो जगदे इत्युत्तरेणान्वयः]. अतिभीमे—Analyse अतिशयितः भीमः अतिभीमः तस्मिन् तादृशे, 'Exceedingly terrible.' सशरं—Analyse शरेण सह सशरं, 'Equipped with an arrow.' शरासनं—Analyse शराः अस्यन्ते अनेनेति शरासनं, 'Shooting an arrow.' 'An arrow-shooter.' 'A bow.' निधनावहं—Analyse निधनं आवहतीति निधनावहं, 'Carrying death.' परदुर्गपारगं—Analyse पारं or पारे गच्छतीति पारगः। परेषां दुर्गस्य पारगः परदुर्गपारगः तं तादृशं, 'Penetrating the hill-forts of his opponents.' परशुं, Expl:—परं शृणाति इति परशुः तं तादृशं, 'An axe.' Derived from शॄ *vt.* 9. P. (सेट्) 'To tear asunder.' 'To split in pieces.' 'To kill.' *Cf.* Uṇâdi-Sûtra "आङ्परयोः खनिशॄभ्यां डिच्च" इति कुः (उ)। पृषोदरादित्वादकारलोपात्पर्शुरपि. As आशुः परशुः or पर्शुः. परासुहा—Analyse परेषां असून् हन्तीति परासुहा, 'The destroyer of the life of his enemies.' भुजे—'That lord of the Bh*ri*gus, the destroyer of the life of his enemies, bore on his exceedingly terrible left arm a bow equipped with an arrow, which carried death to his enemies and carried in his other hand an excellent axe, which penetrated the hill-forts of his opponents.'

St. 30. तपो°—Construe आदित्यमयूखपिङ्गलाः वलिताः जटाः तपोभिधानस्य सितेतराध्वनः अग्नेः शिखा इव आत्मरयेण संभृतैः समीरणैः समन्ततः विधुन्वन् [भृगूणां प्रभुः रामेण गिरो जगदे इत्युत्तरेण संबन्धः]. तपो°—Analyse तपः

अभिधानं यस्य स तपोभिधानः तस्य तादृशस्य, 'Of one going by the name of religious austerities.' सितेतराध्वनः—Analyse सितात् शुभ्रादितरः अध्वा यस्य स सितेतराध्वा तस्य सितेतराध्वनः कृष्णवर्त्मनः, 'Of one that leaves behind a track other than white, i e. black.' 'Of one which leaves behind a black track' (i. e. of the fire). आदित्य°—Analyse आदित्यस्य मयूखाः ते इव पिङ्गलाः आदित्यमयूखपिङ्गलाः, 'Tawny like the sun's rays.' आत्मरयेण—Analyse आत्मनः रयः तेन तादृशेन, 'By his own vehemence.' तपो°—'He waved about on all sides his braided matted hair, tawny like the sun's rays, which were like the flames of the fire of his asceticism, (*lit.* going by the name of his asceticism) by the winds created by his own vehemence.'

St. 31. प्रभुः—Construe अथ भृगूणां प्रभुः जगत्सृजः परः अवतारः तद्गुरुं ज्वलनं वितन्वता हसेन धुन्वन् बली रामेण प्रबुध्य रुषाहृताः गिरो जगदे. भृगूणां प्रभुः—'The lord of the Bh*r*igus .' भृगु *m.*—A vedic sage. He is one of the Prajápatis and great *R*ishis, and is regarded as the founder of the race of the Bh*r*igus or Bhárgavas, in which was born Jamadagni and Paras'uràma. Manu calls him son, and says that he confides to him his institutes. According to the Mahábhárata he officiated at Daksha's celebrated sacrifice, and had his beard pulled out by S'iva. The same authority also tells the following story:—"It is related of Bh*r*igu that he rescued the sage Agastya from the tyranny of king Nahusha, who had obtained superhuman power. Bh*r*igu crept into Agastya's hair to avoid the potent glance of Nahusha, and when that tyrant attached Agastya to his chariot and kicked him on the head to make him move, Bh*r*igu cursed Nahusha, and he was turned into a serpent. Bh*r*igu, on Nahusha's supplication, limited the duration of his curse." In the Padma Puráṇa it is related that the *R*ishis, assembled at a sacrifice, disputed as to which deity was best entitled to the homage of a Bráhmaṇa. Being unable to agree, they resolved to send Bh*r*igu to test the characters of the various gods, and he accordingly went. He could not obtain access to S'iva because that deity was engaged with his wife; "finding him, therefore, to consist of the property of darkness, Bh*r*igu sentenced him to take the form of the Linga, and pronounced that he should have no offerings presented to him, nor receive the worship of the pious and respectable. His next visit was to Brahmà, whom he beheld surrounded by sages, and so much inflated with his own importance as to treat Bh*r*igu with great inattention, betray-

ing his being made up of foulness. The Muni therefore excluded him from the worship of Bráhmaṇas. Repairing next to Vishṇu, he found the deity asleep, and, indignant at his seeming sloth, Bh*ri*gu stamped upon his breast with his left foot and awoke him; instead of being offended, Vishṇu gently pressed the Bràhmaṇa's foot and expressed himself honoured and made happy by its contact; and Bh*ri*gu, highly pleased by his humility, and satisfied of his being impersonated goodness, proclaimed Vishṇu as the only being to be worshipped by men or gods, in which decision the Munis, upon Bh*ri*gu's report, concurred.' जगत्सृजः—Analyse जगतः सृद् जगत्सृद्-इ् तस्य तादृशस्य, 'Of the creator of the world.' तद्बलं—Analyse तस्य बल तद्बलं, 'His (Ràma's) forces.' रुषावृताः—Analyse रुषया आवृताः रुषावृताः, 'Full of anger.' 'Replete (or foaming) with wrath.' प्रभुः—'Then the powerful lord of the Bh*ri*gus, another incarnation of Creator of the world, who was shaking his (Ráma's) forces with laughter, spreading fire, was obstructed by Ràma and addressed the following words full of anger.'

St. 32. न—Construe हे राम परशुराम अन्यं अपरं क्षितिक्षितं महीनाथमिव युधि आहवे दाशरथिं रामं जेतुं अभिभवितुं उद्यमः व्यापारः न विधीयतां न क्रियताम् । नगः गिरिः सरित्तटीपाटनपाटवस्पृशं नदीकूलोद्भेदनदर्शितकौशलं गोपतिं वृषभं प्राप्य न विशीर्यते. In writing this verse the poet probably had in his mind's eye the graphic description of Kálidàsa's Meghadûth. *Cf.* Megh. I. 2. "वप्रक्रीडापरिणतगजप्रेक्षणीयं ददर्श." Also I. 56. "शोभां शुभ्रत्रिनयनवृषोत्खातपङ्कोपमेयाम्." And R. V. 44. "निःशेषविक्षालितधातुनापि वप्रक्रियामृक्षवतस्तटेषु." क्षितिक्षितं—Analyse क्षितिं महीं क्षियति निवसतीति । अथ वा । क्षितौ क्षयति ईष्टे इति तं तादृशं, 'Ruler of the earth.' *Cf.* R. I. 11. "आसीन्महीक्षितामाद्यः." The word is derived from क्षि *vt.* 6. P. (अनिट्) 'To dwell.' 'To go.' Or it may be derived from क्षि *vi.* or *vt.* 1. P. (अनिट्) 'To exercise power.' 'To hold sway.' 'To rule.' 'To govern.' *Cf.* Páṇi. III. 2. 76. and VI. 1. 71. सरित्तटी°–Analyse सरितां तटीनां पाटने पाटवं स्पृशतीति सरित्तटीपाटनपाटवस्पृक्-श् तं तादृशं, 'Possessing (or showing) skill in throwing up or tearing asunder the banks of the rivers.' गोपतिं—Analyse गवां पतिः गोपतिः तं तादृशं, 'The lord of a herd of cows.' 'A bull.' 'An ox.' नगः, Expl:—न गच्छतीति नगः, 'A mountain.' *Cf.* अनेकार्थे, "नगः शैलो नगो द्रुमः." न—'O Paras'uràma (please), do not strive to conquer Ráma like any other king in a battle : a mountain does not fall to pieces on coming into contact with the lord of a herd of cows, who possesses skill in throwing up the banks of the rivers.'

St. 33. रघोः—Construe जगतीपतिद्विषस्तव विक्रमक्रमः इह रघोरपत्ये वृथा स्यात्। विसारिग्रसनस्थपाटवो विहंगमो दन्दशूकप्रभवे अलं न. *Cf.* R. II. 34. "प्रयुक्तमप्यस्त्रमितो वृथा स्यात्." जगतीपति°—Analyse जगत्याः पतयः जगतीपतयः तान् द्वेष्टीति जगतीपतिद्विट्-द् तस्य तादृशस्य, 'Of the enemy of the lords of the earth.' विक्रमक्रमः—Analyse विक्रमस्य क्रमः विक्रमक्रमः, 'The actions of heroism (or bravery).' 'Brave undertakings.' विसारि°—Analyse विसारिणां मत्स्यानां ग्रसनं विसारिग्रसनम्। विसारिग्रसने तिष्ठतीति विसारिग्रसनस्थं तादृशं पाटवं यस्य सः, 'One whose cleverness (or skill) lies in swallowing fish.' विसारिन् *m.* Expl:—विसारोऽस्यास्तीति विसारी, 'A fish.' Derived from सृ with वि *vi.* or *vt.* 1. A. (अनिट्) 'To go forth or in various directions.' *Cf.* Pāṇi. V. 2. 115. "अत इनि ठनौ." 'The affix इनि (इन्) and ठन् (इक्) come in the sense of मतुप् after nominal stems ending in short अ; and in the alternative मतुप् also comes.' दन्दशूकप्रभवे—Analyse दन्दशूकाणां सर्पाणां प्रभुः दन्दशूकप्रभुः तस्मै दन्दशूकप्रभवे, 'To the lord or master of serpents,' (i. e. शेष). दन्दशूक *m.*—'A serpent.' *Cf.* Medi. "दन्दशूकस्तु पुलिङ्गो राक्षसे च सरीसृपे." Also Hema. दन्दशूकस्तु फणिरक्षसोः." The word दन्दशूक is derived from the *Frequentative* base (यङ् लुक्) of दंश्. *Cf.* Pāṇi. VII. 4. 86. "जपजभदहदशभञ्जपशां च," 'The augment नुक् comes after the reduplicate of जप्, जभ्, दह्, दश्, भञ्ज्, and पश् in the Frequentative (with or without यङ्).' As दंदश्यते and दंदशीति. And Pāṇi. III. 2. 166. "यजजपदशां यङः," 'The affix ऊक comes in the sense of "the agent having such a habit &c," after the verbs यज्, जप् and दश् when they end in the affix यङ्.' The Frequentative of these verbs take ऊक्. As यायजूकः 'a performer of frequent sacrifices;' जञ्जपूकः 'a mutterer of prayers repeatedly;' दन्दशूकः 'a snake (what bites frequently).' रघोः—'The brave undertaking of yours, who are the enemy of the lords of the earth (क्षत्रिय race), would be fruitless here in the case of the scion of the Raghus.' 'A bird whose cleverness lies in swallowing fish can do nothing to the lord of serpents' (*lit.* is not a match for the lord of serpents).

St. 34. तव—Construe धनुषः प्रयोगे तव अनुशासितुः भूधरधन्वनः शरासने परं इतः प्रवृत्ताऽपि विपत् त्वदीयश्रवणस्य गोचरं ननं आगता. *Cf.* Pushpadanta's Mahimna 18. "रथः क्षोणी यन्ता शतधृतिरगेन्द्रो धनुरथो। रथाङ्गे चन्द्रार्कौ रथचरणपाणिः शर इति। दिधक्षोस्ते कोऽयं त्रिपुरतृणमाडम्बरविधिः। विधेयैः क्रीडन्त्यो न खलु परतंत्राः प्रभुधियः." शरासने—Analyse शराः अस्यन्ते अनेनेति शरासनं तस्मिन् तादृशे, 'About the bow.' भूधर°—Analyse धरतीति धरः। भुवः धरः भूधरः। भूधरो हिमालयः एव धनुर्यस्य स भूधरधन्वा तस्य तादृशस्य or भूधरः धन्व चापः यस्य

स भूधरधन्वा तस्य तादृशस्य, 'Of him having his bow made of the mountain Himàlaya.' परं *ind.*—'Deliberately.' Or it may also mean अत्यन्तं, अतिशयं, 'Exceedingly.' 'Eminenly.' इतः=अस्मत्तः, 'From me.' त्वदीय°—Analyse त्वदीयस्य श्रवणं त्वदीयश्रवणं तस्य तादृशस्य, 'To the ear.' गोचरम्—Analyse गावः इन्द्रियाणि चरन्त्येषु गोचरम्, 'Into the range of the organs of sense.' *Cf.* Pàṇi. III. 3. 119. "गोचरसंचरवहव्रजव्याजापणनिगमाश्च," 'The words 'गोचर,' 'संचर,' 'वह,' 'व्रज,' 'व्याज,' 'आपण,' and 'निगम' are anomalous.' These words are irregularly formed by the affix घ with the same force as in the last aphorism. This is an अपवाद or exception to rule III. 3. 121 by which after roots ending in consonants, the affix घञ् is added.' Thus गोचरः 'pasturage,' (*lit.* that in which the cows graze) &c. अव—'Has the accident, though deliberately done by me, to the bow of the god S'iva (*lit.* who holds a bow made of the mountain Himálaya), your tutor in giving you instructions (or practice) in archery probably (or perhaps) come to your ears ?'

St. 35. निशम्य—Construe तस्य इत्येतद् ईरितं वचो निशम्य स पिनाकिनः शिष्यः परस्य यशसो वृद्धिं वितन्वतीं धनुषो भिदां वृथा विधित्सन् पुनरिदं जगाद. पिनाकिनः, Expl :—पिनाकोऽस्यास्तीति पिनाकी तस्य पिनाकिनः, 'Of the wielder of Pináka or trident,' (*i. e.* S'iva's club or bow). वृथा विधित्सन्—'Wishing to make light of.' 'Wishing to despise.' धनुषो भिदा—'Breaking of the bow.' निशम्य—'Hearing that speech thus delivered (or spoken) by him, the disciple of the trident-bearing god, wishing to make light of the breaking of the bow, which was heightening the fame of the other (Ráma) answered thus.'

St. 36. नवेश्वर—Construe [हे] नवेश्वर पुरा वन्ध्येतरबाणपातनं स्तब्धतरं धनुर्द्वयं विधाय विश्वकर्मणा पुरन्दराख्याय विज्ञामधीशे व्यतीर्यत किल. नवेश्वर—Analyse नवश्चासौ ईश्वरश्च नवेश्वरः तत्संबुद्धिः नवेश्वर, 'O new king.' स्तब्धतरं *adj.*—'Harder.' 'More stiff.' धनुर्द्वयं—Analyse धनुषोर्द्वयं धनुर्द्वयं, 'A pair of bows.' The Rámayaṇa gives the following legend in the mouth of Paras'uráma :—"These two foremost of bows, extraordinary, and worshipped of all the worlds, and stout, and powerful, surpassingly excellent, were constructed with care by विश्वकर्मा. And, one of these, O foremost of men, for the destruction of त्रिपुर, the celestials gave unto त्र्यम्बक, desirous of encounter,—even that which, O काकुत्स्थ, thou hast snapped. And this second, which is irrepressible, was given to विष्णु, by the chiefs of the celestials. And, O Ràma, this bow belonging unto Vishṇu, capable of conquering hostile cities, is, O काकुत्स्थ, equal in energy unto the bow

belonging unto Rudra. Once on a time the deities, with the object of ascertaining the respective prowess of विष्णु and the blue-throated one, asked the great father, about it. Thereupon the great father, foremost of those abiding by truth—reading the intention of the deities, fomented a quarrel between them. And upon that quarrel breaking out among the deities, there took place a mighty contest capable of making one's hair stand on end, between विष्णु and the blue-throated one, each burning to beat the other down. Then on विष्णु uttering a roar, S'iva's bow to dreadful prowess became flaccid. And thereupon the three-eyed महादेव became moveless. And upon the assembled gods with the saints and the Châraṇas beseeching these two foremost of celestials, they became pacified. And upon beholding that bow of शिव rendered flaccid by Vishṇu's prowess, the deities with the saints acknowledged विष्णु as the more powerful. And the enraged Rudra of high fame made over the bow along with its shafts unto the hands of Râjar*shi* Devarâta of Videha. And, O Ràma, this bow belonging to विष्णु, capable of conquering hostile cities, विष्णु consigned to Bh*ri*gu's son, ऋचीक, as a worthy trust. And the exceedingly energetic ऋचीक, made over the divine bow unto his son of immeasurabe prowess, my sire the high souled son of जमदग्नि. And once on a time, on my sire surcharged with ascetic energy, renouncing the bow, Arjuna, under the influence of unrighteous sentiment, compassed the death of my father. Thereupon, learning of the lamentable and untoward slaughter of my sire, I from ire, annihilated the Kshatriyas, springing up afresh by numbers, then bringing under sway the whole earth, I, O Ráma, on the sacrifice being over, conferred it upon the righteous काश्यप as दक्षिणा. Having made this gift, I was dwelling in the Mahendra hill equipped with ascetic energy, when, hearing of thy snapping of the bow, I have speedily come hither. Do thou now, O Ràma, agreeably to the cannon of the क्षत्रिय morality, take this excellent and mighty bow of Vishṇu, that had belonged to my father and grand-father. And do thou set upon this best of bows an arrow capable of conquering hostile cities. And, O काकुत्स्थ, if thou succeed, I shall then offer thee combat." वन्ध्येतर—Analyse वन्ध्याद् इतरद् वन्ध्येतरत् । बाणानां पातनं बाणपातनम् । वन्ध्येतरद् बाणपातनं यस्य तद् वन्ध्येतरबाणपातनं, 'Having the descent of arrows other than fruitless,' (i. e. effective, effi-

cacious). विश्वकर्मा, The architect of the gods. His daughter संज्ञा was married to the sun but, as she was unable to endure his effulgence, the divine architect placed the sun upon his lathe and cut off a part of his lustre which he used in making the discus of विष्णु, the trident of शिव and the weapons of other gods. विशामधीशे—'To the lord of the gods.' विश् (द्-ड्) *m.*—'Name of any class of gods designated by troops.' 'The gods.' पुरन्दराख्याय—Analyse पुरं दारयतीति पुरन्दरः । पुरन्दरः आख्या यस्य स पुरन्दराख्यः तस्मै पुरन्दराख्याय, 'To him bearing the name of Purandara.' 'Known by the epithet of पुरन्दर.' नवेश्वर—'Formerly, O new king, it is said that विश्वकर्मा, the architect of the gods, prepared a pair of very strong bows, displaying an efficacious descent of arrows and handed it over to the lord of the gods, known by the epithet of पुरन्दर.'

St. 37. विसृज्य—Construe अथ त्रिदशाधिपेन तयोः पूर्वं धनुः रथाङ्गधारिणे दनुजारये विसृज्य तथा एकं तद्धनुः त्रिपुरं दिधक्षते त्रिलोचनाय अदायि. दनुजारये—Analyse दनोः जाताः दनुजाः दैत्याः तेषां अरिः दनुजारिर्विष्णुः तस्मै तादृशे, 'To the enemy of the sons of Danu' (i. e. to the enemy of Daityas). दनु *f.*—One of thu wives of कश्यप, the mother of the Dànavas. रथाङ्ग°—Analyse रथस्य अङ्गं रथाङ्गम् । रथाङ्गं चक्रं धारयतीति रथाङ्गधारी तस्मै तादृशे, 'To the holder ot discus,' (i. e. to विष्णु). त्रिपुरं—Analyse त्रयाणां पुराणां समाहारः त्रिपुरं, 'The triple city.' 'The three cities of gold, silver and iron erected by the demon मय and burnt down by शिव.' *Cf* त्रिपुरदहनः. त्रिलोचनाय Analyse त्रीणि लोचनानि यस्य स त्रिलोचनः तस्मै त्रिलोचनाय, 'To the three-eyed god.' *Cf.* त्र्यम्बकः. त्रिदशाधिपेन—Analyse त्रिदशानां अधिपः त्रिदशाधिपः तेन, 'By the lord of the thrice-ten,' (i. e. by Indra). अथ—Then the lord of the gods gave the first of these bows to the enemy of Danus (i. e. to Vishṇu) the bearer of the discus and the other one to the thee-eyed god (i. e. S'iva), who wished to burn the three cities.'

St. 38. विवित्सया—Construe मरुत्पतिः तद्गतजन्यतेजसः विवित्सया तथा यत्नेन व्यधत्त यथा अजय्यशक्त्योः अजयोः हव्यवहोग्रतेजसोः आहवः अजायत. विवित्सया, Expl:—वेत्तुमिच्छा विवित्सा तया तादृश्या, 'Wishing to know or understand' तद्गतजन्य°—Analyse जन्यं च तत् तेजश्च जन्यतेजः । तद्गतं जन्यतेजः तद्गतजन्यतेजः तस्य तादृशस्य, 'Of the power produced by what belonged to it.' 'Of the prowess arising from what belonged to it.' मरुत्पतिः—Analyse मरुतां पतिः मरुत्पतिः, 'The lord of the Maruts' (i. e. Indra). हव्य°—Analyse हव्यानि उह्यन्ते यस्मै स हव्यवहो विष्णुः । उग्रं तेजो यस्य स उग्रतेजाः शिवः । हव्यवहश्च उग्रतेजाश्च हव्यवहोग्रतेजसौ तयोः तादृश्योः, 'Between विष्णु

(*lit.* to whom offerings are carried) and शिव (*lit.* of terrible energy). The compound may also be analysed as, हव्यवहः इव उग्रं तेजः ययोः तयोः तादृशोः, 'Of those possessing a formidable (or terrible) energy (or might) like fire.' अजय्य°—Analyse जेतुमशक्या अजय्या । अजय्या शक्तिः ययोस्तौ अजय्यशक्ती तयोः अजय्यशक्त्योः, 'Of unconquerable might (or prowess).' शक्तिः or शक्ती—'Energy,' 'might,' 'prowess.' अजयोः, Expl:—न जायेते । अजतो वा । इति अजौ तयोः अजयोः, 'Of the unborn.' *Cf.* Pàṇi. III. 2. 101. Derived from जन् (जा) *vi.* 4. A. (सेट्) 'To be born.' Or from अज् *vt.* or *vi.* 1. P. (सेट्) 'To throw.' 'To cast.' *Cf.* Vis'va, "अजो हरौ हरे कामे विधौ छागे रघोः सुते" । विवित्सया—'With a view (*lit.* a wish) to know the power produced by what belonged to it, the lord of the Maruts made such efforts as brought forth a struggle (or war) between विष्णु, the receiver of oblations and शिव, the possessor of terrible energy, both of whom were unborn and of unconquerable might.'

St. 39. चकार—Construe देवयोर्युगं चक्रादि विहाय महेष्वासयुगेन पत्रिभिः दश दिशोऽपि प्रतिरुध्य समेतसाहसं संयुगं सहस्राणि समाः चकार. महेष्वास°—Analyse महान् मनोहारी इषूणां शराणां आसः क्षेपः यस्य स महेष्वासः तस्य युगं तेन महेष्वासयुगेन, 'By a pair of mighty bowmen.' 'By a pair of powerful champions.' Derived from इष् *vt.* 1. A. (सेट्) 'To go.' 'To kill.' 'To see.' And अस् *vt.* 4. P. (सेट्) 'To throw.' *Cf.* निरुक्त, "महेष्वासः स विज्ञेयश्चण्डकोदण्डमण्डितः." But here the expression appears to be in the sense of 'a pair of mighty bows.' Analyse इषवः अस्यन्ते अस्मादिति इष्वासः महांश्चासौ इष्वासश्च महेष्वासः तस्य युगं तेन तादृशेन. धनुर्युग्मेन. समाः *f. plu.* (though *sing.* in sense) 'A year.' *Vide* K. G. Oka's 'Companion to Sanskrit Grammar,' p. 23. समेतसाहसं—Analyse सहसा बले भवं साहसम् । समेतं साहसं यस्मिन् स समेतसाहसः तं तादृशं, 'Full of adventures.' *Cf.* Pàṇi. IV. 3. 53. चकार—'Then that pair of the deities left the discus and other weapons and made a war, full of adventures, with two mighty bows, for thousands of years, obstructing even the ten quarters with their arrows.'

St. 40. अथो—Construe अथो यद् मृदुभूतं चापं त्वया विकृष्टं अभेदि च तद् ईश्वरः ससर्ज । यच्च अक्षतं वैष्णवं धनुः ऋचीकाय वितीर्णं तत् क्रमेण मम हस्तं अगात्. ऋचीक *m.*—A *Rishi* descended from भृगु and husband of सत्यवती, son of ऊर्व and father of जमदग्नि. In the Mahábhàrata and Vishṇu Puráṇa it is related that ऋचीक was an old man when he demanded सत्यवती, the daughter of Gàdhi, king of कान्यकुब्ज. Unwilling to give her to so old a man, Gádhi demanded of him 1000 white

horses, each of them having one black ear. *Richīka* obtained these from the god Varuṇa, and so gained his wife. According to the रामायण, he sold his son सुनःशेपम् to be a sacrifice. अक्षतं—Analyse न क्षतं अक्षतं, 'Not impaired.' वैष्णवं, Expl:—विष्णोः इदं वैष्णवं, 'Belonging to Vishṇu.' *Cf.* Pāṇi. IV. 3. 121. "तस्येदम्," 'After a word in the 6th case in construction, an affix (IV. I. 13 &c.) comes in the sense of 'this is his.' The five universal अण् &c. (IV 1. 83) and the affixes घ &c. (IV. 2. 93.) come in this sense. Thus उपगोरिदम्= औपगवम्, 'of Upagu.' कापटवम्, राष्ट्रियम्, अवारपारीणम् ॥ The affixes, however, do not come when the word governed by the possessive case is अनन्तर &c. thus देवदत्तस्यानन्तरम् ॥ In short the thing possessed must be property, village, kingdom or men. अथो—Then the god शिव abandoned that flaccid bow which you had exceedingly drawn and broken; but that unimpaired bow of विष्णु, which was given to the sage ऋचीक, came to my hand in due course (of time).'

St. 41. गुणौ—Construe अस्य [विष्णोर्धनुषः] उभौ गुणौ [स्तः]। दृढता इति विश्रुतः तयोरेकः जगच्छ्रुतिं न जहाति। ज्या इति निरूढिमागतः [प्रसिद्धिं गतः] परः गुणः असंशयं ममैव श्रवणान्तगोचरः [अस्ति]. जगच्छ्रुतिं—Analyse जगतां श्रुतिः जगच्छ्रुतिः तां तादृशीं, 'Universal ear.' 'Hearing of the universe.' असंशयं—Analyse संशयस्याभावोऽसंशयं, 'Undoubtedly.' 'Without any doubt.' निरूढिमागतः—'Has become celebrated.' 'Has attained fame.' *Cf.* Kir. II. 6. "चतसृष्वपि ते विवेकिनी नृप विद्यासु निरूढिमागता." श्रवणान्त°—Analyse श्रवणस्य अन्तः श्रवणान्तः तस्य गोचरः श्रवणान्तगोचरः, 'Accessible to (or visible at) the end of my ears.' 'Come into the range of my hearing.' गुणौ—'This bow of विष्णु has two Guṇas—a merit and the string. One of which viz. the merit known by the name of firmness (or strength) does not leave the universal ear. But the other Guṇa celebrated by the name of 'string' has, without any doubt, come only into the range of my ears (i. e. within my hearing).'

St. 42. अपाङ्ग°—Construe अपाङ्गभागावधि चापपूरणं सुदुष्करं [तद्] विष्णुगोचरं तिष्ठतु। यदि त्वं इह गुणं जिह्मतां प्रापयसि ततः बलोपपन्नेषु अग्रणीः. अपाङ्ग°—Analyse अपाङ्गस्य भागः अपाङ्गभागः स एव अवधिर्यस्य तद् अपाङ्गभागावधि, 'Reaching as far as the hollow of the outer corner of an eye.' अपाङ्गः, Expl:—अपाङ्गतीति अपाङ्गः, 'An outer corner of the eye.' Or अपकृष्टोऽङ्गाद्वा। अपकृष्टान्यङ्गान्यस्माद्वा। Derived from अग् *vt.* I. P. (सेट) 'To move tortuously.' 'To go.' *Cf.* Vis'va. "अपाङ्गस्त्वङ्गहीने स्यान्नेत्रान्ते

तिलकेऽपि च " । चापपूरणं—Analyse चापस्य पूरणं चापपूरणं, 'Drawing in of the bow.' Stretching of the bow.' सुदुष्करं—Analyse सुष्ठु दुष्करं सुदुष्करं ' Very difficult to accomplish.' विष्णुगोचरं—Analyse विष्णोः गोचरं विष्णुगोचरं, ' Within the power of विष्णु.' ' Can be accomplished by विष्णु ' जिह्मता *f.*—' Act of bending down.' बलोपपन्नेषु—Analyse बलेन उपपन्नाः बलोपपन्नाः तेषु तादृशेषु, ' Of those endowed with strength.' ' Of the powerful.' अग्रणीः—Analyse अग्रं नयतीति अग्रणीः, ' A leader. ' *Cf.* Pāṇi. III. 2. 61. " सत्सूद्विषद्रुहदुहयुजविदभिदच्छिदजिनीराजामुपसर्गेऽपि क्विप्, " ' The affix क्विप comes after the following verbs when in composition with a word ending in an affix, though it may be an उपसर्ग, viz. सत् 'to sit;' सू 'to bring forth;' द्विष् 'to hate;' द्रुह् 'to bear malice;' दुह् to milk; ' युज् ' to join;' ' to concentrate the mind; ' विद् ' to know, ' to become, ' ' to consider;' भिद् ' to divide; ' छिद् ' to cut'; ' जि ' to conquer; ' नी ' to lead; ' and राज् to shine. ' And the वार्तिक thereto, " अग्रग्रामाभ्यां नयतेणा वाच्यः," ' The ending न of the root नी is changed to ण when preceded by अग्र and ग्राम.' अपाङ्ग°—'The bending (or drawing in) of the bow as far as the end of the outer-corner of an eye is very difficult and can (easily) be accomplished by विष्णु (*lit.* let it rest in the power of विष्णु). If you only bend the string of this bow, you will be (acknowledged to be) the leader of the powerful.'

St. 43. निधाय—Construe इह धनुषि बाणं निधाय [त्वया] पूरिते [सति] स्वहस्तेन एव वधः तव सत्क्रिया । इति ईरयित्वा भूपतेः तनयस्य हस्ते सशरं शरासनं मुमोच. स्वहस्तेन—Analyse स्वस्य हस्तः स्वहस्तः तेन तादृशेन, ' At my own hand.' सत्क्रिया—Analyse सती चासौ क्रिया च सत्क्रिया, ' A mark of homage or honor.' 'A reverential mark or sign of homage.' भूपतेः—Analyse भुवः पतिः भूपतिः तस्य तादृशस्य, ' Of the lord of the earth.' सशरं—Analyse शरेण सह सशरं, ' Equipped with an arrow.' शरासनं—Analyse शराः अस्यन्ते क्षिप्यन्ते अनेनेति शरासनं, ' A bow.' निधाय—' The arrow being placed on this bow, if it be fully drawn by you, you will get the (rare) honour of death at my hands. Having said so he passed the bow equipped with an arrow into the hand of the son of the lord of the earth.'

St. 44. ततः—Construe ततः स दशकण्ठसूदनः शून्यां मुष्टिमिव अपाङ्गदेशं आनयन् अविज्ञातविकर्षणश्रमः [सन्] गुणद्रुणबन्धनं धनुः बलात् चकर्ष. अपाङ्गदेशं–Analyse अपाङ्गस्य देशः अपाङ्गदेशः तं तादृशं, 'To the region of the outer corner of an eye.' दशकण्ठसूदनः Analyse—सूदयतीति सूदनः । दशकण्ठस्य सूदनः दशकण्ठसूदनः, ' The killer of the ten-necked demon ' (i. e.

Rávana). अविज्ञात°—Analyse अविज्ञातः विकर्षणस्य श्रमो यस्मै स अविज्ञातविकर्षणश्रमः, 'Feeling no efforts of stretching.' 'Felt no efforts of drawing in.' गुञ्जद्गुण°-Analyse गुञ्जन् यो गुणः गुञ्जद्गुणः तस्य बन्धनं यस्य तत्, 'The tying of the string of which was making a twanging noise.' ततः—'The killer of the ten-necked demon taking, as it were, an empty fist to the region of the corner of his eye, feeling no efforts of stretching, stretched forcibly the bow, the tying of the string of which made a twanging noise.'

St. 45. सं—Construe अथ तेन मुक्तः स सायकः दिवः पदं वाञ्छतः तपस्यद्वृषभस्य द्वितीयवर्णस्य आत्मनः निहन्तुः नीशारं विधाय व्यतिष्ठत किल. *Cf.* R. XI. 88. "प्रत्यपद्यत तथेति राघवः प्राङ्मुखश्च विससर्ज सायकम् । भार्गवस्य सुकृतोऽपि सोऽभवत्स्वर्गमार्गपरिघो दुरत्ययः." तपस्यद्वृषभस्य—Analyse तपः चरन्तीति तपस्यन्तः तेषु वृषभः तपस्यद्वृषभः तस्य तादृशस्य, 'To the best of those who practise (or intend to practise) religions austerities.' *Cf.* Pàṇi. III. I. 15. "कर्मणो रोमन्थतपोभ्यां वर्तिचरोः," 'The affix क्यङ् is employed after the words, रोमन्थ 'ruminating,' and तपस् 'austerity, when they are used as the objects of the action of repeating and performing respectively.' *Vide* वार्तिक "तपसः परस्मैपदं च." द्वितीय°—Analyse द्वितीयः वर्णो यस्य स द्वितीयवर्णः तस्य तादृशस्य, 'Of one belonging to the second order (or caste).' नीशारः, Expl:—नितरां शीर्यते हिमानिलावत्र अनेन वा इति नीशारः, 'A curtain.' 'An outer tent (or screen).' 'A blanket.' 'A warm cloth or outer garment.' Derived from शॄ *vt.* 9. P. (सेट्) 'To tear asunder.' 'To kill.' *Cf.* Páṇi. III. 3. 21. and the Vàrtika thereto, "शॄ वायुवर्णनिवृत्तेषु," 'The affix घञ् comes after the root शॄ when the word so formed means 'wind,' 'colour,' or 'cessation.' As शारः 'wind,' 'green colour &c.' *Cf.* also Páṇi. VI. 3. 122. "उपसर्गस्य घञ्यमनुष्ये बहुलम्," 'The final vowel of a preposition is diversely lengthened before a word formed by the कृत् affix घञ्, but not when the compound denotes a human being.' As नीशारः. स—'Then it is said that the arrow discharged by him became a screen to the best of ascetics, desirous of a place in heaven, who wanted to kill him who belonged to the second order, and stood apart.'

St. 46. रिपोः—Construe अजय्यस्य रिपोः जयेन मानवैः बहुमानमन्त्रणैः सभाज्यमानः स मैथिलीसखः पथि मनोज्ञवासे कतिचिद्दिनानि सुखेन नीत्वा [तां पुरीं विवेशेति उत्तरेणान्वयः]. अजय्यस्य—Analyse जेतुमशक्यः अजय्यः तस्य तादृशस्य, 'Of one difficult to be conquered.' *Cf.* Pàṇi. VI. 1. 81. "क्षय्यजय्यौ शक्यार्थे," 'In क्षय्य and जय्य there is the substitution of अय्

for ए only then when the sense is that of "to be possible to do." सभाज्यमानः *Pres. Parti.*—'One who is congratulated upon.' 'Being respected (or lauded).' Derived from सभाज् *vt.* 10. U. (सेट्) 'To congratulate.' 'To honor.' बहु°—Analyse बहुश्चासौ मानश्च बहुमानः तस्य मन्त्रणानि तैः तादृशैः, 'With many congratulatory addresses.' 'With many addresses of honour.' मनोज्ञ°—Analyse मनोज्ञश्चासौ वासश्च मनोज्ञवासः तस्मिन् तादृशे, 'In a charming place.' मैथिलीसखः—Analyse मिथिलस्य गोत्रापत्यं स्त्री मैथिली तस्याः सखा मैथिलीसखः, 'The lord of the daughter of मिथिल king.' *Cf.* Pāṇi. V. 4. 91. "राजाहस्सखिभ्यष्टच्," 'The affix टच् is added to the words राजन् अहन् and सखि, when they stand at the end of तत्पुरुष compound.' This and the next five verses form a कुलक. For the definition &c. see our notes on II. 2. रिपोः—'The lord (*lit.* the loving-friend) of the daughter of the Mithila king, congratulated by the people with many addresses of honour, upon his victory over an unconquerable foe, spent some days happily on the road, where it was pleasant to stay.'

St. 47. व्यपावृत°—Construe व्यपावृतद्वारमुखेन भूम्ना बलेन सन्ततं विशता कुम्भजन्मनः तनुमिव उदग्रनिस्वनं उदन्वन्तं पिबन्तीं कृतध्वनिं पुरीं [विवेशेत्युत्तरेणान्वयः]. व्यपा°—Analyse व्यपावृतं उद्घाटितं यद्द्वारं तदेव मुखं यस्य तत् तेन तादृशेन, 'Having an entrance of the door which was flung open.' कृत°—Analyse कृतो ध्वनिः यस्यां सा कृतध्वनिः तां तादृशीं, 'The noise in which was made.' उदन्वन्तं—'To the ocean.' *Cf.* Pāṇi. VIII. 2. 13. "उदन्वानुदधौ च," 'The word उदन्वान् is irregularly formed, in the sense of "a sea." It is derived from उदक 'water' with the affix मत् ॥ उदन्वान् is the name of a *Rishi*, because he controlled the rains; it rained at his command. It also means ocean or that in which water is held, like तटाक &c. उदग्रनिस्वनं—Analyse उदग्रः निस्वनः यस्य स उदग्रनिस्वनः तं तादृशं, 'Of a terrible roar.' कुम्भजन्मनः=अगस्त्यस्य, 'Of the sage अगस्त्य (*lit.* of the pitcher-born sage). व्यपावृत°—'(He entered) the city which was noisy on account of the innumerable troops that were seeking entrance constantly through the opened doors, as if it were the body of the sage Agastya which drank up the ocean which was terribly roaring.'

St. 48. नरेन्द्र°—Construe नरेन्द्ररथ्योभयभागचारितप्रसारिकालागुरुधूपवासितां अनन्तैः सपङ्कजाष्टापदकुम्भमण्डलैः उपरत्नतोरणं ततां [तां पुरीं विवेशेत्युत्तरेणान्वयः]. नरेन्द्र°—Analyse नराणां इन्द्रः नरेन्द्रः तस्य रथ्यायाः उभयभागयोः चारितः अत एव प्रसारी कालागुरोः धूपः तेन वासिता तां तादृशीं, 'Perfumed with the incense of the black aloe-wood which was spreading

having been moved on both the sides of the king's high-road.' उपरत्नतोरणं *adv.*—Analyse रमन्ते एष्विति रत्नानि। रत्नानां तोरणानि रत्नतोरणानि। रत्नतोरणानां समीपे उपरत्नतोरणं, 'In the vicinity of jewelled-arches.' सपङ्क°—Analyse अष्टापदस्य सुवर्णस्य कुम्भाः तेषां मण्डलानि अष्टापदकुम्भमण्डलानि। पङ्कजैः कमलैः सहितानि अष्टापदकुम्भमण्डलानि सपङ्कजाष्टापदकुम्भमण्डलानि तैः तादृशैः, 'With groups of golden-pitchers having lotuses in them.' नरेन्द्र°—'(He entered the city) which was perfumed with the incense of the black agallochum, which was spreading, having been moved on both the sides of king's high road and which was packed in the vicinity of jewelled-arches, with numberless groups of golden pitchers having lotuses in them.'

St. 49. परिक्वणत्°—Construe सुगन्धिना गन्धवहेन ताडितैः परिक्वणत्काञ्चनकिङ्किणीगुणः भ्रमत्पताकानिकरैः उदर्चिषः उष्णघृणेः करच्छिदां वितन्वतीं [तां पुरीं विवेशेत्युत्तरेण संबन्धः]. परिक्वणत्°—Analyse परिक्वणन्त्यः काञ्चनस्य किङ्किण्यः तासां गुणाः येषु ते तैः तादृशैः, 'Having strings of sounding golden-bells.' सुगन्धिना—Analyse शोभनः गन्धो यस्य स सुगन्धिः तेन तादृशेन, 'Possessing sweet smell (or scent).' गन्धवहेन—Analyse वहतीति वहः। गन्धस्य वहः गन्धवहः तेन गन्धवहेन, 'By the wind.' 'By a breeze.' *Cf.* Vis'va, "गन्धवहा तु नासायां वायौ गन्धवहो मतः." Also Hema. "गन्धवहो मृगेऽनिले। गन्धवहा तु नासायां." And Medi. "स्याद्गन्धवहा नासायां पुलिङ्गो मातरिश्वनि." भ्रमत्°—Analyse भ्रमन्त्यः याः पताकाः तासां निकराः समूहाः तैः तादृशैः, 'With numbers of fluttering flags.' उदर्चिषः, Expl:—उद्गतानि अर्चींषि यस्य स तस्य तादृशस्य, 'Blazing.' 'Up-flaring.' 'Luminous.' उष्णघृणेः—Analyse उष्णाः घृणयः किरणाः यस्य स उष्णघृणिः रविः तस्य तादृशस्य, 'Of the hot-rayed luminary.' 'Of the sun.' करच्छिदां—Analyse कराणां छिदा करच्छिदा तां तादृशीं, 'Cutting or dividing the rays.' परिक्वणत्°—"(He entered the city) which cut short the rays of the blazing sun, with numbers of its fluttering flags, flapped by the fragrant breeze and having strings of sounding golden-bells.'

St. 50. मधु—Construe मधुव्रतव्रातविरावकिङ्किणीरुतेन रम्यं अनिलस्य रंहसा धुतं [अत एव] पताकानुकृतानि बिभ्रतं मणितोरणस्रजां चयं दधानां [तां पुरीं विवेशेत्युत्तरेणान्वयः]. मधु°—Analyse मधु व्रतं भक्ष्यं येषां ते मधुव्रताः तेषां व्राताः समूहाः मधुव्रतव्राताः। किङ्किणीनां रुतं किङ्किणीरुतम्। मधुव्रतव्रातानां विरावः एव किङ्किणीरुतं मधुव्रतव्रातविरावकिङ्किणीरुतं तेन तादृशेन, 'By reason of (or on account of) the sound of bells consisting of the humming of the rows (or clusters) of bees.' मणि°—Analyse मणीनां तोरणानि मणितोरणानि तेषां स्रजः तासां, 'Of the garlands (hanging) on the jewelled-arches.' रंहसा = तरसा, Expl:—रमते अनेनेति रंहः तेन रंहसा,

